वाव स सुवर्गो लोको यदाहवनीय, एत[स्मिन्नेव वाचः सत्यं सर्वमाप्नोति; त्रिभि][१]र्गार्हपत्यमादधाति; पञ्चभिराहवनीय[२](म्; अष्टौ संपद्यन्ते अष्टाक्षरा गायत्री, गायत्रोऽग्निर् यावानेवाग्निः; तमाधत्ते ॥ ३ ॥ तदाहुः-कथमष्टाक्षरा गायत्री चतुर्विꣳशत्यक्षरा[३] संपद्यते, कथमष्टाक्षरा भवति चतुर्विꣳशत्यक्षरेति; अक्षरमिति तान्यत्र त्रीण्यक्षराणि, तेऽत्र [चतुर्विꣳशत्यक्षराणि][४] संपद्यन्ते, चतुर्विꣳशत्यक्षरा गायत्री[५]; एवं नु हाष्टाक्षरा गायत्री चतुर्विꣳशत्यक्षरा संपद्यते; एवमु हाष्टाक्षरा भवत्येवं चतुर्विꣳशत्यक्षरा नु हैतत् ॥ ४ ॥ एके व्याहृतीभिर्वा[६] अभिमन्त्र्य वाव्रजन्त्येतावद्धा अग्न्याधेय्या [व्याहृतय][७] आहिता इति वदन्तः ॥ ५ ॥ तदु होवाच वाधूलः ॥ ६ ॥ [८]

तदु होवाच वाधूल एवमेवैतदग्न्याधेयं[८] यदेता[९] व्याहृतयो, यज्ञस्य त्वाङ्गा-परूꣳषि विष[य][१०]ाणि य[दा][११] वाचा मनसा चाहृतानीति; तस्मान्नु हास्मिन्नन्य-[स्माद्][१२] यज्ञः प्रणीयते यदग्निरुद्ध्रियते ॥ १ ॥ अश्वोऽग्निर्ब्राह्मण एषां लोकाना-मेषां भूतानां पाप्मानमघ्नन्[१३]; स यदश्वं पुरस्तान्नयत्यस्यैव तेन लोकस्य पाप्मान-मप[हन्ति, यानि][१४] भूतानीमं लोकमन्वायत्तानि तेषा[मु च तेन पाप्मानम-पहन्ति ॥ २ ॥ स यदग्निं पुरस्तान्नयत्यन्तरिक्षस्यैव लोकस्य][१५] तेन पाप्मानमपहन्ति, यानि च भूतान्यन्तरिक्ष[लोकमन्वायत्तानि][१६] तेषा[१७][मु च तेन पाप्मानमपहन्ति ॥ ३ ॥ स यद् ब्रा]ह्मणोऽनु समेति दिविलोकस्यैव[१८] तेन पाप्मानमपहन्ति, यानि च भूतानि दिविलोकमन्वायत्तानि तेषामु च ॥ ४ ॥ त इमे लोका, एतानि [तैरत्र][१९] पाप्मानपघ्नन्त्यपहतपाप्मा [२०]भवत्यस्मिꣳश्च [लोकेऽमुष्मिꣳश्च][२१] य एवं-विद्वानग्नीनाधत्ते, यस्य वैवंविद्वानग्नीनादधाति ॥ ५ ॥ [९] [इति पञ्चमोऽनुवाकः]

आहिताग्निर्ह[२२] वा अन्यो निहिताग्निरन्यः; एष नु हाहिताग्निर्यस्यैनं मथित्वाऽञ्जलावादधति; अथ हैष नि[हिताग्निर्यस्यैनं मथि][२३]त्वा स्पृशन्त्यभि वा मन्त्रयन्ते; तस्मान्नु हैनं मथित्वाऽञ्जलावेवादधीत ॥ १ ॥ तमेवमिहाधाय मृत्युवन्तं कुर्वीत ; यावदिह पुरुषस्यायुस्तावदेनं बिभृयात् ; यावद्धैवामुष्मिँलोकेऽग्ने-रायुस्तावद्धैनममुष्मिँल्लोके[ऽग्निर्बिभर्ति, विष्टुतिं चास्य][२४] कुरुते; तस्मान्नु

१. MHP broken before गार्ह° [MHP मस्स]. २. MHP abr. ; See TB I.1.5.3. ३. MHP °त्यक्षरस्. ४. MHP broken ५. P om. ६. MHP °हृतीर्वा. ७. MHP om ८. MH °तदेतदेवाग्न्या°, P °तदेवाग्न्या°. ९. MHP यदेत, AO IV.3:7.18 om एता. १०. MHP broken. ११. MHP broken. १२. MHP broken. १३. MHP °मेपाप्मन्. १४. MHP broken. १५. MHP broken. १६. MHP broken. १७: MHP broken. १८. MHP दिविभोक°. १९. MHP broken. २०. MHP भवन्त्य°. २१. MHP broken ; thus AO IV.3:7.19. २२. MHP °ताग्निह. २३. MHP broken. २४. MHP broken ; AO IV.4:8.3 supplies only (ऽग्निर्बिभर्ति)... ।

हैनमिहाधाय मृत्युवन्तमेव कुर्वीत॥ २॥ सा यैव[१] पुरुषस्य [२][विष्टुति]र्यद्यशो यदन्नाद्यं[३], तस्मा एनं जनयति, तमेवं जातं बिभर्ति; यावदिह पुरुषस्यायुस्तावद्धैवामुष्मिँ[४]ल्लोकेऽग्निर्बि[भर्ति, विष्टुतिं चास्य कुरुते][५]; तस्मान्नु हैनमिहाधाय मृत्युवन्तं कुर्वीत; सा यैव[६] पुरुषस्य विष्टुतिर्यद्यशो यदन्नाद्यं, तस्मा एनं जनयति, तमेवं जातं बिभर्ति; यावदमुष्मिँल्लोके[७][.... ॥ ३ ॥ य][७]दित्थंविदस्मा-ल्लोकादाहिताग्निः प्रैति, यदेनं दिष्टमितमग्नावभ्यादधति, तममुष्मै लोकायाग्निर्जनयति, तमेवं जातं बिभर्ति; यावदमुष्मिँल्लोकेऽग्नेरायुस्तावद्धैन-[८](ममुष्मिँल्लोकेऽग्निर्बिभर्ति, विष्टुतिं चास्य कुरुते; तस्मान्नु हैनमिहाधाय)[८] मृत्युवन्तमेव कुर्वीत; स उ ह वा एष पुत्र एव पिता भवति, [तद्][९] उक्तम्[१०]— **'शतमिन्नु शरदो अन्ति [देवा यत्रा न][११]श्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या [१२]रीरिषतायुर्गन्तोः'** इति; स यथा ह वा इदमस्मिँल्लोकेऽग्नीन् प्रति पुरुषो भवत्येवꣳ ह वा एनममुष्मिँल्लोकेऽग्नयः प्रति भवन्ति ; तस्मान्नु हैषो[ऽग्नीनाधास्यमानः][१३] स्यात्॥ ४॥ तेषामु हैषोऽभिषङ्ग इवेत्याहुर्य एनान्[१४]... ? तीव सत्रात्प्रयुङ्क्ते[१५]; न वा अहमग्निभ्यः[१६] प्रवसामि, साग्निर्वा अहं प्रव्रजामि[१७] यां कां च दिशमेमीति; आदायैवैनान् समर्थं व्रजतीश्वरो हैवैतेऽस्मिन्[१८] लोके हि[ꣳसितोर्यद्यु][१९]त्सृजति; य एनानुपस्थाय प्रवाहयति[२०], कुरुत उ[२१] समर्थं, बिभर्त्येवैनान् हृदयेनाप्यवच्छिन्नान्॥ ५॥ सर्वथो ह वा एते लोका अग्न्यालोक्याः[२२] कथाचन यथैवैनान् कथाचन[२३] परिचरति॥ ६॥ तिरीची वा इयं पृथिवी तिरीचीरापः स्य[न्दन्ते तिरीच][२४]मन्तरिक्षं तिरीची द्यौस्तिर्यङ्ङादित्यस्तिर्यङ् च[२५][न्द्रमास्तिर्यञ्चि न]क्षत्राणि; अग्निर्ह वावोर्ध्वो [२६]देवतानामुपदीप्यमान एति[२६] तिर्यञ्च उ हैवान्ये पुरुषाः पशवः, पुरुषो ह

१. MHP एव ; thus AO IV.4:8.4. २. MHP broken. ३. MHP यमहाद्यम्; thus AO IV.4:8.4. ४. MHP. °तावद्धावद्यैवा°. ५. MHP. broken. ६. MH सा एव; P या एव. ७-७. MHP broken between लोके and दित्थं° [Hरित्थं]. ८. MHP abr. as तावद्धैन= मृत्युवन्त°. ९. MHP broken. १०. MHP युक्तं. ११. MHP broken. १२. MP रिरीष°. १३. MHP broken. १४. MHP broken between एनान् and तीव [AO IV.5:8.21: तिव]. १५. MHP प्रयुक्ते. १६. MHP अहमहिभ्यः. १७. MHP प्रजामि; thus AO IV.5:8.23. १८. MHP हैवैते तस्मिन्. १९. MHP broken ; thus AO IV.5:8.25. २०. MHP प्रवाहवसति; thus AO IV.5:8.25. २१. MHP उत् , thus AO IV.5:8.25. २२. MHP लोकान्यालो°. २३. MHP कथाच. २४. MHP broken, thus AO IV.6:9.8. २५. MHP broken; thus AO IV.6:9.9. २६-२६. MHP °मुपदिह्यमान ए; thus AO IV.6:9.10.

वावोर्ध्वोऽग्निमन्वायत्तः; स यो ह वावो[र्ध्वोऽग्निमन्वायत्तस्तस्मा][१]दूर्ध्वा हैवास्य श्रीरेति देवेषु च पितृषु च[२]॥ ७॥ स यः पु[नराधेयं वि][३]द्यादित्याहुर्योऽग्न्याधेये पुनराधेयं विद्यादिति; 'भूर्भुवः सुवः' इति हैवा[दध्य][४]देतद्वा अग्न्याधेयमेतद्वा आवृ[त्ताग्न्याधेयं, त][५]स्य ते उभे कर्मणी उपात्ते भवतो यच्चाग्न्याधेये यच्च पुनराधेये॥ ८॥ स यां प्रथमाꣳ समिधमादधात्येकाहः, [६]स यां द्वितीयां[६] द्वियहः, स यां तृतीयां त्रियहः[७], स यां च[तुर्थीं च][८]तुरहः, स यां पञ्चमीं पञ्चाहः, स या[ꣳ षष्ठीꣳ षडहस्ते][९]न संपद्यते; [१०]षडहः [११]वाङ् नातिवदतीति[११] ब्राह्मणम्॥ ९॥ तदाहुः- किमेतद् यद् गार्हपत्य इति, यमो ह वा एषो वैवस्वतो[१२] यद् गार्हपत्यः; किमा[हव][१३]नीय इति, विवस्वानेष आ[दित्यो][१४] यदाहवनीयः[१५]; पिताऽस्यैतद्ध वा वै[वस्वतो यद् गार्हपत्यः][१६]; स यदित्थमेव विजानाति पिता पुत्रादहरहर्जायत इत्युत ह्येनमेतस्मादहरहरेवोद्धरन्ति; किमन्वाहार्यपचन इ[त्युभ][१७]योर्ह वा एनयोरेष भ्रातृव्यो यद्[१८] अन्वाहार्यपचनस्तस्मान्नु हैनमेतस्माद् भ्रातृव्यो भवति [१९]यस्यैनमेताभ्यां न समञ्जलयति; तस्मान्नु हैनमेताभ्यां नैव समञ्जलयेत्॥ १०॥ तन्नु हैतदेकेऽमावास्यायाञ्चैव [२०]पौर्णमास्याञ्चाहरन्ति; इयमभ्रातृव्यं[२०] कर्मण एव पश्येन्नान्यस्मै का[स्मै...][२१]; यदन्वाहार्यपचनः पितैनयोरुभयोस्तदन्नं, सायंप्रातर्ह वा अन्नमाह्रियतेऽन्नादो ह भवत्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च यस्यैनं सायंप्रातरेवाहरन्ति[२२]; तस्मान्नु हैनं सायंप्रातरेवाहरेयुः॥११॥ अह्नैव[ाधानं कु][२३]रुते; तस्मान्नु हैनमिहाधाय मृत्युवन्तमेव कुर्वीत; सा यैव पुरुषस्य विष्टुतिर्यद्यशो यदन्नाद्यं, तस्मा एनं जनयति, तमेव जातं बिभर्ति; यावदिह पुरुषस्यायुस्तावद्धैवामुष्मिँल्लोकेऽग्नेरायुस्तावद्धैनममुष्मिँल्लोकेऽग्निर्बि[भर्ति, त][२४]स्मान्नु हैनमिहाधाय मृत्युवन्तं कुर्वीत; सा यैव पुरुषस्य विष्टुतिर्यद्यशो यदन्नाद्यं तस्मा एनं जनयति, [२५](तमेवं जातं बिभर्ति; यावदिह पुरुषस्यायुस्तावद्धैवामुष्मिँल्लोकेऽग्निर्बिभर्ति, विष्टुतिं चास्य कुरुते; तस्मान्नु

१. MHP broken ; MHP °दार्ध्वा for दूर्ध्वा. २. MHP give the sign (...) of broken text between च and स. ३. MHP broken. ४. MHP broken. ५. MHP broken. ६. P om. ७. MHP त्रियं. ८. MHP broken, thus AO IV.7 : 9.22. ९. MHP broken, thus AO IV.7:9.23. १०. MHP षडहं. ११-११. P वाङ्गानिवद°, cf MS III.7.6. १२. MHP °स्वता. १३. MHP broken. १४. MHP broken. १५. MHP °नीयं. १६. MHP broken. १७. MHP broken. १८. MHP om. १९. MHP यस्यैन्नमे°. २०-२०. H °चारन्तीयमाभ्रण्यं, MP °माभ्रव्यं. २१. MHP broken. २२. MHP °रेवह°. २३. MHP broken. २४. MHP broken. २५. MHP Text abr. as जनयति = मृत्युवन्तमेव.

हैनमिह्राधाय) मृत्युवन्तं कुर्वीत; [१]सा यैव पुरुषस्य विष्टुति[१]र्यद्यशो यदन्नाद्यं तस्मा एनं जनयति तमेवं जातं बिभर्ति; यावदमुष्मिँल्लोके[ऽग्नेरायुस्तावद्धैनममुष्मिँल्लोकेऽग्निर्बिभर्ति ॥ १२ ॥ प्राणो वै][२] गार्हपत्यश्चक्षुराहवनीयः, स्वपितीव[३] वै सुप्तस्य चक्षुः; तस्मान्नु हैष उद्धार्य एव स्याद्यदाहवनीयः; श्रोत्रमन्वाहार्यपचनः, स्वपितीव वै सुप्तस्य श्रोत्रम्; तस्मान्नु हैष आहार्य एव स्याद्यदन्वाहार्यपचनः ॥ १३ ॥ [४][सोऽब्रवीदन्ताद्वै बि]भेमीति[५]; तत्कथꣳ स्यादिति; ज्वलन्तमेव मोद्धरेयुरिति होवाच ॥ १४ ॥ [१०]

ज्वल[६](न्तमेव मोद्धरेयुरिति होवा)च; तस्मान्नु हैनं ज्वलन्तमेवोद्धरेयुः; अनन्तंभावुकं हास्य भवत्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च यस्यैनं ज्वलन्तमुद्धरन्ति; तस्मान्नु हैनं ज्वलन्तमेवो[७][द्धरेयुः॥ १ ॥ सोऽब्रवी]देकाकि[तायै][७] वै बिभेमीति; तत्कथꣳ स्यादिति; उद्धृत्य मोपासीरन्निति[८] होवाच; तस्मान्नु हैनमुद्धृत्योपैवासीरन्; अनेकाकी ह भवत्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च यस्यैनमुद्धृत्योपासते; तस्मान्नु हैनमुद्धृत्योपैवासीरन् ॥ २ ॥ सोऽब्रवीन्नाग्न्याद्वै[९] बिभेमीति; तत्कथꣳ स्यादिति; परि च मा मृज्युः[१०] परि च स्तृणीयुरिति होवाच; तस्मान्नु हैनं परि चैव मृज्युः परि च स्तृणीयुः; अनग्नंभावुकं हास्य भवत्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च यस्यैनं परि च मृजन्ति परि च स्तृणन्ति; तस्मान्नु हैनं परि चैव मृज्युः परि च स्तृणीयुः ॥ ३ ॥ सोऽब्रवीत्क्षुधो वै बिभेमीति; तत्कथꣳ स्यादिति; अवक्षाणानि[११] मेऽनु समिन्धीरन्निति होवाच; तस्मान्नु हास्मा अवक्षाणान्यनु समिन्धीरन्; अक्षोधुकंभावुकं हास्य [१२][भवत्य]स्मिꣳश्च लोकेऽमुष्मिꣳश्च यस्यास्मा अवक्षाणान्यनु समिन्धते; तस्मान्नु हास्मा अवक्षाणान्यन्वेव[१३] समिन्धीरन् ॥ ४ ॥ अमृताहुतिर्हि[१४] वा एषा हूयते यदग्निरुद्ध्रियते; [१५]यावत्कृत्वो हैष एवंविदा उद्ध्रियते[१५] सत्यो हास्यामृताहुतयो हुता[१६] भवन्त्यमृतस्यैषा[१७] धारा प्रवृज्यते यस्यैनमत्रैवोपसमिन्धे; यतरेणो ह

१-१. MHP सा यामुष्मिन्लोकेऽग्निर्विष्टुति; this has been emended as given above. २. MHP broken. ३. MH सवितीव, P सपितीव. ४. MHP broken; thus AO IV.9:10.13. ५. MHP भमीति. ६. MHP abr. as ज्वल = च. ७-७. MHP broken between °मेवो° and °देकाकि° [MHP °दकाक°] and again between °देदाकि° and वै [MHP वे] ; thus supplied AO IV.9:10.17. ८. MP मोवासी°, H मो वसी° ; thus AO IV.9:10.18. ९. MHP नान्याद्वै; thus AO IV.9:10.21. १०. MH मृज्युं, P मृज्यं. ११. P °क्षणा°. १२. MHP broken ; thus supplied AO IV.9:10.28. १३. MHP अवेक्षणा°. १४. MH °हुतीर्ह°, P °हुतीहुत्वा. १५-१५. AO IV.9:10.30 om; MHP एवंविद. १६. HP om हु. १७. MHP add अमृतस्यैव after एषा which seems to be superfluous.

वा एनयोः कतरेण[१] चाहरहरुद्धरणेन वोपसमेधेन वैवंवित् पुनर्मृत्युञ्जयति ॥ ५ ॥ [११] [इति षष्ठोऽनुवाकः]

इदं वा अन्वाहुर्-अयज्ञो वा एष [२]योऽसामा; '**अग्न आ याहि वीतये**'[२] इत्याह रथन्तरस्यैष [३](वर्णः; '**बृहदग्ने सुवीर्यम्**' इत्याह बृहत एष वर्णः; यदेतं तृचमन्वाह यज्ञमेव तत्) सामन्वन्तं करोति; स यत्समिध आदधाति ता इहैवास्य सामिधेन्य, इध्मस्तदुक्थम् ; अथ [४]यद्धोतृञ्जुहोति त.उ हैवास्य ग्रहा भवन्ति; एवं नु हास्यैष यज्ञक्रतुः स्तोत्रवानुक्थवान् ग्रहवान् भवति ॥ १ ॥ अथ यत्पृथिव्याहुतिं जुहोति जातमेवैनं तत् साम्राज्यायाभिषिञ्चति; अथ यदग्निहोत्राहुतिं जुहोति जाताभिषेकायैवास्मा अन्नमपि दधाति; तस्माज्जातोऽन्नमत्ति ॥ २ ॥ तद्वा इदमन्वाहुर्-ब्रह्मवादिनो वदन्ति[५] वत्सो वा अग्निहोत्रस्य प्रायणमग्निहोत्रं यज्ञानामिति; तदाहुः- कतमः स वत्स इति; एष ह वाव स वत्सो यदाहवनीयोऽग्निरेव [६]भगवाꣳस्तस्मान्नु हैवं जातमेतेन पयसा प्रत्यवेक्षेत ॥ ३ ॥ तदाहुः- यैषान्वगाहितेष्वग्निष्वग्निहोत्राहुतिर्हूयते[७] प्रातराहुतिरेषा सायमाहुतिरित्यथो क्वैतस्या[८] आहुतेः सविवधत्वमिति; स यदित्थंविदस्माल्लोकादाहिताग्निः[९] प्रैति यदेनं दिष्टमितमग्नावभ्यादधत्येतद्ध वा अस्या आहुतेः सविवधत्वम् ॥ ४ ॥ [१२]

एत[१०](द्धवा अस्या आहुतेः सविवध)त्वम्; नह्येवैषा प्रातराहुतिर्न सायमाहुतिरर्वाग्वा[११] हि परो वा पुरुषः प्रमीयते ॥ १ ॥ अथातः [१२]पूर्णाहुतेरेवान्वाख्यानमभि सम्पद्यते। '**सप्त त अग्ने समिधः**' इति पशवो हैवैते, '**सप्त जिह्वाः**' इति छन्दाꣳस्युवेवैतानि, '**सप्तर्षयः**' इति प्राणा उ[१३] हैवैत, इम एवाभिपुरुषम्, '**सप्त धाम प्रियाणि**' इत्यन्नमुवेवैतदिमा एवौषधयः, '**सप्त होत्राः**' इति होत्रा उवेवैताः, '**सप्तधा त्वा यजन्ति**' इति यज्ञक्रतवो हैवैते, '**सप्त योनीरा पृणस्वा घृतेन**' इति वनस्पतयो हैवैते, वनस्पतयो ह वा एतस्य देवस्य योनिः[१४] प्रतिष्ठाऽपि ह्येष एतर्हि देवो वनस्पतिष्वेव प्रविष्टः ; तानि वा एतानि सप्त साप्तानि[१५] हूयन्ते, सप्तपदा शक्वरी, पशवः शक्वरी, पशूनेवावरुन्धे ॥ २ ॥ तदाहुः- पूर्णाहुतिरित्येतस्यै देवतायै सायुज्यꣳ सलोकतां जयति य एवंविद्वान् पूर्णाहुतिं जुहोति, [१६]यस्य वैवं[१६]विद्वान् पूर्णाहुतिं जुहोति ॥ ३ ॥ [१३] [इति सप्तमोऽनुवाकः]

१. MHP करेण. २-२. MHP योस्साग्न आयातय. ३. MHP abr. as रथन्तरस्य = सामन्वन्तं. ४. P यद्धोत्रुं. ५. P वदान्ति. ६. MHP, AO IV.10 : 12.6 भवाꣳस्त. ७. MHP हुतीर्हू. ८. AO IV.11:12.12 : वैव तस्या. ९. MHP °ताग्निं. १०. MHP abr. as एत = त्वं. ११. MHP वा यमाहु°; AO IV.11:12.15: °हुतिरिवार्वाग्वा. १२. MHP पूर्णाहुतिरे°; Caland conjectures the reading as पूर्णाहुतेरे° cf AO IV.11.12 fn.1. १३. MHP om ; thus AO IV. 12:13.2. १४. MHP योनिं. १५. AO IV.12:13.5: सप्तानि. १६-१६. AO.IV.12:13.8. यस्यैवं.

इदं वा अन्वाहु:[१]- त्रीणि हवीꣳषि निर्वपति विराज [२](एव विक्रान्तं यजमानोऽनुविक्रमतेऽग्नये पवमानायाग्नये पावकायाग्नये शुचय) इति ॥ १ ॥ स वा आग्नेयं चाष्टाकपालं निर्वपत्यग्नये च पवमानाय पुरोडाशमष्टाकपालम् , इममेव तेन लोकमभिजयत्यस्मिँल्लोके प्रतितिष्ठति ॥ २ ॥ स वा अग्नये च पावकाय पुरोडाशमष्टाकपालं निर्वपत्यग्नये च शुचये पुरोडाशमष्टाकपालम् , अन्तरिक्ष-लोकमेव तेनाभिजयत्यन्तरिक्षलोके प्रतितिष्ठति ॥ ३ ॥ स वा ऐन्द्राग्नं चैकादशकपालं निर्वपत्यादित्यं च[३] चरुं, दिविलोकमेव तेनाभिजयति दिविलोके प्रतितिष्ठति ॥ ४ ॥ तानि वा एतानि षड्ढवीꣳषि[४] तिस्रो वेद्यस्त्रीणि बर्हीꣳषि, तानि वा एतानि द्वादश सम्पद्यन्ते, तानि वा एतानि द्वादश मासा: संवत्सर:, संवत्सर एव प्रतितिष्ठति ॥ ५ ॥ तद्वा इदमन्वाहुर्- ब्रह्मवादिनो वदन्ति तनुवो वावैता [५](अग्न्याधेयस्याग्नेयो वा अष्टाकपालोऽ)ग्न्याधेयमिति; स उ ह वा एष एव यजमानो यदाग्नेयोऽष्टाकपाल:[६]; तं वा एतद् व्यूढमेव[७] जनयन्ति यत्त्रिबर्हि:[८] कुर्वन्ति ॥ ६ ॥ को हि तद् वेद यद् व्यूढस्य जातस्य सं वाऽङ्गं धीयते न वेति; तदाहु:- कथं यजमाने प्राणा धीयन्त इति ॥ ७ ॥ [१४] [इत्यष्टमोऽनुवाक:]

स एतमेवाग्नेयमष्टाकपालं निर्वपति, तं तनूभि: परियजत्येवं नु ह यजमाने प्राणा धीयन्ते; एवमु ह यजमानꣳ सात्मानꣳ साङ्गꣳ[९] सतनुꣳ सप्राणꣳ सककथमेवंविदध्वर्युर्यज्ञे[१०] जनयति ॥ १ ॥ एकराजमु हैनेनान्यद् व्यावृत्कामं [११]याजयेद्यो वा अन्यद्[११] व्यावृत्काम: स्यादेतेनान्तस्तनुना पुरोडाशेन; स यत्पिष्टानि कुर्वन्ति सोऽग्नि: पवमानोऽथ यदद्भिरुपसृजति सोऽग्नि: पावकोऽथ यदाज्येनाभि-घारयति सोऽग्नि: शुचि:; वि ह पाप्मना वर्ततेऽन्तर्हा[ज्यवा][१२]न्त्स भवति, स्वाहैनेन प्रज्ञायते यस्य नु हैनदेवं कुर्वन्तीति ॥ २ ॥ मिथुनमु ह दद्यात्प्रजाकामस्य; आग्नेयमाज्यभागमिष्ट्वाऽग्निं पवमानं यजेत्, सौम्यमाज्यभागमिष्ट्वाऽग्निं पावकं यजेत्, पावकमिष्ट्वा हविषो यजेद्धविष इष्ट्वा शुचिं यजेच्छुचिमिष्ट्वा हविषो यजेद्धविष इष्ट्वा शुचिं यजेच्छुचिमिष्ट्वा स्विष्टकृतं यजेत्; प्र हैव प्रजया पशुभिर्मिथुनैर्जायते

१. AO IV.13:13.29 आहुस्. २. MHP abr. as विराज = शुचये; See TB I.1.5.11 ३. MHP om ; thus AO IV.13:14.2. ४. MHP षड्विशति; thus AO IV. 13:14.3. ५. MHP abr. as वावैता=ग्न्याधेय°; See TB I.1.6.9. ६. MHP °कपालं. ७. MHP व्यूढमिव; thus AO IV.13:14.8. ८. M यत्रिव°, H यत्र बर्हि. ९. MHP साहं. १०. MHP add यजमानं after यज्ञे. ११-११. MHP याजयेद्यावा अन्योद्. १२. MHP broken between अन्तर्हा and न्त्स भवति [MHP न्सा भवन्ति].

यस्यो एनदेवं कुर्वन्ति ॥ ३ ॥ तद्वा [१]इदमन्वाहू- रथचक्रं प्रवर्तयति, मनुष्यरथेनैव देवरथं प्रत्यवरोहतीति;[२] स एतदेव प्रथमꣳ हविर्निरुप्य [३]द्वादशाहमृतुहोमैरियाद्, अथोत्तरेण[३] हविषा[४] यजेत; तदेतद्[५] द्विबर्हिषो रथचक्रम् ॥ ४ ॥ अथ त्रिबर्हिष:। एतदेव प्रथमꣳ हविर्निरुप्य द्वादशाहमृतुहोमैरियाद्, अथोत्तराभ्याꣳ हविर्भ्यां यजेत; तदु हैवैतत्त्रिबर्हिषो रथचक्रम् ॥ ५ ॥ [१५] [इति नवमोऽनुवाक:]

स यद[प:][६] प्रणयति यथा [७]हैवैतत्पशोर्जायमानादाप: पुरस्तादागच्छन्ति तादृक् तत् ॥ १ ॥ अथ यन्निर्वपति तदु हैवैतौ देवौ समुपमन्त्रयेते ॥ २ ॥ अथ यन्निरुप्याद्भि: प्रोक्षति यथा हैवैतत् स्त्रिया[८] ज्ञापितायां ऊरुव्यस्यमानाया आप: पुरस्तादागच्छन्ति तादृक् तत् ॥ ३ ॥ अथ यदवहन्ति तदु हैवैतौ देवौ संभवत: ॥ ४ ॥ त[द्यानि][९] पिष्टानि कुर्वन्ति तान्यद्भि: संयौति, [१०]तदु हैवैतदस्मिन् रेतो[१०] भवति ॥ ५ ॥ तमेतमग्नौ[११] योनावधिश्रयति, सोऽत्रैवाग्नौ योनौ[१२] रेत: संभवति ॥ ६ ॥ यजमानस्तꣳ शृतमुद्वासयति, तदु हैव यजमान: पुनर्जायते; एतद्ध वै पुनर्जनित्रं नामामान्वाख्यानम्[१३] ॥ ७ ॥ तमुद्वास्य [१४][यथा हैवैतत् पुमाꣳ]सं जातꣳ [१५][स्नपयि]त्वाऽलङ्कुर्वन्ति तादृक् तत् ॥ ८ ॥ तमन्तर्वेद्यासादयति, यथा हैवैतत्[१६] पुमाꣳसं जातꣳ स्नपयित्वाऽलङ्कृतमुपबर्हणे संवेशयेत् तादृक् तत्[१७] ॥ ९ ॥ स उ ह वा एष एव यजमानो यदाग्नेयोऽष्टाकपाल:, सुवर्गो लोक आहवनीय:, तस्य यदवदा[नमादधाति][१८] सुवर्गे लोक आहवनीय आदधाति, तस्यैतच्छरीरमेव धौतꣳ सम्परिशिष्यते यद्धविरुच्छिष्टम् ; तन्नु हैतदेक एतयोरिष्ट्योर्हविरुच्छिष्टं[१९] न प्राश्नन्ति, यजमानस्य वा एतच्छरीरमश्यत्त इति वदन्त: ॥ १० ॥ तदु होवाच वाधूलो- य एनꣳ [हविसा][२०]दधते य एनं छन्द:पवित्रै: पवयन्त्यन्यमु वा एतद्धविरुच्छिष्टं, तस्मादु काममेव हविरुच्छिष्टं प्राश्नीयादिति ॥ ११ ॥ [१६] [इति दशमोऽनुवाक:]

१. AO IV.14:15.22 om. इदम्. २. AO IV.14:15.23: प्रवर्तयतीति ३. MH °हमृतुहा... मरियाद्त्तोत्त°, P ऋतुहामरियाद तोतरेण ; thus AO VI.14:15.24. ४. MHP हविषां; thus AO IV.14:15.24. ५. MP तदेत°; AO IV.14:15.24 : तदेव ६. MHP broken ; thus AO IV.15:16.7. ७. MHP हैव तत्°. ८. MHP स्त्रियं. ९. MHP broken. १०-१०. MHP तदु हैवे... इमा.. रेतो. ११. MHP तमेत.. ग्नौ. १२. MHP add नौ after योनौ. १३. MHP broken; thereafter एतद्ध वै पुनर्जनित्रंनाम repeated. १४. MHP broken. १५. MHP broken १६. MHP हैवतत्. १७. MHP तत् twice. १८. MHP broken. १९. MHP एतयोदिष्ट्याहविरु° ; thus AO IV..16:16.28. २०. MHP broken.

प्रजापतिर्हवै [१]रयिमिच्छन् पल्यायत[२]; ताः सवत्सां [३]धावमानामध्यगच्छत्; सवत्सां वा एनामविदमिति, [स संवत्सरोऽभवत्; परि वा एनां][४] वत्सोऽत्सरदिति, स परिवत्सरोऽभवत्; तां प्राघसत्[५], तां वत्सोऽन्वत्सरदनु वा एनां वत्सोऽत्सरदिति, स इदावत्सरोऽभवत्; इदं वा एनां वत्सिनीमविदमिति, स इद्वत्सरोऽभवत्; वत्सिनीं वा एनामविदमिति, स वत्सरोऽभवत्; तानि वा एता[६][नि सं]वत्सरस्य ना[७][मानि ॥ १ ॥ स प्रजापतिरेकधोर्जः समवृञ्जत][७], तस्यै हैतस्यै[८] तुरीयं मनुष्येभ्यः प्रायच्छत् तुरीयं पितृभ्यस्तुरीयं देवेभ्यस्तुरीयमसुरेभ्यः; ते देवा अमन्यन्त कथेमामेकधोर्जः संवृञ्जीमहीति; तेऽग्नीनादधत; ते यद् गार्हपत्यमादधत, यैव[९] मनुष्येषूर्गासीत् तां तेनावरुन्धत[१०]; अथ यदन्वाहार्यपचनमादधत, यैव पितृषूर्गासीत् तां तेनावरुन्धत; अथ यदाहवनीयमादधत, यैव देवेषूर्गासीत् तां तेनावरुन्धत; अथ यद्दक्षिणामनयन् यैवासुरेषूर्गासीत्[११] तां तयाऽवरुन्धत; एवं नु हैतां देवा एकधोर्जः समवृञ्जत॥ २॥ तदाहुः-कथेमां यजमान एकधोर्जः संवृङ्क्त इति; स यद् गार्हपत्यमाधत्ते॥ ३॥ [१७]

स यद् गार्हपत्यमाधत्ते यैव [१२]मनुष्येषूर्क् तां[१२] तेनावरुन्धे; अथ यदन्वाहार्यपचनमाधत्ते यैव [१३]पितृषूर्क् तां[१३] तेनावरुन्धे; अथ यदाहवनीयमाधत्ते यैव [१४]देवेषूर्क् तां[१४] तेनावरुन्धे; अथ यद्दक्षिणां ददाति [१५]यैवासुरेषूर्क् तां[१५] तयाऽवरुन्धे; तस्मादेवंविदुषाऽग्नीनादधानेन[१६] श्रद्दधानेन [१७]दक्षिणा देया; एवः[१७] ह्येवैतां यजत एकधोर्जः संवृङ्क्ते॥ १॥ तस्मादाहुर्यश्चैवं वेद यश्च न गा रक्षमाणमददतमसुरं[१८], निधिर्ह्येवैष योऽददद् गा रक्षते॥ २॥ [१८] [इत्येकादशोऽनुवाकः]

एकोतेः[१९] स्वर्गकामस्याग्न्याधेयम्। अधिवृक्षसूर्ये ब्रह्मौदनं निर्वपति; स एतः संवत्सरः शल्कैरग्निमिन्धे॥ १॥ [२०]स ततः[२०] संवत्सरतम्यां रात्र्यामग्नीनाधत्ते; स एतं द्वितीयः संवत्सरमग्निहोत्रोच्छिष्टव्रतो भवति॥ २॥ स ततः संवत्सरतम्याः रात्र्यामाग्नेयमष्टाकपालं निर्वपति, स एतं तृतीयः संवत्सरमिडोच्छेषणव्रतो भवति; सोऽत्रैवान्तरेणाग्नीनिडोच्छेषणं प्राश्नाति; तस्याप्रवसत[२१] एव स्थितोऽग्नि-

१. AO IV.17 :17.7 : श्रियम् for रयिम्. २. MHP वल्यवत; thus AO ibid. ३. MHP धापयमा°; thus AO IV.17:17.8. ४. MHP broken. ५. MHP प्रासधत्. ६. MHP broken. ७. MHP broken; AO IV.17:17.13 fills the gap by supplying मानि after ना [Mनाल]. ८. MHP तस्यै. ९. MHP तयैव. १०. MHP °रुन्धेत. ११. MHP °सुरोर्गासीत्. १२-१२. MH °षूर्त्तान्, P °षूर्तान्. १३-१३. MH °षूर्त्तान्, P °षूत्तान्. १४-१४. MH °षूर्त्तान्, P षूत्तान्. १५-१५. MH °षूर्त्तान्, P °षूत्तान्. १६. MHP °नाधानेन. १७-१७. P दक्षिण धेयैव°. १८. MHP °माददतम°. १९. MHP एकाते. २०-२०. MHP सुरतं. २१. MHP °प्रसवत.

योऽधि॥ ३॥ स यदि प्रवसथमेष्यन्[१] स्याद् ब्राह्मणायौदनं[२] पक्त्वा [३]तेन ब्राह्मणं परिविष्य **'अग्नीन् गोपायत'** इत्युक्त्वा[३] यज्ञोपवीतं कृत्वाऽप आचम्य यजमानायतने तिष्ठन्नाहवनीयमुपतिष्ठते **'मम नाम प्रथमं जातवेदः'** इति॥ ४॥ प्रोष्य गृहानुपावर्तते; प्रपथात्समिधं कुरुते; अग्नीन्[४] परा[ख्याय][५] वाचं यच्छति; स यदा वै वाचं यच्छतीति समानम्॥ ५॥ स यज्ञोपवीतं कृत्वाऽप आचम्य यजमानायतने तिष्ठन्नाहवनीयेन वि[६] परिधत्ते **'मम नाम तव च जातवेदः'** इति॥ ६॥ तदेतदेकोतेः स्वर्गकामस्याग्न्याधेयम्; संवत्सरः हैतेन[७] पुरुषवाचो भूत्वाऽग्नयो मन्त्रयन्ते; एतेन प्रणाय्योऽग्नीनाधत्ते॥ ७॥ [१९] [इति द्वादशोऽनुवाकः]

॥ इत्यग्न्याधेयान्वाख्यानं समाप्तम्॥[८]

॥ इति प्रथमः प्रपाठकः॥

१. M प्रसवथमे°, HP प्रवथमे°; thus AO IV.18:18.30. २. AO IV.18:19.1:ब्रह्मौदनं. ३. MHP twice. ४. MHP अग्नीत्. ५. MHP broken. ६. MHP om ; thus AO IV.18:19.7. ७. MHP add न after हैतेन. ८. MHP इति "दशमोऽनुवाकः" अग्न्याधेयी समाप्ता.

अथ द्वितीयः प्रपाठकः

[अथाग्निहोत्रान्वाख्यानम्]

इदं वा अन्वाहुः- प्रजापतिर्वा इदमेक आसीत्, सो(ऽकामयत प्रजाः पशून्त्सृजेयेति; स आत्मनो वपामुदखिदत्, तामग्नौ प्रागृह्णात्; ततोऽजस्तूपर समभवत्, तꣳ स्वायै देवताया)[१] आलभत, ततो वा अग्निमुखाः प्रजापतिः प्रजा असृजतेति ॥ १ ॥ स उ ह वा एष एव मृत्युर्यदग्निः; स प्रजापतिमत्स्यतो रूपेणा-[न्वागच्छत्, तम][२]भिपलायत; तस्मा उदश्राट्; तस्माल्ललाटे केशा न सन्ति तस्माद्यस्य दक्षिणत उन्मृष्टं भवति तमाहुः- प्राजापत्यं ज्येष्ठलक्ष्मीमिति वा इदम् ॥ २ ॥ तं[३] द्वितीयमभ्येव पलायत, [४]तमन्वागच्छत्, तदस्मै[५] न्यस्यत् [६]तान्युलपान्यभवन् तान्याद्रवन्नादत्त; तस्माद्यत्रैवा[७]तपत्युलपकक्षं दहत्याद्रवन्नेवैनदादत्ते ॥ ३ ॥ तं तृतीयमभ्येव पलायत, तमन्वागच्छत्[८], तदस्मै न्यस्यत्, त वनस्पतयोऽभवꣳस्तेषु [९]विरतामिवारमत, सा ह वा एषा देवता तद्विरतैवाप्य वनस्पतिषु; तस्मादेवंविदुषाऽग्नौ दार्वभ्याधेयं मुहूर्तं चेन्नु मन्मृत्युर्विरमतादिति; हैवास्माद्रमते[१०] मृत्युर्य एवंविद्वानग्नौ दार्वभ्यादधाति ॥ ४ ॥ स यां [११]पूर्वामाहुति जुहोति [द्यौस्तृतीयं][१२] पृथिवी तृतीयमन्तरिक्षं तृतीयं, ता उ ह वा एता आहुत एवेमे लोकाः; स यो ह वा एवंविदं जुह्वतꣳ स्कन्ने[१३]ऽग्निहोत्र उप वा मीमाꣳसेत वा व्याहरेत्तं ब्रूयादाहुत्यां म आहुतिः प्रत्यस्थाद, यं [१४]नु त्वं[१४] पाप्मानं पश्य त्वामेव सोऽरि[ष्यतीत्ये][१५]नं ब्रूयात् ॥ ५ ॥ तन्नु हैतदेके स्कन्नेऽग्निहोत्रे बिभ्यति; ह वै तदेवंविदाद्रियेतापि[१६] ह प्रायश्चित्तं कर्तुं नाद्रियेत; चतुर्गृहीतं

१. MHP abr. as सो = आलभत; cf TS II.1.1.7. २. MHP om ; thus AO IV. 19 : 20.1-2. ३. MP तद्वि°; H तद् द्विती°. ४. P तदन्वग°. ५. MHP तस्मै; thus AO IV. 19 : 20.5. ६. MHP °लवान्य°. ७. MHP °द्यत्र वा°; thus AO IV. 19 : 20.6. ८. P तदन्वा° ९. MHP वितरामि°. १०. HP °स्माद्रवते, AO IV. 19 : 20.11 : हैवास्मै रम°. ११. पूर्णामा°. १२. MHP broken. १३. MHP स्तन्ने°. १४-१४. MHP क्रत्वं ; thus AO IV. 19 : 20.14. १५. MHP broken ; thus AO IV. 19 : 20.15. १६. MHP °तावि.

[१]हाभिगृह्णीयाद्धोमाय ॥ ६ ॥ अथ [२]यामुत्तरामाहुतिमजुहोत्तामब्रवीत्[२] क्वैतामहौषीर्वा[३]गित्यब्रवीत्[३]; सा गौर[भ]वत्[४], तद्वा एतत् पराकं गोर्नाम (यद्)[५] गौरिति; साऽऽहुतिर्गौः संभूय पुरस्तात्प्रतीच्याहवनीयमुल्लिहत्यतिष्ठत् ; तामाहवनीय ऋषभो रूपं कृत्वोपपरैत्[६]; तस्यामेताꣳश्चतुरो यज्ञक्रतून् रेतोऽसिञ्चदग्निष्टोममुक्थ्यमतिरात्रमप्तोर्यामम् ; त उ ह वा एते गोरेव[७] चत्वारः स्तनाः ॥ ७ ॥ [१]

त उ ह [८](वा एते गोरेव चत्वारः) स्तनाः; सायंप्रातर्ह वा एतैश्चतुर्भिर्यज्ञक्रतुभिरग्निहोत्र्यधिक्रमते; तस्मान्नु ह सर्वेषामेव स्तनानामग्निहोत्रं दुह्यात्; सायंप्रातर्हैवास्यैतैश्चतुर्भिर्यज्ञक्रतुभिरिष्टं भवति य एवंविद्वानग्निहोत्रं जुहोति, यस्य वैवंविद्वानग्निहोत्रं जुहोति ॥ १ ॥ तद्वा इदमन्वाहुर्- इयं वा अग्निहोत्रीयं वा एतस्य निषीदति यस्याग्निहोत्री निषीदतीति[९]; स[१०] यस्याग्निहोत्र्युपसृष्टा निषीदेत्तद्विद्याच्छ्रेयान्भविष्यामि[११], यज्ञो मोपानंसीद्यज्ञक्रतून्मे [१२]धारयन्त्यग्निहोत्र्युपाविक्षदिति तच्छ्रेयानेव भवति, यज्ञ उ [१३]हैवैनमुपनमति ॥ २ ॥ तद्वा एतत् प्रजापतिरेवमग्निहोत्रमजुहोत् , तेनार्ध्नोत्, तेन सर्वाणि भूतान्यतर्पयत्सर्वा व्याप्तीर्व्याप्नोदभि सुवर्गं लोकमजयत् ॥ ३ ॥ तत्प्रजापतिः सुवर्यन् पुत्रेभ्यो देवेभ्यः प्रायच्छत्; तद्देवा अजुहवुस्तेन[१४] सर्वाणि भूतान्यतर्पयन् सर्वा व्याप्तीर्व्याप्नुवन्नभि सुवर्गं लोकमजयन् ॥ ४ ॥ तदृषयः सुवर्यन्तः पुत्रेभ्यो ब्राह्मणेभ्यः प्रायच्छन्[१५]; तद्वा एतद् ब्राह्मणा एवमग्निहोत्रमुपासते; स य एवंविद्वानग्नि(होत्रं)[१६] जुहोत्यृ[ध्नो][१७]त्येव, सर्वाणि भूतानि तर्पयति[१८], सर्वा व्याप्तीर्व्याप्नोत्यभि सुवर्गं लोकं जयति ॥ ५ ॥ [२]
[इति प्रथमोऽनुवाकः]

प्रजापतिर्यं प्रथमꣳ स्रुवमुदनयत्तेन[१९] [२०]त्रीꣳश्च मासः[२०] संवत्सरस्योदनयतुरीयं[२१] चात्मनो[२२]ऽग्निं देवतानाम्[२२] ॥ १ ॥ अथ यं द्वितीयमुदनयत्तेन त्रीꣳश्चैव

१. MHP हादिगृ°. २-२. P मामु° ; P °होत्तमब्र°, M °मब्रीत्. ३. MHP °हौषधी...पादित्य°; cf. T.B. II.1.2.3. ४. MHP गौरवत्. ५. MHP om. ६. MHP कृत्वोपरैत्; thus AO IV. 19:20.21. ७. MH गौरव; P गोरवश्. ८. MHP abr. as त उ ह = स्तना. 9. MHP निषीदति ; thus AO IV. 20 : 22.14. १०. AO IV.20:22.14 om. ११. MHP °च्छ्र्याद्भवि° [H °ष्यति]. १२. P °यत्यग्नि° MHP °त्र्युपविक्ष°. १३. P हवैनैन°. १४. MHP अजुहस्तेन. १५. MHP °च्छत्. १६. MHP abr. १७. MHP broken. १८. P. om. १९. MHP °नयन्तेन. २०-२०. MHP त्रीꣳ चमसास्. २१. MHP °यत्तुरीञ्व. २२-२२. MHP °ग्नीन्देव° [P तानम्].

मासः[१] संवत्सरस्योदनयत्तुरीयं चात्मनो वायुं देवतानाम्॥ २॥ अथ यं तृतीयमुदनयत्तेन[२] त्रींश्चैव मासः संवत्सरस्योदनयत्तुरीयं चात्मन आदित्यं देवतानाम्॥ ३॥ अथ यं चतुर्थमुदनयत्तेन त्रींश्चैव मासः संवत्सरस्योदनयत्तुरीयं चात्मनश्चन्द्रमसं देवतानाम्॥ ४॥ तेनैव संभृतेनात्मना संवत्सरेणैतेनाग्निहोत्रेणैताभिर्व्याहृतीभिः सद्यः सुवर्गं लोकमजयत् प्रजापतिः; स य एवंविद्वा(नग्निहोत्रं)[३] जुहोत्येवं संभृतेनैवात्मना[४] संवत्सरेणैतेनाग्निहोत्रेणैताभिर्व्याहृतीभिः सद्यः सुवर्गं लोकं जयति॥ ५॥ तदाहुरित्थंविदो योऽर्वागेकाहुत्यै[५] प्रैति क एनमारिष्यद्[६] यदेकामाहुतिं प्राप्स्यत् प्रथमयैवाहुत्या[७] सद्यः सुवर्गं लोकमजयिष्यदिति; स य एवं विद्वानग्निहोत्रं जुहोति य(स्य वैवंविद्वानग्निहोत्रं)[८] जुहोति प्रथमयैवाहुत्या[९] सुवर्गं[९] लोकं जयति॥ ६॥ अथैतामाहुतिं[१०] प्रत्यवेक्षते॥ ७॥ [३]

अथै[११](तामाहुतिं प्रत्यवे)क्षते यैषा गार्हपत्ये हूयते; तां जुहोति **'अग्नये गृहपतये स्वाहामुमादित्यं देवतानाम्'** इति ; एष वै स त्रयोदशो[१२] मासः, स[१३] यस्यैषा हूयते स एव प्रत्यवेक्षेताथ यस्यैषा न हूयेत स न[१४] प्रत्यवेक्षेत॥ १॥ अस्तमु ह वा एषा देव[ता यजमानस्य मार][१५]यति, यत्प्राणवद् गार्हपत्ये जुह्वतो यजमान[स्य मारयति, त][१६]स्मादेवंवित् प्रा[णवद्][१७] गार्हपत्ये जुह्वतो यजमानस्य [१८]न मारयेद्, य एनं[१८] मारयेद् यथा बलीयानुपस्थान्निष्कृष्य[१९] हन्यादेवमेनमेषा देवता तत्र करोति॥ २॥ तस्मादु हैव सर्वाणि ह वै भूतानि सायं ग्रामं संप्रेरते यद्रक्षांसि यत्पिशाचाः; त[स्मादेवंवित् जु][२०]ह्वद् देवताया उपस्थे भवति; तस्मादेवंवित्सायमन्तर्ग्रामे प्रवादो न स्यात् , कामं तु हारण्येऽरण्यं हि तदा शान्तं भवति॥ ३। सर्वाणि ह वै भूतानि सायं वहन्तीरपः समभ्यवयन्ति[२१] यद्रक्षांसि यत्पिशाचाः ; [२२]तस्मादेवं[विद् वहन्तीरपो न समभ्यवे][२२]यात् ; कामं तु ह स्थावराणां वा परिगृहीतानां वा ॥ ४॥ [४] [इति द्वितीयोऽनुवाकः]

सप्तसु ह वा एष भूतेष्वस्तमेति यदसावादित्योऽग्नौ पृथिव्यां पशुष्वप्स्वोषधीषु[२३] वनस्पतिषु ब्राह्मणे॥ १॥ तदाहुः- कथमेनमतः सम्भरतीति; स

१. MHP मास्. २. MHP °मुदहयत्. ३. MHP abr. ४. MHP °भृतेनेवात्मा° [H °त्म]. ५. MP ; हुत्या ; H हुत्वा; thus AO IV.22:23.16. ६. MHP °माकरिष्यद् ; thus AO IV.22:23.16. ७. MHP प्रथमैवा°. ८. MHP abr. ९. H twice. १०. MHP अथैकामा°; thus AO IV.23.24.1. ११. MHP abr. १२. MHP °दशमो. १३. P om. १४. MHP, AO IV.23.24.5 om. १५. MHP broken. १६. MHP broken. १७. MHP broken. १८-१८. P om. १९. P बलीयान्निष्कृष्य. २०. MHP broken ; MHP °हत द्दे°. २१. MHP °भ्यववयन्ति. २२-२२. MHP °देव...मेतत्. २३. MP °ष्वप्सोष°.

यदङ्गारान्निरुह्य [१][गृह्णाति तदु हैवैनमग्नेरधि संभरति; अथ यदधि]श्रयति[२] तदु[३] हैवैनं पृथिव्या अधि संभरति; अथ यद् गां दुहन्ति तदु हैवैनं पशुभ्योऽधि संभरति; अथ यदपः प्रत्यानयति तदु हैवैनमद्भ्योऽधि संभरति; अथ यदोषधीभिरभिद्योतयति तदु हैवैनमोषधीभ्यो[ऽधि संभरति; अथ यत्समिधावभ्यादधाति तदु हैवैनं][४] वनस्पतिभ्योऽधि संभरति; अथ यद् ब्राह्मणो जुहोति तदु हैवैनं ब्रह्मणोऽधि संभरति; एवं नु हैनमतः संभरति॥ २॥ तानि वा एतानि सप्त बद्धानि[५] भवन्त्यग्निर्बद्धं पृथिवी बद्धं पशवो बद्धमापो बद्धमोषधयो बद्धं वनस्पतयो बद्धं ब्राह्मणो बद्धमिति॥ ३॥ सायंप्रातर्ह वै सप्तानां बद्धयाजिनां लोकं जयति य एवं विद्वानग्निहोत्रं जुहोति यस्यैवं विद्वानग्निहोत्रं जुहोति॥ ४॥ [५] [इति तृतीयोऽनुवाकः]

अन्तर्ज्योतिर्ह वा अन्यदग्निहोत्रं बहिर्ज्योतिरन्यत् ; तन्नु ह सायं जुहुयाद् **'अग्निर्ज्योतिर्ज्योतिरग्निः[६] स्वाहा'** इति, तदेतदन्तर्ज्योतिरग्निहोत्रम्; तस्मान्नु ह सर्वाणि भूतानि समस्य पक्षौ वि[७] रात्रिं नयन्ति, पक्षौ हि ज्योतिः ॥ १॥ अथ ह प्रातर्जुहुयात् **'ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा'** इति, तदेतद् [८]बहिर्ज्योतिरग्निहोत्रम् ; तस्मान्नु ह सर्वाणि भूतान्युदीरणान्येव प्रसार्य [९]पक्षावतिचरन्ति, पक्षौ हि ज्योतिः॥ २॥ तदाहुः- किंपवित्र एष यज्ञक्रतुरिति; स यदपः प्रत्यानीयौषधीभिरभिद्योतयत्येतत् पवित्रो हैष यज्ञक्रतुः ॥ ३॥ तदाहुः- क एतस्य यज्ञक्रतोरवभृथ इति; स यदन्तर्वेदि तृचेन मार्जयते **'आपो हि ष्ठा मयोभुवः'** इत्येष हैवास्य यज्ञक्रतोरवभृथः॥ ४॥ तदाहुः - क एतस्य यज्ञक्रतोर्यूप इति, [१०]यजमान इति[१०] ह ब्रूयाद्; यजमानो[११] ह वावैतस्य यज्ञक्रतोर्यूपः ॥ ५॥ स यद्यग्निहोत्रं होष्यन्दक्षिणत आहवनीयस्योपविशति तदेवासीताहोमात् सायमाऽऽदित्यस्योदयात् प्रातरादित्यो हैव ततः सर्वाह्णं यूपो भवति॥ ६॥ [६] [इति चतुर्थोऽनुवाकः]

अहोरात्रयोर्ह वा एतद्रूपं यदग्निहोत्रम्; तन्नु हैतदेकेऽह्न एव रूपे सायमाहुतिं जुह्वत्यह्न[१२] एव प्रातराहुतिं, [१३]तदु हैतदे[के]षाम्[१३]; अथ हैके[१४] रात्रिया एव रूपे सायमाहुतिं जुह्वति रात्रियै रूपे प्रातराहुतिं, तदु[१५] हैतदेवमेकेषाम्॥ १॥ अथ

१. MHP broken. २. MHP भवति. ३. MHP तं मु ; thus AO IV.24:24.17. ४, MHP broken ; thus AO IV.24:24.20-21. ५. H बद्धानि. ६. MHP ज्योतिर् once. ७. MHP हि ; thus AO IV. 25:25.16. ८. MH बर्हिर्ज्यो° ; P बर्हिज्यो° ; thus AO IV.25:25.17. 9. MHP पक्षावहि° ; thus AO IV. 25:25.18. १०-१०. MHP om; thus AO.IV.25:25.24. ११. MHP °माना. १२. MHP अह्नोरेव. १३-१३. MHP तज्जुहैतदेपाम् [P °जुहै°] ; thus AO IV.26:26:26. १४. हैते. १५. MHP तद्दु.

हेत्थंविद आहु:- पाप्मा वा एष यत्तमः; स पुरैतस्मात् पाप्मन[१] आगन्तो:[२] सायमाहुतिं जुहुयाद् '**अपामृक्षंद्**' इति प्रातः; वि पाप्मा ह भवत्यस्मिंश्च लोकेऽमुष्मिंश्च य एवं वेद ॥ २ ॥ तद् वा इदमन्वाहु:- प्रजापतेर्विभान्नाम [३](लोकस्तस्मिंस्त्वा दधामि सह यज)मानेन इति। तदाहु:- कतमः स प्रजापतेर्विभान्नाम लोक इति; अन्वस्तमित[४] आदित्ये सायमाहुतिं जुह्वति, पुरोदेतोरिति प्रातः; एष वै स प्रजापतेर्विभान्नाम लोकः; [५]एतं ह वै तं प्रजापतेर्विभान्तं नाम[५] लोकं जयति य एवंविद्वानग्नि(होत्रं जुहोति यस्यैवं-विद्वानग्निहोत्रं)[६] जुहोति ॥ ३ ॥ संश्लिष्टस्यो वा एतद्रूपं यदग्निहोत्रं संश्लिष्टस्यैतद्रूपं यत्प्रजायै पशूनामिति ॥ ४ ॥ स उ ह वा एष एव मृत्युर्यदहोरात्रे; ते[७] एतामेव देवतां नाप्नुतो यदादित्यं, व्यवहार[८]ं ह्येवैनयोरेषा देवता उदेति [९]व्यवहारमन्वस्तमेति, नो ह वा [१०]एवंविदं जुह्वतं[१०] मृत्युराप्नोति ॥ ५ ॥ तस्यै वा एतस्यै देवताया अत्रैव पूर्वयज्ञं परीप्सन् सह शीततरेणैव [११]सायमाहुतिं जुहुयात्, तप्तेव ह्येषा देवता पतित्वैवास्तमेति; तप्ततरेणैव[११] प्रातः, शीतेव ह्येषा देवता अशित्वैवोदेति[१२] ॥ ६ ॥ तद्वा इदमन्वाहु:- प्रजापतिः प्रजा असृजत; ताः सृष्ट्य अहोरात्रे आदधातामिति; स ऐक्षत प्रजापतिः [१३]सृजै न्वा[१३] अनु प्रजाः, कस्तु म ऐ[क्षत][१४] स ऐ[क्षत][१५] इति; मसामित्वेति[१६] स्रवन्तीं परिददर्श; स ऐक्षतेयं[१७] वै नु किल म इमा आदत्त इति; स प्रजापतिस्तिर इव भूत्वा समिदवचक्रमे, स प्रातराहुत्यैवाहरन्नं चक्रे, सायमाहुत्या रात्रिमन्नं[१८] चक्रे; तस्याहोरात्रे अन्नमक्षिति-रास्तुः; स य एवंविद्वानग्निहोत्रं जुहोति यस्य वैवंविद्वानग्निहोत्रं जुहोति, प्रातराहुत्यैवाहरन्नं कुरुते, सायमाहुत्या रात्रिमन्नं कुरुते; तस्याहोरात्रे अन्नमक्षितिर्भवतः ॥ ७ ॥ तदाहु:- किमेतद्यत् समिदिति; आहुतिर्वा एषा यत्समित्; स यत्समिधमादधाति ये[१९] हैवास्य पुरा जनितोरहोरात्रा अहुता भवन्ति, ते हैवास्य तया हुता भवन्ति ॥ ८ ॥ अथ यत् पूर्वामाहुतिं जुहोति ये हैवास्यास्मिन्[२०] लोकेऽनाहिताग्नेः सतोऽहोरात्रा अहुता भवन्ति ते हैवास्य तया हुता भवन्ति ॥ ९ ॥ अथ यदुत्तरामाहुतिं जुहोति ये [२१]हैवास्यास्माल्लोकात् प्रेतस्याहोरात्रा अहुता

१. MHP पाप्मान. २. MHP आगन्ते... ३. MHP abr. cf TS I. 6.5.2. ४. MHP °त्यन्वगस्तं; thus AO IV. 27 : 27.10. ५-५. P om ; MH एकं for एतं. ६. MHP abr. ७. MHP om ; thus AO IV. 27 : 27.15. ८. MHP. व्याहरं° ; thus AO IV. 27 : 27.16. ९. MHP व्यावार°. १०-१०. MHP °विद जुह्वत ; thus AO IV. 27 : 27.17. ११-११. H repeated; MHP पतित्वेवा. १२. MH अशित्वोवोदेति ; P अशित्वोवेदेति ; thus AO IV. 28 : 28.6. १३-१३. MHP. सृजेन्वा. १४. MHP broken. १५. MHP broken. १६. MHP म समित्केति ; thus AO IV. 29:28.20. we may conjecture the reading as पश्यामि त्वेति. १७. P ऐक्षतेऽयं. १८. MHP रात्रिमनं. १9. MHP यै. २०. P हैवास्मिन्. २१. P हैवास्माँल्लो°.

भवन्ति, ते हैवास्य तया हुता भवन्ति; एवं नु हास्य सर्व एवाहोरात्रा हुता भवन्ति ॥ १० ॥ तदाहुर्- आदीप्तायां जुहुयात् ॥ ११ ॥[७]

तदाहुर्- आदीप्तायां जुहुयादादीप्तमिव हि ब्रह्मवर्चसमिति; स उ ह वा एष प्लव एव यत्समित्, स यदादीप्तायां[१] जुहुयाद्यथा हैव तत् प्लवमुदकेनाप्तमारोहेत् स एनेन पर्याभवेत्तादृक् तत्[२]; तां पुरा दीप्तोरिति परीप्सोर्यथा हैव तत् प्लवमुदकेन नाप्तमारोहेत् [३]सैतदेनं स्वस्त्येव गमयेत्तादृक् तत् ॥ १ ॥ [४]स उ[४] ह वा एष एव मृत्युर्यदग्निः, स यज्ज्वलति जुहुयान्मृत्योर्मुखे पूर्वामाहुतिं जुहुयान्मृत्योर्मुख उत्तरां, स यत्रैव बहुरूपा इवाङ्गाराः स्युस्तत्समिधमाधाय कनीयो हुत्वा भूयो जुहुयान्मृत्यु-मेव पूर्वयाऽऽहुत्या शमयित्वा सुवर्गं लोकमुत्तरयाऽधिक्रामति ॥ २ ॥ तदाहुर्- अग्निहोत्रस्य स्थाणुर्वेदितव्य इति; मृत्युर्ह वा अग्निहोत्रस्य स्थाणुः; स यत्पूर्वामाहुतिमभिजुहुयादग्निहोत्रस्य [५]स्थाणुमृच्छेदतिहाय पूर्वामाहुतिं जुहोत्यग्निहोत्रस्यैव[५क] स्थाणुं परिवृणक्ति ॥ ३ ॥ तदाहु:- किंदक्षिणमेतद्यदग्निहोत्रमिति; सपक्वं ह वा अग्निहोत्रस्य दक्षिणा, यदहः[६] पचति सा प्रातराहुत्यै दक्षिणा यद्रात्रिं पचति सा सायमाहुत्यै ॥ ४ ॥ तद्वा एतदेवं न वेदितव्यं, पक्वं ह वा अग्निहोत्रम्; उपस्तरणाभिघारो ह वा [७]एषोऽग्निहोत्रस्य यदेते चत्वारः स्रुवा उन्नीयन्ते; यदहः[८] पचति तदग्निहोत्रं स उत्तरामेवाहुतिमुपस्तृणीते, पूर्वया सायमाहुत्याऽभिघारयति; यद्रात्रिं पचति तदग्निहोत्रं स उत्तरामेव सायमाहुतिमुपस्तृणीते पूर्वया प्रातराहुत्याऽभिघारयति; उत्तरामेवोपस्तृणीते पूर्वयाऽभिघारयति, तद्वा एतदुपस्तीर्णाभिघारितमग्निहोत्रम् ॥ ५ ॥ कामं तु हैवंविदुषोऽग्निषु क्षीरमा च सिञ्चेद् यदा कदा च स्म यन्तु हाव च नेजयेदुप च निदध्याद्यथा हैव तत्स्वयंहुतमग्निहोत्रं भवति तादृक् तत् [९] ॥ ६ ॥ तदाहु:- किंदक्षिणमेवैतद्य[१०]दग्निहोत्रमिति; आत्मदक्षिणं ह वा एतद्यदग्निहोत्रं, यदहरायुरेति सा प्रातराहुत्यै दक्षिणा, यद्रात्रिमायुरेति सा सायमाहुत्यै; स ह नीतिशरीरो[११] विपाप्मा[११] सर्वाङ्ग [१२]आत्मन्वानग्निहोत्रं हुतममुष्मिँल्लोके संभवन् संभवति ॥ ७ ॥ तस्य का गतिः का प्रतिष्ठेति; [१३]तदाहु:- सत्यं चैव गतिः[१४] श्रद्धा

१. P यदीदिप्ता°. २. P om. ३. P तदेनं. ४-४. AO IV. 32 : 30.7 : तदु. ५. MHP स्थाणुमच्छे° ; thus AO IV. 33 : 30.23. ५क. AO **ibid** om एव. ६. MHP यदहत. ७. MHP एषाग्नि°. ८. MHP यदहं. ९. MHP om. १०. MHP °तद्यग्निं°. ११-११. MP शरीरोऽपिपा° ; H °शरीरोपि. १२. MHP आत्मन्वग्नि° ; thus AO IV. 35 : 31.16. १३. MHP तान्याह; thus AO IV 36 : 31.26. १४. P प्रति. १५. MHP om. १६. MHP broken. १७. MHP broken.

च[१५] प्रति[ष्ठेति, स][१६] नु ह [सत्यं][१७] च वदति श्र[च्चैव][१] धत्ते; तस्य नु हैतदेवं भवति यथैतदन्वाख्यानेन; अथ योऽनृतं[२] च वदति [न च][३] श्रद्धत्ते, नो [४]हैवास्यैतदेवं भवति यथैतदन्वाख्यानेन; तस्मान्नु ह सत्यं चैव विवदिषेच्छ्रच्च दधीत[५] ॥८ ॥ इदं वा अन्वाहू- रौद्रं गवि वायव्यमुपसृष्ट[६](माश्विनं दुह्यमानं सौम्यं दुग्धं वारुणमधिश्रितं वैश्वदेवा भिन्दवः पौष्णमुदन्तꣳ सारस्वतं विष्यन्दमानं मैत्रꣳ शरो धातुरुद्वासितं बृहस्पतेरुन्नीतꣳ सवितुः प्रक्रान्तं द्यावापृथिव्यꣳ ह्रियमाणमैन्द्राग्नमुपसन्नमग्नेः पूर्वाहुतिः प्रजापतेरुत्त)रैन्द्रꣳ हुतमिति; तद्वा एतत्सप्तदशमग्निहोत्रꣳ सप्तदशो वै वाजपेयस्तस्य[७] सप्तदश[८] स्तोत्राणि; स य एवंविद्वानग्निहोत्रं जुहोति [९]यस्य वैवं[९]विद्वानग्निहोत्रं [जुहो][१०]ति [उभावेव लोकावभि][११]जयति यश्चाग्निहोत्रहुतो यश्च वाजपेययाजिनः; अथ य एवंविद्वान् वाजपेयेन यजत उभावेव लोकावभिजयति यश्च वाजपेययाजिनो यश्चाग्नि-होत्रहुतः ॥९ ॥[८] [इति पञ्चमोऽनुवाकः]

[१२][तदाहुर्- यां प्रथमामाहुतिं जुहोति किं तया ज]यतीति, वाचꣳ हैव तया जयति ॥ १ ॥ अथ यां द्वितीयां जुहोति प्राणापानौ हैव तया जयति ॥ २ ॥ अथ यां तृतीयां जुहोतीमान् हैव तया लोकान् जयति ॥ ३ ॥ अथ यां चतुर्थीं जुहोति चतुष्पादो हैव तया पशू[न् जयति ॥ ४ ॥ अथ यां पञ्चमीं जुहोति पञ्चपदां][१३] हैव[१४] तया पङ्क्तिं छन्दसां जयति ॥ ५ ॥ अथ याꣳ षष्ठीं जुहोत्यृतून्[१५] हैव तया जयति[१६] ॥ ६ ॥ अथ याꣳ सप्तमीं जुहोति सप्तपदाꣳ हैव तया शक्वरीं[१७] छन्दसां जयति ॥ ७ ॥ अथ [१८]यामष्टमीं जुहोत्यष्टाक्षराꣳ[१८] हैव तया गायत्रीं छन्दसां[१९] [जयति ॥ ८ ॥ अथ यां नवमीं][२०] जुहोति [२१][त्रिवृ]तꣳ हैव तया स्तोमानां जयति ॥ ९ ॥ अथ यां दशमीं जुहोति दशाक्षराꣳ हैव तया विराजं छन्दसां

१. MHP broken; thus AO IV. 36.31.27, २. MHP योर्नृतञ्. ३. MHP om. ४. MHP ह तस्यै. ५. MHP दधीतोतम् ए...ख्याने .... इदं. This text between दधीत and इदं seems to be repetition of तस्य नु हैतदेवं भवति यथैतदन्वाख्यानेन, as given above. ६. MHP abr as °सृष्ट = ऐन्द्रꣳ हुत; see TB II.1.7.1. ७. MHP °पेयस्य; thus Ao IV. 37 : 32.10. ८. MHP °दशानि. ९-९. AO IV. 37:32.11 : यस्यैवं. १०. MHP broken. ११. MHP om; thus AO IV.37:32.11. १२. MHP broken ; cf. TB. II.1.7. १३. MHP broken. १४. MHP देव. १५. MHP ऋतू. १६. MHP wrongly add अथ यां जयति after जयति. १७. MHP विराजं. १८-१८. MHP यामेकादशीञ्जुहोत्येका-दशाक्षरां for यामष्टमीं जुहोत्याष्टाक्षरां. १९. MHP छन्दस्तया. २०. MHP broken. २१. MHP om.

जयति ॥ १० ॥ अथ यामेकादशीं जुहोत्येकादशाक्षराꣳ हैव तया त्रिष्टुभं छन्दसां जयति ॥ ११ ॥ अथ यां[१] द्वादशीं[२] जुहोति द्वादशाक्षराꣳ हैव तया जगतीं छन्दसां जयति ॥ १२ ॥ अथ यां त्रयोदशीं जुहोति त्रयोदशꣳ[३] हैव तया स्तोमानां जयति ॥ १३ ॥ [४]अथ यां चतुर्दशीं जुहोति चतुर्दशꣳ हैव तया स्तोमानां जयति[४] ॥ १४ ॥ अथ यां पञ्चदशीं जुहोति पञ्चदशꣳ हैव तया स्तोमानां जयति ॥ १५ ॥ अथ यां षोडशीं जुहोति षोडशꣳ हैव तया स्तोमानां जयति ॥ १६ ॥ अथ यां सप्तदशीं जुहोति प्रजापतेर्हैव तया सायुज्यꣳ सलोकतां जयति ॥ १७ ॥ तदाहुरित्थंविदो योऽर्वाक्[५] सप्तदशाहुत्या प्रैति क एनमारिष्यद्, यत्सप्तदशीमाहुतिं प्राप्स्यत् सप्तदश्यैवाहुत्या प्रजापतेः सायुज्यꣳ सलोकतामजयिष्यदिति; स य एवं विद्वानग्नि[६](होत्रं जुहोति, यस्य वैवंविद्वानग्निहोत्रं) जुहोति सप्तदश्यैवाहुत्या प्रजापतेः सायुज्यꣳ सलोकतां जयति ॥ १८ ॥ [९] [इति षष्ठोऽनुवाकः]

तदाहुर्- यां प्रथमामाहुतिं जुहोतीति किं तया जयतीति, पृथिवीलोकꣳ हैव तथा जयत्यग्निं देवतानाम् ॥ १ ॥ अथ यां द्वितीयां जुहोत्यन्तरिक्षं लोकꣳ हैव तया जयति वायुं देवतानाम् ॥ २ ॥ अथ यां तृतीयां जुहोति दिविलोकꣳ हैव तया जयत्यादित्यं देवतानाम् ॥ ३ ॥ अथ यां[७] चतुर्थीं जुहोति प्राचीꣳ हैव तया दिशं जयति गायत्रीं छन्दसाम् ॥ ४ ॥ अथ यां पञ्चमीं जुहोति दक्षिणाꣳ हैव तया दिशं जयति त्रिष्टुभं छन्दसाम् ॥ ५ ॥ अथ याꣳ षष्ठीं जुहोति प्रतीचीꣳ हैव तया दिशं जयति जगतीं छन्दसाम् ॥ ६ ॥ अथ याꣳ सप्तमीं जुहोत्युदीचीꣳ हैव तया दिशं जयत्यनुष्टुभं छन्दसाम् ॥ ७ ॥ अथ यामष्टमीं जुहोत्यूर्ध्वाꣳ हैव तया दिशं जयति ॥ ८ ॥ अथ यां नवमीं जुहोति त्रिवृतꣳ हैव तया स्तोमानां जयति ॥ ९ ॥ अथ[८] यां दशमीं जुहोति प्रजापतेर्हैव तया सर्वतोभद्रं नाम लोकं जयति ॥ १० ॥ तदाहुः— कतमः स प्रजापतेः सर्वतोभद्रं नाम लोक इति; यतो ह वा एषा देवता विद्योतते, यतः स्तनयति यतो वर्षति ततो भद्रं जायते; एष ह वै स प्रजापतेः सर्वतोभद्रं नाम लोकः; एतꣳ ह वै तं प्रजापतेः सर्वतोभद्रं नाम लोकं जयति स य एवंविद्वान-ग्नि[९][होत्रं जुहोति यस्य वैवंविद्वानग्निहोत्रं] जुहोति ॥ ११ ॥ तदाहुरित्थंविदो योऽर्वाग् दशम्याहुत्या प्रैति क[१०] [११]एनमारिष्यद्, यद्दशमीमाहुतिं प्राप्स्यद्दशम्यैवा-हुत्या प्रजापतेः सर्वतोभद्रं नाम लोकमजयिष्यदिति; स य एवंविद्वानग्निहोत्रं जुहोति यस्य वैवंविद्वानग्निहोत्रं जुहोति[१२] दशम्यैवाहुत्या प्रजापतेः सर्वतोभद्रं नाम लोकं जयति ॥ १२ ॥ [१०] [इति सप्तमोऽनुवाकः]

१. MHP om. २. MHP द्वादशाञ्. ३. MHP °दशां. ४-४. H om. ५. MHP यार्वाक् ६. MHP abr. ७. MHP यं. ८. MHP om ; thus AO IV.38:33.5. ९. MHP abr. १०. MHP om. ११. MHP येनमारि०. १२. MHP om.

आरुणा उ[१] ह वै पूर्वे श्रोत्रिया ब्रह्मचर्यꣳ समूषिरे यत् कौषीतकिर्यद् वाजसनेयः; तान् हारुणिर्दिवा[२] शय्यायां पप्रच्छ किं व[३] एकोऽग्निहोत्रं वेद किमेकः किमेक इति ॥१॥ [अथ][४] हैक उवा[५][च मुख]मेवैतद् यत्समिदन्नस्यैतद्रूपं यदाहुतिः, स यत् समिधि पूर्वामाहुतिं जुहोत्यथोत्तरां यथा मुखेऽन्नमशितं धिनोति तद् भोगाय भवति तादृक् तत्; अथ यत्पार्श्वत उत्तरामाहुतिं जुहोति यथाऽक्षण्वा कर्णे वाऽनुषिञ्च्यात्तदेनꣳ हिꣳस्यात् तादृक् तत्[६]; तस्मान्नु हैते समीची एव होतव्ये इति ॥ २ ॥ अथ हैक उवाच योनिरेषा यत्समिद् रेतस एतद्रूपं यदाहुतिः, स यत् समिधि पूर्वामाहुतिं जुहोत्यथोत्तरां यथा योनौ रेतः सिक्तं प्रजायते तद् भोगाय भवति तादृक् तत्; अथ यत्पार्श्वत उत्तरामाहुतिं जुहोति यथा योनौ रेतः सिक्तं परासिच्येत तदमुयैव भवति तादृक् तत्[६]; तस्मान्नु हैते समीची एव होतव्ये इति ॥ ३ ॥ अथ हैक उवाच नौरेवैषा यत् समिद् यजमानस्यैतद्रूपं यदाहुतिः यत् समिधि पूर्वामाहुतिं जुहोत्यथोत्तरां यथा दक्षिणेन पदा नावमधिष्ठायाथोत्तरेणा-न्वारोहति[७] सैनꣳ स्वस्त्येव[८] गमयेत् तादृक् तत्; अथ यत्पार्श्वत उत्तरामाहुतिं जुहोति यथा दक्षिणेन पदा नावमधिष्ठायाथोत्तरेण विभ्रꣳशेत स एतेन[९] पर्याभवेत् तादृक्[१०] तत्[७]; तस्मान्नु हैते समीची एव होतव्ये इति ॥ ४ ॥ अथ हारुणिरुवाचैवमु ह यूयमुपाध्वा, अथ ह वयमुपास्महे, सुवर्गमेव लोकं पूर्वयाऽऽहुत्याभिजयाम प्रजायां पशुष्वस्मिँल्लोक उत्तरया प्रतितिष्ठामेति[११]; आरुणिनो ह वै जघन्येन पूर्वेषाꣳ श्रोत्रियाणां प्रतिक्रान्तमुभौ[१२] हि स लोकाववेदिमञ्चामुञ्च ॥ ५ ॥ [११] [इत्यष्टमोऽनुवाकः]

इदं वा अन्वाहुर्- ब्रह्मवादिनो वदन्त्यग्निहोत्रप्रायणा यज्ञाः, [१३](किंप्रायणम् अग्निहोत्रमिति; वत्सो वा अग्निहोत्रस्य प्रायणमग्निहोत्रं) यज्ञानामिति ॥ १ ॥ आज्येन जुहुयात्तेजस्कामस्य; तेजो वा आज्यं तेजस्व्येव[१४] भवति ॥ २ ॥ सोमेन ब्रह्मवर्चस्कामस्य; ब्रह्मवर्चसं वै सोमो ब्रह्मवर्चस्येव भवति ॥ ३ ॥ पयसा पशुकामस्य; [१५](एतद्वै पशूनां रूपं रूपेणैवास्मै पशूनवरुन्धे; पशुमानेव भवति। दध्नेन्द्रियकामस्य; इन्द्रियं वै दधि, इन्द्रियाव्येव भवति ॥ ४ ॥ यवाग्वा ग्रामकामस्य; औषधा वै मनुष्याः, भागधेयेनैवास्मै सजातानवरुन्धे) ग्राम्येव भवति ॥ ५ ॥ आपो वा अग्निहोत्रं तन्नु हाद्भिरेव जुहुयात् ॥ ६ ॥ ओषधयो ह वा अग्निहोत्रं तदु हौषधीभिरेव जुहुयात् ॥७। वनस्पतयो ह वा अग्निहोत्रं तदु ह वनस्पतिभिरेव जुहुयात् ॥ ८ ॥ तण्डुला वा अग्निहोत्रं तदु[१६] ह तण्डुलैरेव जुहुयात् ॥ ९ ॥

१. MHP इ. २. M °रुणीर्दि° ३. MHP om; thus AO IV. 39:33. 13. ४. MHP broken. ५. MHP broken ; thus AO IV.39.33.14. ६. MHP om. ६. MHP om. ७. M °न्वारोहेत्, P °न्वासरोहोत्, H om अन्वारोहति = °थोत्तरेण. ८. MP स्वस्त्वेव. ९. MHP एनेन. १०. MH om. ११. P प्रतिष्ठा°. १२. MHP मुदौ. १३. MHP abr. १४. MHP तेजस्येव. १५. MHP abr. See TB. II.1.5.5-6. १६. MHP तन्नु.

तण्डुलहोमश्चेत्तु न स्यादोदनेन जुहुयाद् , एष वै होमानाꣳ सत्तमो यदोदनहोमः ॥ १० ॥ प्रजायै वा एतत्पशूनाꣳ रूपं यत्पयः, स यस्य ह पयसा जुह्वति साक्षादेव प्रजाः पशूनवरुन्धे ॥ ११ ॥ जनको ह वैदहो वाजसनेयं पप्रच्छ[१] यदध्वर्यो पयो न स्यात् केनाग्निहोत्रं जुहुयादित्यद्भिः सम्राडिति; अथ यदापो न स्युः केनाग्निहोत्रं जुहुयादित्योषधीभिः सम्राडिति; अथ यदोषधयो न स्युः केनैवाग्निहोत्रं जुहुयादिति वनस्पतिभिः स[२](म्राडिति; अथ यद्वनस्पतयो न स्युः [३](केनाग्निहोत्रं जुहुया)दिति, सता च सम्राडसता चेति; अथ यत् सच्चासच्च न स्यातां केनै(वाग्निहोत्रं)[४] जुहुयादित्योमिति होवाच; अतिपण्डित एव मन्यसे [....][५] वैतस्मात्सर्व-स्माज्जनितोः ॥ १२ ॥ अथाग्निहोत्रमहूयत इवेति, तद् वाव भगवो विविदिषाणीति[६]; स वै तर्हीत्थं नेदीयो[७] न्यासर्पेति, [८]स ह न्याससर्प; तꣳ[८] होवाचादित्य एव सम्राडसौ सायमहूयत[९][इवेति], न आदित्ये प्रातः; तन्नु ह सायं जुहुयाद् '**अ[१०][ग्निर्ज्योति-ज्योतिरग्निरा]दित्यꣳ स्वाहा**' इ[ति][११], प्रातर्जुहुयात् '**सूर्यो ज्योतिर्ज्योतिः सूर्योऽग्निꣳ स्वाहा**' इति ॥ १३ ॥ तदेतन्न कुर्यादितरस्मिन् विद्यमाने; स य एवैकवृत्सुवर्गं लोकमभीप्स्यन्न पशून्नायुर्नेमं लोकं प्रत्यवेक्षेत ॥ १४ ॥ [१२] [इति नवमोऽनुवाकः]

स एतामशरीरीमाज्यस्याहुतिमु[१२] [ह जुहुयादाज्येन दर्श]पूर्णमासौ यजेताज्येन चातुर्मास्यैर्यजेताज्येनेष्टिपशुबन्धाभ्यां यजेताज्येन सौम्येनाध्वरेण यजेत, एकवृदेव सुवर्गं लोकमेति, न तु ह ज्योगिव जीवतीति ॥ १ ॥ तद्वा इदमन्वाहुर्- उत्तरावतीं वै देवा [आहुतिमजुहवुरवाचीमसुरास्ततो देवा अभवन् पराऽसुरा इति;][७] आहितेष्वग्निषून्नीतेऽग्निहोत्रे '**भूः स्वाहा**' इति पूर्वामाहुतिं जुहोति होतुराहुत्योत्तराम्, एषा ह वै सोत्तरावत्याहुतिः ॥ २ ॥ तां देवा अजुहवुस्ततस्ते-ऽभवन्[१४], तामु हैवाप्यद्य जुह्वति, यस्यैवं जुह्वति भवत्येव [...... ॥ ३ ॥ तदाहुर्-][१५] वनस्पतयो ह वै दशहोता, यद्वा इदं किञ्च तत्सर्वं दशहोतैव नाम भवति; अथ यानभिप्रयुञ्जीतोन्नीतेऽग्निहोत्रेऽनुलोमं दशहोतारं व्याख्याय प्रसिद्धं पूर्वामाहुतिꣳ हुत्वा प्रतिलोमं दशहोतारं निगद्य क्षीय[१६][न्]हे[१७]....[क्षी]रेण[१८]... वै देवा असुरानक्षीणन् तत्क्षीरस्य क्षीरत्वम्; स यथो हैनेन देवा असुरानक्षीणन्नेवमु [१९]हैनेनैवंविद्यजमानो द्विषतो भ्रातृव्यान्[२०] क्षिणोति ॥ ४ ॥ तदेतद् धृष्टकर्मेव[२१]

१. MHP प्रयच्छन्. २. MHP abr. ३. MHP abr. ४. MHP abr. ५. MHP broken. ६. MHP विविदुषा°. ७. P °दीयोऽन्यां°. ८-८. MHP स सन्या सर्पतं. ९. MHP °महूयेत and after that broken. १०. MHP broken ; before दीत्यꣳ [MHP नित्यꣳ]. ११. MHP broken. १२. MHP broken १३. MHP broken cf. TB II 1.4.1. १४. P भगवंस्तामु°. १५-१५. MHP broken. १६. MHP broken. १७. MHP broken. १८. MHP broken. १९. MHP हेनेनै°. २०. H भ्रातृव्यं. २१. MHP कर्ममिव.

धार्ष्ट्र्व्यमिव, य एवमेत[त् स][१]र्वदा प्रयुञ्जीत, स यदेवैतेऽमु [......][२] मासस्य पर्येयातामथ हैतत्कर्म प्रयुञ्जीत; एनान्हैवाभ्यञ्जनस्तत्कुलं निष्कलेदिति ॥ ५ ॥ [१३] [इति दशमोऽनुवाकः]

॥ इत्यग्निहोत्रान्वाख्यानं समाप्तम्[३] ॥

॥ इति द्वितीयः प्रपाठकः ॥

१. MHP broken. २. MHP broken. ३. MHP इत्यग्निहोत्री समाप्ता.

अथ तृतीयः प्रपाठकः

[अथ पशुबन्धान्वाख्यानम्]

तदाहुर्- अध्वर्यो यद्यदेव द्वे रूपे[१] भ[वतः किं तद्रूपं][२] भवति; अथास्य देवा यज्ञमागच्छन्त्यथास्य[३] हविरश्नन्ति; दीक्षितोऽन्यद् भवति मानुषमस्यान्यद्रूपं भवति; व्रतोपेतो [४]वा अन्यद्[४] भवति मानुषमस्यान्यद्रूपं भवति; दीक्षितं पशुबन्धेन याजयसी३ व्रतोपेता३मिति ॥ १ ॥ स यद् ब्रूयाद् दीक्षितमिति क्वैनमेतददिदीक्ष इत्येवमेवैनमेतत्सर्वमवभृथादनुदृभेत्[५] ॥ २ ॥ अथ यद् ब्रूयाद् व्रतोपेतमितीष्टिं वै तर्हि पशुबन्धमकर्व्येनमकृक्षथा इति ह ब्रूयात्; एष ह वा इष्टिं पशुबन्धं करोति यो व्रतमुपनयति, यथेष्ट्यां[६] पशुर्नियुक्तः[७] स्यात् तादृक् तत्; एष ह[८] वा इष्टिं पशुबन्धं करोति योऽपः प्रणयति, यथेष्ट्यां पशुर्नियुक्तः स्यात् तादृक् तत्; एष ह वा इष्टिं पशुबन्धं करोति य आज्यभागौ यजति, यथेष्ट्यां पशुर्नियुक्तः स्यात् तादृक् तत्; [९]एष ह वा इष्टिं पशुबन्धं करोति यः प्राशित्रमवद्यति, यथेष्ट्यां पशुर्नियुक्तः स्यात् तादृक् तत्;[९] एष ह वा इष्टिं पशुबन्धं करोति योऽन्वाहार्यमाहरति, यथेष्ट्यां पशुर्नियुक्तः स्यात् तादृक् तत्; एष ह वा इष्टिं पशुबन्धं करोति यत्फलीकरणहोमं जुहोति, यथेष्ट्यां पशुर्नियुक्तः स्यात् तादृक् तत्; एष ह वा इष्टिं पशुबन्धं करोति यो विष्णुक्रमान् क्रमते, यथेष्ट्यां पशुर्नियुक्तः स्यात् तादृक् तत्[१०]; तानि वै सप्त ॥ ३ ॥ तदाहुर्- अध्वर्यविष्टिः[११] पशुबन्धा३ महायज्ञा३ इति; महायज्ञ इत्येव[१२] ब्रूयात् ; एष ह वा अञ्जःसवाहामेष ह वै षड्ढोताञ्जःसवो[१३]ऽध्वर्युश्च प्रतिप्रस्थाता च ब्रह्मा चाग्नीच्च होता च [१४]मैत्रावरुणश्चेति; एतैर्ह[१५] वा एष षड्ढोताञ्जःसवः; स यत्रादोऽग्निं प्रहरति तत् स षड्ढोतारमनुद्रुत्य जुहोत्येकां

१. MHP यूपे. २. MHP broken. ३. M °मागन्त्य°. ४-४. MH वोऽन्यद्, P वोन्यद् ५. MHP °सर्वमावभृ. ६. MHP यथेष्टया. ७. MHP पशुन्नियु°. ८. Thus MHP; AO IV. 41:36.7 : उ. ९-९. AO IV.41:36.9 om. १०. MHP om. ११. MHP °ध्वर्युर्विष्टः, thus AO IV. 41:36.15. १२. MHP इत्येप; thus AO IV.41:36.16. १३. MHP °ञ्जस्सर्वो°. १४. MHP add मैत्रा before मैत्राव°. १५. MHP °त्येतैर्न ।

[पञ्चगृहीतं][१] कृत्वाहुतिं पञ्च वाऽऽज्यैः[२]; तस्य दीक्षा॥ ४॥ तदाहुर्- अध्वर्यो यदेनमेतददिदीक्षो[३] नो वै दीक्षितस्यानवभृथोऽवकल्पते[४] क्वैनमवभृथमवनयिष्यसीति[५]; स यत्रादो हृदयशूलेन चरन्ति स हैतस्यावभृथः॥ ५॥ मधुको ह स्माह [६]पैङ्ग्यो विसोमेन[६] ह वा एके पशुबन्धेन यजन्ते ससोमेनैक इति; तृतीयस्यामितो दिवि सोम आसीत्॥ ६॥ [१]

तृतीयस्या(मितो दिवि सोम आसीत् ; तं गायत्र्याहरत्, तस्य पर्णमच्छिद्यत, तत् पर्णोऽभवत्तत्पर्णस्य)[७] पर्णत्वम्; ते देवा अब्रुवन् क एतꣳ सोमाꣳशुमन्वेष्यति[८], कस्यैष[९] सोमपीथो भविष्यतीति; सोत्तरवेदिरब्रवीद् अहं च पशुबन्धश्चेति[१०]; तौ संविदानावेतꣳ[११] सोमाꣳशुमन्वैतां, तयोरेष सोमपीथस्तस्माद् यत्र क्व च पशुरालभ्यते तदेषा न्युप्यत उत्तरवेदिः॥ १॥ एष ह वै विसोमेन पशुबन्धेन यजते योऽन्यं पालाशात्[१२] पशुबन्धयूपं कुरुते; स वरेणोत्तरवेदिं व्यर्धयति, वरेण पशुबन्धं; तावेनं वरेण व्यृद्धौ[१३] वरेण व्यर्धयतः, स [१४]इष्ट्वा पापीयान्[१४] भवति॥ २॥ अथ हैष ससोमेन[१५] पशुबन्धेन यजते यः पालाशं पशुबन्धयूपं कुरुते; स वरेणोत्तरवेदिꣳ समर्धयति वरेण पशुबन्धम्; तावेनं वरेण समृद्धौ[१६] वरेण समर्धयतः, स[१७] इष्ट्वा वसीयान् भवति; तस्यैष एव होमो यदेनमेतदनुप्रहरति॥ ३॥ तदु वा आहुः-स्वरुं नैवास्यैतदु [१८][यथा]कामः [स्या][१९]दिति॥ ४॥ [२] [इति प्रथमोऽनुवाकः]

इदं वा अन्वाहुः- प्रजापतिः प्रजा असृजत; ताः सृष्टा[२०] यथादेवतं व्यायन्[२१] सूर्यꣳ ह स्मैवासां चक्षुर्गच्छति वातं प्राणोऽन्नमपानो [२२]लोकं मनोऽ[२२]न्तरिक्षमात्मा दिशः श्रोत्रमङ्गिरसोऽङ्गानि मरुतो हृदयमपो[२३] रेतः पृथिवीं शरीरꣳ सरस्वतीं वाग्, [एवं नु ह][२४] स्मैव वि[...][२५] न मम संभवन्तीति॥ १॥ स ऐक्षत प्रजापतिः को नु

१. MHP broken ; cf ŚB XI.7.2.6.; KŚS VI.1.13. २. MHP, AO IV 41:36.21 : वापाह्वै ; cf ŚB, KŚS ibid. ३. M °मेतददीक्षो, H, °मेतद्दीक्षो; thus Ao IV.41:36.21. ४. MHP °पकत्वते. ५. MHP °ष्यतीति; thus AO IV. 41:36.22. ६-६. MHP वै गोपिसो°; thus AO IV. 41:36.23. ७. MHP abr. as तृतीयस्या=पर्णत्वम्; see TS III. 5.7.2. ; AO IV. 41:36.24-26. ८. MHP °ष्यामि. ९. MHP त्वस्यैष [M °षं]; thus AO IV.41:36.27. १०. MHP °बन्धञ्चे°. ११. MHP दानामेतत्. १२. MHP पालाशं. १३. MHP व्यृद्धो. १४-१४. MHP इष्टा वापीयान्. १५. MHP सोमेन. १६. MHP समृद्धो. १७. MHP तस्य; thus AO IV. 41:37.4. १८. MHP broken. १९. MH broken ; P does not show sign of broken text between काम and दिति. It reads कामदिति. २०. MHP स्पृष्टा. २१. M व्यायं. २२-२२. MHP लोकमुनो. २३. MHP मापो. २४. MHP broken. २५. MHP broken.

मेऽनेन सृष्टेन भोगो यदित्थं न संभवन्तीति; स तपोऽतप्यत; स तपस्तप्त्वैतं पशुबन्धमपश्यत्, तमाहरत्, तेनायजत; तस्यैकादशभिरेवावदानैरेकादश देवता निरवादयत[१], ता अस्येमा देवतास्तृप्ताः प्रीता यथालोकं व्यायन्[२], ततो हेमाः प्रजाः संबभूवुः॥ २॥ मानसीनेन पशुबन्धेन [३]यजेतेत्याहुस्तथा सात्मा साङ्गः सतनुः सप्राणः सककथः संभवन् संभवति य एवं वेद॥ ३॥ तदाहुः- किमवदानानामवदानत्वमिति; स यदु हैभिरेता देवता निरवादयत[१] तदवदानानामवदानत्वम्; स यथो हैभिरेता देवता [१]निरवादयतैवमु हैभिरेवंविद् यजमान इमाँल्लोकान् निरवदयते॥ ४॥ तदाहुः- किंदेवत्येन पशुना यजेतेति; प्राजापत्यः स्यादित्याहुः, प्रजापतिर्वा एतमग्रेऽभ्य[४]पश्यदिति॥ ५॥ तदु वा आहुर्-आग्नेय एव स्यादग्निमुखा वै प्रजापतिः प्रजा असृजतेति॥ ६॥ तदु वा आहुर्- अग्नीषोमीय एव स्यादग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति॥ ७॥ तदु वा आहुर्- ऐन्द्राग्न एव स्यादिन्द्राग्नी वा अनु सर्वे देवा[५] अष्टौ वसव एकादश रुद्रा द्वादशादित्याः; अग्निश्चेन्द्रश्चैते वै देवते पारयिष्ठे; यद्यार्तो[६] यजते पारयत एव; तस्मादैन्द्राग्न एव पशुः स्यादित्येषा न्वेव पशोः स्थितिः॥ ८॥ अथातः प्रायश्चित्तीनामेव॥ ९॥ [३]

अथातः प्रायश्चित्तीनामेव। स यदि पशुरुपाकृतः[७] पलायेत का तत्र प्रायश्चित्तिः, कथं कुर्यादिति; विनष्टीर्जुहुयादित्याहुस्ता वा एता विनष्टयो हूयन्ते **'सूर्यं ते चक्षुर्गच्छतु स्वाहा', 'सरस्वतीं ते [८]वागगच्छतु स्वाहा'** इति; तमनुपलाय्य गृह्णीयुरथैनमालभेत[९]; यद्यु न गृह्णीयुरन्यमालभेत; सैव ततः प्रायश्चित्तिः ॥१॥ अथ यदि म्रियेत कथं कुर्यादिति; विनष्टीर्जुहुयादित्याहुस्ता वा एता विनष्टयो हूयन्ते **'सूर्यं ते चक्षुर्गच्छतु स्वाहा', 'सरस्वतीं ते [८]वाग् गच्छतु स्वाहा'** इति; विनष्टीर्हुत्वाऽन्यꣳ[१०] सꣳस्रावेणाभिघार्याथैनꣳ शामूलं वा विहरेयुः पचेरन् वैनत्॥ २॥ तदाहुर्-यदन्यं[११] न विन्देत् कथं कुर्यादिति; [१२]स्पृतीर्जुहुयादित्याहुस्ता वा एता स्पृतयो[१३] हूयन्ते **'सूर्यात्ते चक्षुः स्पृणोमि स्वाहा', 'सरस्वत्यास्ते वाचꣳ स्पृणोमि स्वाहा'** इति; [१४]स्पृतीर्हुत्वैनꣳ सꣳस्रावेणाभिघार्य तं यदत एव [१५]मृतमुदञ्चं कर्षेयुः, पशुकुणपेन हास्य शवेनेष्टꣳ स्यान्मृतं वै शवꣳ

१. MHP निरवदा°; thus AO IV.42:37.21. २. MHP व्ययन्; thus AO IV.42:37.22. ३. MHP यजतेत्या° ; thus AO IV.42:37.23. ४. MHP °मग्रेभ्यः ; thus AO IV. 43:38.19. ५. MHP देव ६. MHp यद्यार्त्या ; thus AO IV.43:38.24. ७. MHP °कृतं. ८. MHP वा °गच्छ°. ९. MHP °थैतमा°. १०. MHP °न्यां. ११. P यद्यन्न. १२. MHP स्मृती°. १३. MHP स्मतृयो. १४. MHP स्मृती. १५. MHP मुत°.

हरन्ति; य एनं तत्र ब्रूयात् पशुकुणपेन न्वा अयꣳ शवेनायष्ट, क्षिप्रे न्वा[१] इमं यजमानं मृतमुदञ्चं क्रक्ष्यन्तीति[२] तथा हैव स्यात्॥ ३ ॥ तमत्रैव पर्यग्निकुर्यात्, तस्य पर्यग्निकृतस्य वपामुत्खिद्य तया प्रचरेत्; अथैनमङ्गशः संकृत्योदञ्चꣳ हरेयुर्वैश्वदेवानि वाऽङ्गानि समाप्तेनैवास्य पशुनेष्टं भवति, एवं नु हास्य पशुकुणपेन समेधेनैव पशुनेष्टं भवति॥ ४॥ अथ यदि यजमान उपतापी स्यात्कथं कुर्यादिति; विनष्टीर्जुहुयादित्याहुस्ता वा एता विनष्टयो हूयन्ते '**सूर्यं ते चक्षुर्गच्छत्वसौ स्वाहा**', '**सरस्वतीं ते वाग् गच्छत्वसौ स्वाहा**' इति यजमानस्य नामग्राहम्; स[३] यद्यपि नीत[३] इव भवति जीवत्येव॥ ५ ॥ अथ यद्यभिचरेत्कथं कुर्यादिति; [४]स्पृतीर्जुहुयादित्याहुस्ता वा [५]एता स्पृतयो[५] हूयन्ते '**सूर्यात् ते चक्षुः [६][स्पृणोम्यसौ स्वाहा**', '**सरस्वा]त्यास्ते वा[चꣳ स्पृणो][७]म्यसौ स्वाहा**' इति, यं द्विष्यात्तस्य नामग्राहम्; तमेतासु देवतासु व्युत्क्रान्तासु यथा शुष्कꣳ स्थाणुꣳ स्तृण्वीतैवमेनꣳ स्तृणुते, ता [८]जगार्तिमार्च्छति॥ ६ ॥ अथ यद्यष्टापदी स्यात् कथं कुर्यादिति; विनष्टीर्जुहुयादित्याहुस्ता वा एता विनष्टयो हूयन्ते ['**सूर्यं ते चक्षुर्गच्छतु स्वाहा**', '**सरस्वतीं ते वाग् गच्छतु]**[९] **स्वाहा**' इति; हुत्वा हुत्वैवैतं गर्भꣳ सꣳस्रावेणाभिघारयत्ये[ताभ्यो][१०] वै देवताभ्यः पुरुषः पशुः संभवन् संभवति; याभ्य एव देवताभ्यः पुरुषः पशुः संभवन् संभवति, ताभ्य एवैनं जुहोति॥ ७॥ अथैतं गर्भं पशु[श्रपणे जुहोत्यति][११]रिक्त एषोऽग्नीनां यत्पशुश्रपणोऽतिरिक्त एवातिरिक्तं दधात्यतिरिक्तस्य शान्त्यै; सैषा सर्वस्य प्रायश्चित्तिः; न ह वै तत्र काचनार्तिर्भवति न रिष्टिर्यत्रैषा प्रायश्चित्तिः क्रियते॥ ८ ॥ केशिगृहपतिकानाꣳ ह॥ ९ ॥ [४]

केशि[गृपतिकानाꣳ ह सम्राड्दुहꣳ शार्दूलो जघान, स ह ससत्त्रिण उ-][१२]वाच केशी; केह प्रायश्चित्तिरिति; तꣳ होचुर्नास्ति प्रायश्चित्तिः, खण्डिकोऽयमौद्भारिः[१३] प्रायश्चित्तिं वेद, स तु तुभ्यमेतादृक् चैव कामयतेऽतश्च पापीय इति॥ १ ॥ स[१४] होवाच; संग्रहीतरान्य मे, युङ्ग्धि रथम्; यद्यु ह [मा][१५]

१. MHP न्व. २. MHp कृषन्ती° ; thus AO IV.44:39.28. ३-३. MHP यदि हा विनीत ; thus AO IV.45:40.11. ४. MHP स्पृती° ५-५. MHP स्पृतास्स्पृत. ६. MHP broken. ७. MHP broken. ८. MHP जागर्ति ; thus AO IV.45 : 40.16. ९. MHP broken. १०. MHP om; thus AO IV.45:40.19. ११. MHP broken. १२. MHP broken ; cf ŚB XI.8.4.1; thus AO IV.46:40.22-23. १३. MHP खण्डिकौयमौ°. १४. MHP नेति; cf ŚB XI.8.4.2. १५. MHP om.

मा[र]यिष्यति यज्ञं][१] विकृष्टमनु [२][विक्रक्ष्य इति, य][२]द्यु वै मे वक्ष्यति समाप्स्यामीति॥ २॥ [स ह युक्त्वा ययावाजगाम; तं ह प्रतिख्यायोवाच यन्वेतान्येवाजिनानि मृगेषु भवन्त्यथैषां पृष्टीरपिशीर्य पचामहे; कृष्णाजिनं मे ग्रीवा ग्रीवास्वाबद्धमित्येव मेदमधृषोऽभ्यवस्यन्तू३मिति॥ ३ ॥ नेति होवाच सम्राड्दुहं वै मे भगवः शार्दूलोऽवधीत्, यद्यु मा मारयिष्यसि यज्ञं विकृष्टमनु विक्रक्ष्य इति; यद्यु वै मे वक्ष्यसि समाप्स्यामीति॥ ४॥ स][३] होवाचामन्त्रणीयान्वा [४]आमन्त्रया३ इति; तान् हामन्त्रयाञ्चक्रे; तान् होवाच यद्यु हास्मै वक्ष्याम्येतस्यैवेयं प्रजा भविष्यति न मम, लोकी त्वहं भविष्यामि; [५]यद्यु [वा अ][६]स्मै न वक्ष्यामि[७] ममैवेयं[८] प्रजा भविष्यति नामुष्य, लोकी त्वसौ भविष्यति नाहमिति; तꣳ होचुर्मा वोचो भगवोऽयं वाव लोको राजन्यबन्धोरिति; नेति होवाचा[मूर्वै][९] रात्रयो[१०] भूयसीरिति; तस्मा उ हैतामेव प्रायश्चित्तिमुवाच विनष्टीर्हुत्वाऽन्याꣳ सꣳस्रावेणाभिघार्य ताꣳ सम्राड्दुहं कुरुष्वेति॥ ५ ॥ स हैवञ्चकार; ताः पराभूता हैवाप्यद्य खण्डिकस्यौद्भारेः[११] प्रजाः; अथेमाः केशिनीरेव; स यस्य ह सम्राड्दुहꣳ शार्दूलो हन्यादन्येन वा मृत्युना म्रियेत विनष्टी[१२]र्हुत्वाऽन्याꣳ सꣳस्रावेणाभिघार्य ताꣳ सम्राड्दुहं कुर्वीत[१३]; सैव ततः प्रायश्चित्तिः॥ ६ ॥ [५] [इति द्वितीयोऽनुवाकः]

इदं वा अन्वाहुः- प्रजापतिः प्रजा असृजत; ता अस्येमाः प्रजाः सृष्टा न वशमायन्नास्मै[१४] प्राध्वमवदन्; स ऐक्षत प्रजापतिः; कथा नु म इमाः प्रजाः सृष्टा वशमीयुः प्राध्वं मे वदेयुरिति॥ १॥ स तपोऽतप्यत; स तपस्तप्त्वैतं पशुबन्धमपश्यत्, तमाहरत्, तेनायजत; ता अस्येमाः प्रजाः सृष्टा वशमायन् प्राध्वमस्मा अवदन्॥ २ ॥ यजमानो वै यज्ञः प्रजापतिर्यो वै यज्ञः स यजमानः स यूपः; स [१५][य]द्यूपे पशुं नियुनक्त्यात्मन्नेव तत्प्रजा यजमानो बध्नीते; ता अस्येमाः प्रजाः सृष्टा वशं यन्ति प्राध्वमस्मै वदन्ति॥ ३ ॥ तदाहुर्- यजेदाज्यभागावुत[१६] न

१. MHP broken ; thus AO IV. 46:40:26; cf ŚB XI.8.4.2. २. MHP broken; thus AO ibid; cf SB ibid. ३. MHP A long text equivalent to ŚB XI. 8.4.3-4 seems to have been omitted here. ४. MHP °मन्त्रेया ; AO IV. 46:40.28 : अनुमन्त्रया ; thus ŚB XI.8.4.5. ५. MHP give the sign of broken text between भविष्यामि [MHP ष्याम] and यद्यु. ६. MHP broken between यद्यु. and स्मै न [MHP स्मव], thus AO IV.46:40.31. ७. MHP वक्षति ८. MHP मते...वयं; thus AO ibid. ९. MHP broken. १०. MHP रात्र्यार्भूय°. ११. MHP स्योद्भारे. १२. MHP विनष्टिर्हु°. १३. MHP कुरुष्वेति; thus AO IV.46:41.8. १४. MHP om अस्मै; caland suggests नास्मै प्राध्वा or न प्राध्वमस्मा probable readings for न प्राध्वम् Ao VI.1:97.fn 1. १५. MHP om. १६. MHP भागावुप; thus AO VI.2:98.24. cf ŚB XI. 7.4.2.;

यजेदिति; यजेदित्याहुश्चक्षुषी वा एते यज्ञस्य यदाज्यभागौ; किंꣳ ह [१]ऋते पुरुष-श्चक्षुर्भ्याꣳ स्यात्[१] ॥ ४ ॥ अथो यदिन्द्रो वृत्राय वज्रमुदयच्छत्तस्मिन्हान्तरग्नीषोमौ परिददर्श; तावब्रवीन्मम वै युवꣳ स्थो मामभ्येतमिति; तावब्रूतां किमिच्छन्तौ त्वामभ्ये[याव][२] यावच्च तावत्तवैकं च कामं कामयावहेऽन्नाद्यस्य हैव नाꣳश इति ॥ ५ ॥ तावब्रूतामेतस्मिन्नेव नौ मरुत्वतीय [३]उक्थेऽन्वाभजेति; तावेतदेतस्मिन्नेव मरुत्वतीय उक्थेऽन्वाभजत् **'अग्निर्नेता'**, **'त्वꣳ सोम क्रतुभिः सुक्रतुर्भूः'**[४] इति ॥ ६ ॥ तावब्रूतां सर्वेष्वेव नौ हविर्यज्ञेष्वन्वाभजेति; [५]तावेतत्सर्वेष्वेव हविर्यज्ञेष्वन्वाभजत् **'अग्निर्वृत्राणि जङ्घनत्'**, **'त्वꣳ सोमासि सत्पतिः'** इति ॥ ७ ॥ यथेष्टिस्तथा पशुबन्धस्तस्मादेतौ यजेन्नेदेनौ वरादन्तरयाणीति[६] ॥ ८ ॥ तदाहुः- क्व हैवैनौ यजेदिति ॥ ९ ॥ [६]

तदाहुः- क्व हैवैनो यजेदिति; पुरस्ताद्वा वपायै, पुरस्ताद्वा पुरोडाशस्य; हविर्यज्ञविध उ ह वा अन्यः पशुः सवविधोऽन्यः; यस्मिन् व्रतमुपनयति, यस्मिन्नपः प्रणयति, यस्मिन्नाज्यभागौ यजति, यस्मिन्प्राशित्रमवद्यति, यस्मिन्नन्वाहार्यमाहरति, यस्मिन्फलीकरणहोमं जुहोति, यस्मिन्विष्णुक्रमान् क्रमते, स हविर्यज्ञविधः; स यावतीमेव हविर्यज्ञेनेष्ट्वा जितिं जयति [यावन्तं लोकं तावतीमेवैतेन पशुनेष्ट्वा जितिं जयति][७] तावन्तं लोकम् ॥ १ ॥ अथ यदस्मिन्नेतानि न क्रियन्ते स सवविधः; तदाहुः-किमेष सवविधो[८] भवति; प्रयाजा एव प्रातःसवनस्य रूपं, प्राणो वै प्रयाजः प्राणः प्रातःसवनम् [९][पुरोडा]शो माध्यन्दिनस्य सवनस्य रूपमैन्द्रो वै पुरोडाश[१०] ऐन्द्रं माध्यन्दिनꣳ [११]सवनम् अनूयाजास्तृतीयसवनस्य[१२] रूपमपानो[१२] वा अनूयाजा [१३]अपानस्तृतीयसवनम्, एवं नु हैष सवविधो[१३] भवतीति; स यावतीमेव सवनेनेष्ट्वा[१४] जितिं जयति यावन्तं लोकं तावतीमेवैतेन पशुनेष्ट्वा जितिं जयति तावन्तं लोकम् ॥ २ ॥ तन्नु हैतदेके वपायामेव हुतायां दक्षिणां नयन्त्येषा सꣳस्थेति वदन्त, ऐन्द्रो वा अयं मध्यतः [१५]प्राणो, यद्येवं[१५] कुर्यान्न प्राणं दक्षिणया[१६] दक्षयेत्; य एनं तत्र ब्रूयान्न प्राणं दक्षिणयाददक्षन् मरिष्यतीति, तथा हैव स्यात्; तस्मात्पशुपुरोडाशेडायामेवोपहूतायां दक्षिणां दद्यादिममेवैतदैन्द्रं मध्यतः प्राणं

१-१. MHP इतः इतः पुरुषश्चक्षुस्याद् [M पुरश्च°]; thus AO VI.2:98.25-26. २. MHP om. ३. MHP °न्वभ°. ४. MHP सुक्रतुभि°. ५. MHP तावत्सर्वे°. ६. MHP °न्तराया°. ७. MHP om ; thus AO VI.3:100.12-13. ८. MHP सविधो. ८. MHP broken. १०. MHP पुरोडाशम्. ११. MHP सवनअमनूया°. १२-१२. MHP °सवनमपानौ. १३. AO VI.3:100.19 : अपानं तृ°. १४. MP सवनेष्वा. H सवने ववा. १५-१५. MHP प्राणवदेवं; thus AO VI. :101.18. १६. MHP. दक्षिणायां.

दक्षिणया दक्षयति, तद् दक्षिणायै दक्षिणात्वम् ॥ ३ ॥ तदाहुः- किमेव दक्षिणायै दक्षिणात्वमिति; वृष्टिर्वै दक्षिणा, वृष्टिर्हीमाः प्रजाः, सकृत्प्रजा वृष्ट्या दक्षयति तद्दक्षिणायै दक्षिणात्वम् ॥ ४ ॥ [७] [इति तृतीयोऽनुवाकः]

इदं वा अन्वाहुः- प्रजापतिरकामयत प्रजायेयेति; स तपोऽतप्यत; स तपस्तप्त्वैतं पशुबन्धमपश्यत्, तमाहरत्, तेनायजत; तं देवा अभि समगच्छन्त, मामनेन यक्ष्यते मामिति ॥ १ ॥ स ऐक्षत यद्यु हैनमेकस्यै देवतायै नियोक्ष्यामि [१]सर्वाभ्य आव्रक्ष्य[१] इति; सोऽब्रवीदाजिमस्य धावतेति; तस्मिन्नाजिमधावन् ; तेषां समुत्क्रान्तानामिन्द्रोऽवेदग्निर्वा इममाजिमुज्जेष्यतीति; तमब्रवीज्जातवेदः सह नाविति; तं तथेत्यब्रवीद्वरं तु शक्र वृणै[२] मद्दैवत्यः पशुरुपाकृतोऽसदिति; तस्मात्पशावुपाकृते[३]ऽग्निं मन्थन्ति ॥ २ ॥ [४]सोऽब्रवीद् द्वितीयꣳ शक्र[४] वरं वृणै मद्दैवत्य एव पशुः पर्यग्नौ क्रियमाणेऽसदिति; तस्मात्पशौ पर्यग्नौ क्रियमाणे केवलमाग्नेय[५]ꣳ सूक्तमन्वाह **'अग्निर्होता[६] नो अध्वरे'** इति ॥ ३ ॥ सोऽब्रवीत्तृतीयꣳ शक्र वरं[७] वृणै मद्दैवत्य[८] एव पशुर्वपायां[९] प्रगृहीतायामसदिति; तस्माद् वपायां प्रगृहीतायां केवलमाग्नेय[५]ꣳ सूक्तमन्वाह **'जुषस्व सप्रथस्तमम्'** इति ॥ ४ ॥ सोऽब्रवीच्चतुर्थꣳ शक्र वरं वृणै मद्दैवत्य[८] एव पशुरवदीयमानोऽसदिति; तस्मात् पशावदीयमाने केवलमाग्नेयꣳ[९] सूक्तमन्वाह **'त्वꣳ ह्यग्ने प्रथमो मनोता'** इति ॥ ५ ॥ तानि वा एतान्येकादशावदानानि भवन्ति; तत् प्रश्नोऽस्ति [१०]होतर्यदेकादशा-वदानानि [भवन्ति][११], स यदेकैकस्यै पुरोनुवाक्याया अन्ववोचोऽथ या अत्यरीरिचः [१२]क्व ता[१२] धास्यसीति[१३] ॥ ६ ॥ स ब्रूयाच्चतस्रो दिशश्चतस्रोऽवान्तरदिशा, [१४]दिक्ष्वेवैनं ताभिः प्रत्यतिष्ठिपम्[१४], अथ ये द्वे अतिरिच्येते द्विपादु वै यजमानो यजमानमेव ताभ्यां प्रत्यतिष्ठिपमिति ॥ ७ ॥ [८] [इति चतुर्थोऽनुवाकः]

तमु हेन्द्र उवाच जातवेदोऽवृथा नु त्वमहमुत वृणै[१५] मद्दैवत्य[८] एव सर्वः[१६] पशुरसदिति; तदाहुर्- यदैन्द्राग्नः पशुरथ [१७]कथमेष सर्व[१७] एवैन्द्रो भवतीति; स यदु

१-१. MP सर्वावाभ्य आवृक्ष्य, H आवृश्च्य; thus AO VI.5:101.20. २. MP व्रणै. ३. MHP पशावपा°. ४-४. MHP °ब्रवीदिति यं शुक्रं. ५. MHP कपलाग्ने ; thus AO VI.5.102.26. ६. MHP अग्नि होता. ७. MP परं. ८. M मद्देव°. ९. MHP wrongly give additional text शुक्र.... ग्नौ क्रियमाणे सदिति तस्मात् between पशु and वपायां [M सर्ववायां. P सर्वायां]. १०. MHP हेतोर्य°. ११. MHP om; thus AO VI.6:104.3. १२-१२. AO VI.6.1.104.4. : क्वैता. १३. MHP धास्यतीति ; thus AO ibid. १४-१४. MHP दिक्ष्वैत्तवनन्ताभिः प्रेत्यति°. १५. MHP पृणै. १६. MHP सर्वं. १७-१७. MHP तथमेष. स.

हैवास्य त्रिष्टुभो याज्यानुवाक्यास्त्रैष्टुभो[१] वा इन्द्र एवं नु हैवैष[२] सर्व एवैन्द्रो भवति ॥ १ ॥ [३]ते देवा[३] अब्रुवन्नस्मानपि पशावन्वाभजतमिति; स यदेकादश प्रयाजा एकादशानूयाजा एकादशोपयजस्तद्देवानन्वाभेजतुः[४] ॥ २ ॥ त इमे लोका अब्रुवन्नस्मानपि पशावन्वाभजतमिति; स यदर्धर्च्ये[५] वसाहोमं जुहोत्यसौ वा अर्धर्च इयमर्धर्च्यो यदन्तरेण तदन्तरिक्षस्य रूपं तदिमाँल्लोकानन्वाभेजतुः[६] ॥ ३ ॥ तत्प्रश्नोऽस्त्यध्वर्यो[७] किं तत् पशुबन्धे क्रियते [८]यस्मा[त्समानाय]ने मू[त्रं च रेत]श्चाथ के[न] नाने[त इ]ति[८]; **'घृतं घृतपावानः पिबत'** इति; [९]तस्मात्समानायने मूत्रं[९] च रेतश्चाथ तेन नानेतः ॥ ४ ॥ ता दिशोऽब्रुवन्नस्मानपि पशावन्वाभजतमिति; स यज्जुहोति **'स्वाहा दिग्भ्यो नमो दिग्भ्यः'** इति तद्दिशोऽन्वाभेजतुः[६] ॥ ५ ॥ तेऽन्यजना[१०] अब्रुवन्नस्मान्[११] [अपि पशावन्वाभजतमिति; तान् ऊ]वध्येन [च लोहितेन] च[११] निरभाजयतां, तस्मात्पशावूवध्यं च लोहितं च न कुर्वन्ति; स यं द्विष्यात्तमूवध्येन[१२] च लोहितेन च[१३] मनसा [१४]समज्याथैनमेतेभ्योऽन्यजनेभ्यः सं प्रयच्छेत्, तस्य प्राणैर्व्युत्क्रामन्ति ॥ ६ ॥ ते[१५] मनुष्या अब्रुवन्नस्मानपि [१६][पशावन्वाभजतमिति; तत् प्र]श्नोऽस्त्यध्वर्यो यत्पशावेव भूयिष्ठं यजुः क्रियते न तथा पुरोडाशे[१७] नान्वाहार्येऽथ कस्मात्पशुः सर्वाभ्यो न तथा पुरोडाशे नान्वाहार्य इति; इन्द्राग्नी वा एतस्मिन्पशावन्वाभेजतुरिति ब्रूयात्तस्मादिति ॥ ७ ॥ [९] [इति पञ्चमोऽनुवाकः]

पशवो [१८][वै पशुबन्धः स यत्पशुबन्धेन यज]ते पशुमानेव भवति; तेन गृहेषु यजेतेत्याहुर्गृहेषु पशून् [१९]बध्ना इति[१९]; तेन सूयवसे यजेतेत्याहुः सूयवसे पशून् बध्ना इति; एतद्वै[२०] पशूनां प्रियं धाम यत्सूयवसः, प्रिय एव[२१] तद्धामन् पशून् बध्नीते ॥ १ ॥ [२२]जी[र्यन्ति ह वै] जुह्वतो यजमानस्याग्नयोऽग्नीन् जीर्यतोऽनु[२२] यजमानो जीर्यति, यजमानमनु गृहाश्च पशवश्च; माꣳसीयन्त्यु ह वा अग्नयो यजमानस्य जुह्वतस्ते यजमानमेव ध्यायन्ति, यजमानꣳ सङ्कल्पयन्ते[२३]; स

१. MHP °वाक्यांस्त्रै°. २. MHP ह वैष. ३-३. MP त देवा. ४. MHP भजतुः. ५. MHP यदर्धर्च्येव [H °च्येव; p °र्धर्च्यो]. ६. MHP भजतुः. ७. MHP प्रश्नोस्ताध्वर्यो. ८-८. MHP यस्मा...नेम...श्चाथकेनाने ...ति; thus AO VI.7:105 fn 1. ९-९. MHP नयनेऽमुत्रञ्च [°मुत्र च]. १०. MHP तेनान्य. ११-११. MHP °स्मान् ...वध्येन...च; thus AO VI. 8:105.26; 106.1. १२. MHP द्विष्यात्तानूव°. १३. MHP Om १४. MHp समज्यामथै [M समन्या]. १५. MHP तौ. १६. MHP broken. १७. MHP पुरोडाशो. १८. MHP broken; thus AO VI. 9:106.21. १९-१९. M बद्धन्निति, HP बध्नन्निति. २०. AO VI. 9:106.23 : तद्वै. २१. AO VI. 106. 24 : एवैतद्. २२-२२. MHP जी....जीर्य....जुह्वतो...नु; cf ŚB XI. 7.1.1.: thus AO VI.10 : 107.7. २३. M °संकद्र्यन्ते H संकद्दय°, P संकद्वय°.

[१]यत्पशुबन्धेन यजत आत्मानमेव तन्निष्क्रीणीते वीरेण[२] [वीरं, वी]रो ह [पशुर्वी-]रो[२] यजमानः; यादृग् वै देवेभ्यः पुरुषः करोति तादृगस्मै प्रतिकुर्वन्ति; तेभ्य एतत्परममन्नाद्यꣳ सम्प्रयच्छति[४] यत् पशुबन्धꣳ स परमस्यान्नस्यात्ता भवति ॥ २ ॥ स [ह वै][५] वनस्पतिं यजति; प्राणो वै वनस्पतिर्वनस्पतिर्वावैष यत्प्राणो, यत् किञ्चेदमनिति तस्य सर्वस्य [६]प्राणो [वन]स्पतिरिति, प्राणो ह वा[६] इदमुक्थम् ॥ ३ ॥ तं वै त्रेधा यजति, त्रयो वै प्राणाः प्राणो व्यानोऽपान इत्येतानेव तत् त्रीन् प्राणान् मध्यतो यजमाने दधाति ॥ ४ ॥ देवा उ ह वा एतेन[७] कृत्स्नेन समीचा पशुनेष्ट्वैषु लोकेषु यज्ञं विनिधाय सुवर्गं लोकममृतत्वमायन्; स यथो हैनेन देवाः कृत्स्नेन समीचा पशुनेष्ट्वैषु लोकेषु यज्ञं विनिधाय सुवर्गं लोकममृतत्वमायन्नेवमु हैनेनैवंविद् यजमानः कृत्स्नेन समीचा पशुनेष्ट्वैषु लोकेषु यज्ञं विनिधाय सुवर्गं लोकममृत्वमेति[८] ॥ ५ ॥ तान् वनस्पतयोऽनुचख्युर्यथायथैनं विनिदधुस्तमृषय आर्षेया अन्वैषुर्यथर्षयः सभूताः; तान् वनस्पतयोऽब्रुवन् यज्ञे च नः पशुषु चान्वाभजत, वयं व एतं यज्ञं प्रवक्ष्याम इति ॥ ६ ॥ स यदाज्येन यूपमनक्ति ॥ ७ ॥ [१०]

स यदाज्येन यूपमनक्ति; यज्ञो वा आज्यं यज्ञ एव तद्वनस्पतीनन्वाभजति ॥ १ ॥ अथ यद्यूपे पशून्[९] नियुनक्ति पशुष्वेव तद्वनस्पतीनन्वाभजति ॥ २ ॥ अथ यत्प्रयाजेषु यजति यदेवास्यास्मिँल्लोकेऽनाप्तं तदेवास्य तेनाप्नोति, तत् संभरति, तत् सम्यक् करोति ॥ ३ ॥ अथ यदन्तरा हविश्च स्विष्टकृ[तं च यजति][१०] यदेवास्यान्तरिक्ष-लोके[११]ऽनाप्तं तदेवास्य तेनाप्नोति, तत् संभरति, तत् सम्यक् करोति ॥ ४ ॥ अथ यदनूयाजेषु यजति [१२]यदेवास्य दिविलोके[१२]ऽनाप्तं, तदेवास्य तेनाप्नोति, तत् संभरति, तत् सम्यक् करोति ॥ ५ ॥ तमनीजानꣳ संवत्सरो नाभ्यतीयादायुर्वै पशुबन्ध आयुरेवात्मन् धत्ते ॥ ६ ॥ तदाहुर्- इष्टिपशुबन्धौ संदध्यादिति; तदु वा आहुः- केष्टिः कः पशुबन्ध इत्यहर्वा[१३] इष्टिरह्ना[१४]हि सर्वे कामा इष्यन्ते; रात्रिः पशुबन्धो रात्रिया हि पशवो बद्धाः; तस्माद् यदैषो[१५]ऽस्तमेत्यथ हैते[१६] पशवो बध्यन्तेऽग्निष्टोमान्[१७] निरुध्यन्ति बध्नन्त्यन्यान् ॥ ७ ॥ अथो वाग् वा इष्टिर्वाचा हि

१. MHP यं. २-२. MHP वीरेण...रो ह...रो; cf ŚB XI. 7.1.3. thus AO VI.10:107.11 ४. AO VI.10:107.13 : °प्रयच्छन्ति. ५. MHP broken. ६-६. MHP प्राणस्पति-रितिरिति; Caland suggests possible reading अतिरिक्तं for इतिरिति AO VI.11:107.30 fn 3. I prefer to emend as प्राणो वनस्पतिरिति प्राणो ह वा. ७. MH हैनेननेन; thus AO VI.11:108.3. ८. MHP give the sign of broken text between °मृतत्व and मेति [MHP मति]. ९. AO VI.11:108.11 : पशुं ; thus MHP. १०. MHP broken ११. MHP यदेवान्तरि°. १२-१२. MHP देवास्यतिलोके° ; thus AO VI.12:108.16. १३. MHP इत्याहुर्वा. १४. M °रह्नान्नि, H °रह्नानि P °रह्नाह्नि. १५. MHP यदैषा. १६. MHP हैष. १७. MHP °ष्टोमानि; Caland takes Ms. reading as a deteriorated one, AO VI.13:109.26 fn 5.

सर्वे कामा इष्यन्ते; प्राणः पशुबन्धः प्राणे[१] हि पशवो बद्धास्तस्माद्यावत् पुरुषः प्राणिति तावत् सꣳहितो भवति; अथ [२]यदस्मात्प्राणापानावुत्क्रमतोऽथ हैवास्यान्यस्तावत्पशूनामीशे[३] ॥ ८ ॥ तदाहुर्- निरुक्तेष्टिः[४] स्यादनिरुक्तः पशुबन्ध[५] इति; तदु वा आहुर्- एषणायै वा एतद्रूपं यदिष्टिरुपाꣳशिवव वा इष्यते, तस्मादनिरुक्तेवेष्टिः स्यान्निरुक्तः पशुबन्धः[६]; सूर्यस्त्वा[७]व ह पशवोऽनिरुक्ताः स्युरादित्यः सावित्रो वैष्णवः प्राजापत्यो हाप्यनिरुक्त एव स्यात्; य एनमादित्ये[८] निरुप्यमाणे ब्रूयादनिरुक्तं [९][प्राणं निर]वो[चन्] [९]मरिष्यतीति तथा [१०]हैव स्यात्[१०] ॥ ९ ॥ अथ यत्सावित्रोऽनिरुक्तो भवति, प्राणो वै सविता य एनꣳ सावित्रे निरुप्यमाणे ब्रूयादनिरुक्तं प्राणं निरवोचन् मरिष्यतीति तथा हैव स्यात् ॥ १० ॥ अथ यद्वैष्णवोऽनिरुक्तो भवति, यज्ञो वै विष्णुर्नेद्यज्ञस्य प्रियं धाम [निर][११]स्यतीति तत् ॥ ११ ॥ अथ यत्प्राजापत्योऽनिरुक्तो भवति प्राजापत्यं वा इदꣳ सर्वं निर्ब्रुवाणीति तत् ॥ १२ ॥ [११] [इति षष्ठोऽनुवाकः]

पृथिवी ह वाव पशुबन्धस्य सदोऽन्तरिक्षमाग्नीध्रं द्यौर्हविर्धानं दिव्यादित्यो[१२] यूपः स एष यूपः॥ १ ॥ तदाहुः- किं यूपस्य यूपत्वमिति, स यदु हैनेन देवा असुरानयोपयꣳस्तद्यूपस्य यूपत्वम् ; स यथो हैनेन देवा असुरानयोपयन्नेवमु हैनेनैवंविद् यजमानो द्विषतो [१३]भ्रातृव्यान् योपयति[१३] ॥ २ ॥ [१४]तं देवा असुरा[१४] अयजन्त; ते देवा एतꣳ श्रिया समन्विता अश्रियाऽसुरा, [१५]एषा ह वै [१६]साऽश्रीर्यत्तीक्ष्णाधि, न ह्येतस्यां देवा अश्रयन्तेति; देवा अयजन्त ऋषयोऽयजन्त [१७]पूर्वेऽयजन्तेति वा इमाः प्रजा यजन्ते; य एनं तीक्ष्णामञ्जन्तं ब्रूयाद् यज्ञ एनं क्षुरपविरष्टययासीन्मरिष्यतीति, तथा हैव स्यात्, तस्मात्पृथ्वीमेवाञ्ज्यात् ; सा ह वा एषा श्रीर्वज्राभ्यामुभयतः परिगृहीतां यजमानेन समीचीं दधाति ॥ ३ ॥ यजमानो वा आहवनीयोऽन्नꣳ[१९] स्वरुः, स्वरो ह वै नाम तꣳ[२०] स्वरुरित्याचक्षते परोक्षेण, परोक्षप्रिया इव हि देवाः ॥ ४ ॥ प्राणाः प्रयाजाः, स यो ह वा एवमेतान् प्राणान्

१. AO VI.13:109.28 : प्राणो. २. MHP °यदास्मा. ३. MHP °स्यान्यत्ताव° ; thus AO VI.13:109.30. ४. MHP °केष्टि स्याद्. ५. MHP पशुबद्धा. ६. MHP °बद्ध. ७. MHP सूयस्त्वा वह ८. MHP एनमासदित्ये. ९-९. MHP निरुद्ध...वो...भवि. १०-१०. MHP हैवास्याद्. ११. MHP broken. १२. MHP give the sign (=) of abridged text between दिव्या and आदित्य Caland. conjectures the possible reading as दिव्यादित्यो, the syllable आ being erroneously put after दिव्या in the Ms. AO VI.14:110.24 fn 3. १३-१३. MHP भ्रातृव्यान्नोप°. १४-१४. MHP तदेवा असुरा; AO VI.15:111.12 : तद् एवासुरा. १५. MHP wrongly add ह वा also before एषा. १६. MHP सा श्रीर्य°; thus AO VI.15:111.13 fn 2. १७. MHP पूर्वयज° १८. MHP °पविष्टयया°: thus AO VI.15:111.15. १९. MHP °नीयोनꣳ. २०. MHP नामकꣳ.

प्रयाजान् [वेद प्र हैव][१] प्रजया पशुभिर्मिथुनैर्जायते, प्रत्यस्मिँल्लोके तिष्ठत्यभि सुवर्गं लोकं जयति ॥ ५ ॥ अपाना अनूयाजाः स यदनूयाजानिष्ट्वा स्वरुं जुहोति देवानामेव तदपानेष्वन्नं दधाति; अथ ह वै तर्हि त्रय्यः प्रजा यज्ञमन्वायत्ताः पुरस्तात्प्रत्यञ्चो देवा, दक्षिणत उदञ्चः पितरः, पश्चात्प्राञ्चो मनुष्याः; स यदग्नीषोमीयस्य स्वरुं पश्चात्प्राङ् तिष्ठञ्जुहोति देवानामेव तदपानेष्वन्नं दधाति; अथ [यत्][२] सवनीयस्य स्वरुमुत्तरतो दक्षिणा तिष्ठञ्जुहोति पितृणामेव तदपानेष्वन्नं दधाति; अथ यदनूबन्ध्यस्य स्वरुं पुरस्तात्प्रत्यङ् तिष्ठञ्जुहोति मनुष्याणामेव तदपानेष्वन्नं दधाति; एतमन्वन्ये पशवस्तेषामेवमेव जुहुयात् ॥ ६ ॥ [१२] [इति सप्तमोऽनुवाकः]

आहितो ह वा एकोऽग्निराहृत एक उद्धृत एकः प्रहृत[३] एको विहृत एकः; गार्हपत्य एवाहितः सोऽस्मिँल्लोक आहित, इममेव तेन लोकमभिजयत्यस्मिँल्लोके प्रतितिष्ठति ॥ १ ॥ अन्वाहार्यपचन एवाहृतस्त[४]ꣳ ह्यन्यत इवाहरन्ति, स पितृलोक आहृतः पितृलोकमेव तेनाभिजयति, पितृलोके प्रतितिष्ठति ॥ २ ॥ आहवनीय एवोद्धृतः सोऽन्तरिक्ष[५][लोक उद्धृतोऽन्तरिक्ष]लोकमेव तेनाभिजयत्यन्तरिक्षलोके प्रतितिष्ठति ॥ ३ ॥ यमेवैतं प्राञ्चमाहवनीयात्प्रहरन्ति[६] स एव प्रहृतः स दिवि प्रहृतो दिविलोकमेव तेनाभिजयति दिविलोके प्रतितिष्ठति ॥ ४ ॥ येनैवैतत्पर्यग्निकुर्वन्ति स एव विहृतः, स दिक्षु विहृतो दिश एव तेनाभिजयत्यथो दिक्ष्वेव प्रतितिष्ठति ॥ ५ ॥ तं नु हैतदेके गार्हपत्यादेव प्रणीय यजन्त एषा योनिरिति वदन्तः; स यदेव कुर्वन्ति[...][७] प्रतिष्ठमिव वा अन्तरिक्षमन्तरिक्षमेव तेनाभिजयेद्[८]; य एनं तत्र ब्रूयात्प्रायतनादच्योष्टा[९] प्रतिष्ठितो भविष्यतीति, तथा हैव स्यात्; तस्मादाहवनीयादेवातिप्रणीय यजन्तेऽमुमेव लोकं[१०] [जि]त्वा स्वर्गं [लोकम]भ्यतिक्रामति[१०] ॥ ६ ॥ तदाहुर्- इष्टिपशुबन्धौ[११] संदध्यादिति; तदु वा आहुः- केष्टिः कः[१२] पशुबन्ध इति; अहर्वा इष्टी रात्रिः पशुबन्धः; तौ यद् व्यवच्छिन्द्याद् यथाऽहोरात्रे व्यवच्छिन्द्यात्तादृक् तत्; तस्मान्नु हैतावनु सꣳहितावेव स्या[ताम् ॥ ७ ॥ अथो वाग् वा इष्टिः प्राणः पशुबन्ध इति; तौ यद् व्यवच्छिन्द्याद्][१] यथा वाचं च

१. MHP om ; thus AO VI. 15 : 111.20-21. २. MHP om. ३. MHP प्रकृत ; thus AO VI. 16 : 112.26. ४. MHP °हृतꣳ; thus AO VI. 16 : 112.29. ५. MHP om; thus AO VI. 16 : 112.31. ६. MHP °नीयान्प्र°. ७. MHP broken ; caland conjectures प्रतिष्ठमिव as अप्रतिष्ठमिव, AO VI.16 : 113.3. ८. MHP °जयद्. ९. MHP °च्योष्ठाः प्रति°. १०-१०. MHP लोकं .... त्वा-सुवर्गं....भ्यतिक्रा° ; thus AO VI.16 : 113.6-7. ११. MHP °रिष्टपशु°. १२. MHP om; thus AO VI.17 : 114.11.

प्राणं च व्यवच्छिन्द्यात्तादृक् तत्; तस्मान्नु हैतावनु सꣳहितावेव स्याताम्[२] ॥ ८ ॥ त्रयस्त्रिꣳशद्वै पशुबन्धस्य तीर्थानि, चत्वार्युदयनान्येकादश प्रयाजा एकादशानुयाजा एकादशोपयजस्तानि [त्रयास्त्रिꣳशत्तीर्थानि, यत्पारे तीर्थं तदुदयनीय][३]मिति; एष ह वै तीर्थैः [४]प्रेत्योदयनैरुदेति य एवंविद्वान् पशुबन्धेन यजते ॥ ९ ॥ [१३] [इत्यष्टमोऽनुवाकः]

[५] ॥ इति पशुबन्धान्वाख्यानं समाप्तम् ॥[५]

॥ इति तृतीयः प्रपाठकः ॥

१. MHP broken ; thus AO VI.17 : 114.13-14. २. MHP स्यातः; thus AO VI. 17:114.15. ३. MHP broken. ४. MHP प्रत्योद॰. ५-५. MHP, AO इति पाशुबन्धी समाप्ता.

अथ चतुर्थः प्रपाठकः

[अथाग्निष्टोमान्वाख्यानम्]

का[१] देवता भवतीत्याहुर्यक्ष्य इति संकल्प्य[२]; मन एव, मनो वै प्रजापतिः, प्रजापतेर्व्या[प्तिमनु व्याप्नोति, प्रजापतेः सायुज्यꣳ सलोकतां जयति ॥ १ ॥ का देवता भवतीत्याहुर्य][३]क्ष्य इति व्याहृत्य; वागेव, वाग्वा इन्द्र, इन्द्रस्य व्याप्तिमनु व्याप्नोतीन्द्रस्य सायुज्यꣳ सलोकतां जयति ॥ २ ॥ यक्ष्य इति व्याहृत्य का देवता भवतीत्याहुर्दीक्षित इति; अग्निरेव रुद्रो वा[ऽऽत्तद][४]ण्ड इव चरते[५] दीक्षितः; घोर आत्तदण्ड इव चरत्येतस्यै हैव तद्देवतायै रूपं बिभर्त्यग्नेर्व्याप्तिमनुव्याप्नोत्यग्नेः सायुज्य[६]ꣳ सलोकतां जयति दीक्षितः ॥ ३ ॥ का देवता भवतीत्याहुः प्रसुत इ[व][७]; वायुरेव, वायुर्वै [८]यज्ञप्रसुतस्य प्रसुता; वायोर्व्याप्तिमनु[८] व्याप्नोति वायोः सायुज्यꣳ सलोकतां जयति सꣳस्थिते ॥ ४ ॥ अथो मनो वै प्रजापतिर्मनश्चन्द्रमाः प्रायणं तदुदयनम् ॥ ५ ॥ [१] [इति प्रथमोऽनुवाकः]

तदाहुः- किं देवयजनमिति; पृथिवी ह वाव देवयजनं, पृथिव्याꣳ हि[९] देवान् यजन्ते ॥ १ ॥ तदाहुः- किं देवयजनमिति; अग्निर्ह वाव देवयजनमग्नौ हि देवान् यजन्ते ॥ २ ॥ तदाहुः- किमेव देवयजनमिति; आपो ह वाव देवयजनमद्भिर्हि देवान् यजन्ते ॥ ३ ॥ तदाहुः- किमेव देवयजनमिति; ओषधयो ह वाव देवयजनमोषधीभिर्हि[९] देवान् यजन्ते ॥ ४ ॥ तदाहुः- किमेव देवयजनमिति; वनस्पतयो ह वाव देवयजनं वनस्पतिभिर्हि[१०] देवान् यजन्ते ॥ ५ ॥ तदाहुः- किमेव देवयजनमिति; पशवो ह वाव देवयजनं, पशुभिर्हि[११] देवान् यजन्ते ॥ ६ ॥ तदाहुः- किमेव देवयजनमिति; पयो ह वाव देवयजनं, पयसा हि[११] देवान् यजन्ते ॥ ७ ॥

१. MHP ता. २. MH संकथ्य. ३. MHP broken. ४. MHP broken. ५. MHP give the sign of broken text between चर and ते. ६. MHP सायुज्यस्स॰. ७. MHP om. ८-८. MHP यज्ञः प्र....... तस्या..... प्रसुतावाये..... विमनु. ९. MHP ह. १०. MHP ॰स्पतिर्ह. ११. MHP ॰भिह.

तदाहु:- किमेव देवयजनमिति; [१]दधि ह[१] वाव देवयजनं, दध्ना हि देवान् यजन्ते ॥ ८ ॥ तदाहु:- किमेव देवयजनमिति; आज्यꣳ ह वाव देवयजनमाज्येन हि देवान् यजन्ते ॥ ९ ॥ तदाहु:- किमेव देवयजनमिति; अन्नꣳ ह वाव देवयजनमन्नेन हि देवान् यजन्ते ॥ १० ॥ तदाहु:- किमेव देवयजनमिति; माꣳसꣳ ह वाव देवयजनं माꣳसेन हि देवान् यजन्ते ॥ ११ ॥ तदाहु:- किमेव देवयजनमिति; सोमो ह वाव देवयजनꣳ सोमेन हि देवान् यजन्ते ॥ १२ ॥ तदाहु:- किमेव देवयजनमिति; पुरुषो ह वाव देवयजनं पुरुषो ह्येतत् सर्वꣳ संभरति येन देवान् यजन्ते ॥ १३ ॥ तदाहु:- किमेव देवयजनमिति; ब्राह्मणो ह वाव देवयजनम् ॥ १४ ॥ [२]

ब्राह्मणो ह वाव देवयजनं योऽनूचानो बन्धुमाꣳश्चरणवान् सꣳशितव्रत:; तस्माद्य एवानूचानो बन्धुमाꣳश्चरणवान् सꣳशितव्रत: स्यात् तमृत्विजं वृण्वीत ॥ १ ॥ अनुविद्यो[२] ह वा अन्ये देवयजने यजन्तेऽननुविद्यान्ये[३]; एते नु हानुविद्य यजन्ते यानन्नूचाना[४] बन्धुमन्तश्चरणवन्त:[५] सꣳशितव्रता याजयन्ति[६]; अथ हैतेऽननुविद्य[७] यजन्ते याननन्नूचाना[८] अबन्धवोऽचरणा असꣳशितव्रता याजयन्ति ॥ २ ॥ दिविदेवयजना उ ह वा अन्ये पृथिव्यांदेवयजना अन्ये; एते नु ह दिविदेवयजना यानन्नूचाना बन्धुमन्तश्चरणवन्त:[९] सꣳशितव्रता याजयन्ति; अथ[१०] हैते पृथिव्यां-देवयजना[१०] याननन्नूचाना[११] अबन्धवोऽचरणा असꣳशितव्रता याजयन्ति ॥ ३ ॥ स यदि ह वा अप्येवंविद् गिरौ वा कर्ते वा प्रदरे वा विकूले वा याजयति तद्देवयजनम्; तस्माद्य एवानूचानो बन्धुमाꣳश्चरणवान् सꣳशितव्रत: स्यात् तमृत्विजं वृण्वीत, तद्धि देवयजनम् ॥ ४ ॥ [३] [इति द्वितीयोऽनुवाक:]

अग्निरमुष्मिँल्लोक आसीदादित्योऽस्मिन्, वायुरप्स्वासीद्[१२] वरुणोऽन्तरिक्षे, ता वा एता देवता एवमासन् ; तासामित्थं काम आसीद् यथैतर्हि— अग्निरकामयत पृथिव्याꣳ स्यामिति, पृथिव्यकामयताग्निर्मयि स्यादिति[१३]; वायुरकामयतान्तरिक्षे स्यामित्यन्तरिक्षमकामयत वायुर्मयि स्यादिति; आदित्योऽकामयत दिवि स्यामिति, द्यौरकामयतादित्यो मयि स्यादिति; वरुणोऽकामयताप्सु स्यामित्यापोऽकामयन्त वरुणोऽस्मासु स्यादिति ॥ १ ॥ ता अब्रुवन् कयाऽऽशिषा केन तपसा केन यज्ञेनेदं व्यश्नुवीमहि[१४], यथाकामा: स्म इति; सोऽग्निरब्रवीद् वरं वृणा अहं

१-१. MHP दधिर्ह. २. अनुविद्य+उ. ३. MHP यजन्ते। ननु वि°. ४. MHP यानूचाना. ५. MHP °वत:. ६. MHP याजन्ति. ७. MHP हैतेनानुविद्य. ८. MHP याननूचा° ९. MHP °वत:. १०-१०. MHP हैतेननुविद्य यजन्ते. ११. MHP याननूचाना. १२. MHP वायुरासीद्; thus AO VI.19a:116.10. १३. MHP स्यामिति. १४. MHP व्यश्नवी°.

[१]यज्ञोऽसानि मामालभध्वं मयेमं[२] कामं व्यश्नुध्वं यथाकामा:[३] स्थेति ॥ २ ॥ तेऽग्निं [४]पशुभूतमग्नये मेधायालभन्त; तस्यालब्धस्य मेधश्चासुश्चापाक्रामतां, पुरुष एव मेधोऽभवत् किंपुरुषोऽसु: ॥३ ॥ तं पर्यपश्यꣳस्तेऽब्रुवन्नप वा अस्यालब्धस्य मेधश्चासुश्चाक्रमिष्टा[४][५]ꣳ हन्तास्य मेधमालभामहा इति; ते पुरुषमालभन्त; तस्या[लब्धस्य मे][६]धश्चासुश्चापाक्रामताम्[७], अश्व एव मेधोऽभवद् गौरसु:[८] ॥ ४ ॥ तं पर्यपश्यꣳस्तेऽब्रुवन्नप वा अस्यालब्धस्य [९]मेधश्चासुश्चाक्रमिष्टाꣳ हन्तास्य मेधमालभामहा इति; तेऽश्वमालभन्त; तस्यालब्धस्य मेधश्चासुश्चापाक्रामतां, गौरेव मेधोऽभवद् गवयोऽसु: ॥ ५ ॥ तं पर्यपश्यꣳस्तेऽब्रुवन्नप वा अस्या[लब्धस्य][१०] मेधश्चासुश्चा[क्र][११]मिष्टाꣳ हन्तास्य मेधमालभामहा इति; ते गामालभन्त; तस्या-लब्धस्य मेधश्चासुश्चापाक्रामताम्, अविरेव मेधोऽभवदुष्ट्रोऽसु: ॥ ६ ॥ तं पर्यपश्यꣳस्तेऽब्रुवन्नप वा अस्यालब्धस्य मेधश्चासुश्चाक्रमिष्टाꣳ हन्तास्य मेधमालभामहा इति; तेऽविमालभन्त; तस्यालब्धस्य मेधश्चासुश्चापाक्रामताम् , अज एव मेधोऽभवच्छरभोऽसु: ॥ ७ ॥ तं पर्यपश्यꣳस्तेऽब्रुवन्नप वा अस्यालब्धस्य मेधश्चासुश्चाक्रमिष्टाꣳ हन्तास्य मेधमालभामहा इति; [तेऽजमालभन्त; तस्यालब्धस्य मेधश्चासुश्चापाक्रामतां, ताविमां पृथिवीं प्राविशतां, तौ खनन्त इवान्वीषुस्तावविन्दꣳस्ताविमौ व्रीहियवौ][१२] ॥ ८ ॥ ते व्रीहियवावलिप्सन्त, तावप: प्राविशतां, तौ मत्स्यौ प्रागिरतां, रोहित एव व्रीहिं प्रागिरच्चषो यवम् , उलूखलमुसले एव रोहित: शीर्षन्नकुरुत शूर्पं चष: ॥ ९ ॥ इष्टꣳ हास्याग्निमेधेन पुरुषमेधेनाश्वमेधेन गोमेधेनाविमेधेनाजमेधेन व्रीहिमेधेन यवमेधेन भवति य एवं-विद्वानष्टाकपालेन यजते य उ चैनमेवं वेद ॥ १० ॥ स यज्ञो देवेभ्यो निलायत[१३]; तं देवा: प्रेषै: प्रैषमैच्छꣳस्तेऽहोरात्रानर्धमासान्मासानृतून्संवत्सरꣳ सर्वाणि भूतानि पर्यायन्; तेऽब्रुवन्नप्सु वाव न एतर्ह्यनिष्ट[१४]ꣳ हन्ताप्स्विवच्छामेति; तेऽप्सूपनिवृक्षमैच्छन्; तत एतौ मत्स्यौ पर्यपश्यन्ननयोर्वा[१५] अन्यथेव शिरसी इति; तौ धियाधियालिप्सन्त; तस्मान्मत्स्यं धियाधिया लिप्सन्ते ॥ ११ ॥ तौ

१. MHP यज्ञे°; thus AO VI. 19a : 116.18. २. MHP मयेदं. ३. MHP °काममा. ४. MHP °भतम°. ५. MHP °क्रमिष्टारं. ६. MHP broken. thus AO VI. 19a : 116.24. ७. MHP °पाक्रमता°. ८. MHP गौरोसु. ९. MHP मेधश्चाक्रमि°. १०. MHP broken. ११. MHP broken. १२. MHP, AO. 19a : 117.5 om: From the reference to Ajamedha in following Khanda No. 10 we may conjecture the possibility of the existence of omitted text in original Ms: cf ŚB I.2.3.6. १३. MHP °निलायेत. १४. MHP ह्यरिष्टं; thus AO VI. 19a : 117.13. १५. M °न्नव्ययो°.

लब्ध्वोदहरꣳस्तौ[१] निरधून्वन्नेष मे योनिरित्युलूखलमुसले [व्रीहि:][२] प्रायच्छदेषा मे योनिरिति शूर्पं यवस्तावालिप्सन्त; तावब्रूतामेतावान् वाव यज्ञो यावदाव[३]ꣳ स्व:; आवञ्चेद् वा आलप्स्यध्वमेतावानेव यज्ञो भविष्यति, प्रजायावहै, तौ नौ प्रजातावालप्स्यध्वमिति ॥ १२ ॥ तौ[४] प्रजा: कथमिष्येथे[५] इति; तेभ्य: सीरलाङ्गलं प्रायच्छतामेतेन कृष्ट्वाऽनुसीतं वपतेति; तस्मात् सीरलाङ्गलेन कृष्ट्वाऽनुसीतं वपन्ति; तौ प्राजायेतां, तावब्रूतां प्र [नु वा][६] अजनिष्व[६क] ह्यष्टाशफौ पशू स्व एव नौ संभरतेति ॥ १३ ॥ मासोऽग्नि: कपालमाहरत् ॥ १४ ॥ [४]

मासोऽग्नि: कपालमाहरदर्धमासात्पृथिवी; पृथिव्याꣳ स्यामित्यग्नि: कपालमुपाधत्ताग्निर्मयि स्यादिति पृथिवी; ताभ्यां काम: समार्ध्यत; समस्मै काम ऋध्यते य एवं वेद ॥ १ ॥ पौर्णमास्या वायु: कपालमाहरदमावास्याया अन्तरिक्षम्; अन्तरिक्षे स्यामिति वायु: कपालमुपाधत्त, वायुर्मयि स्यादित्यन्तरिक्षम्; ताभ्यां काम: समार्ध्यत; समस्मै काम ऋध्यते य एवं वेद ॥ २ ॥ पूर्वपक्षादादित्य: कपालमाहरदपरपक्षाद् द्यौ:; दिवि स्यामित्यादित्य: कपालमुपाधत्तादित्यो मयि स्यादिति द्यौ:; ताभ्यां काम: समार्ध्यत; समस्मै काम ऋध्यते य एवं वेद ॥ ३ ॥ अह्नो वरुण: कपालमाहरद्रात्रिया आप:; अप्सु स्यामिति वरुण: कपालमुपाधत्त वरुणोऽस्मासु स्यादित्याप:; ताभ्यां[७] काम: समार्ध्यत; समस्मै काम ऋध्यते य एवं वेद ॥ ४ ॥ ता अब्रुवन्न[८] वाव न: किञ्चनाकमभूदिति तन्नाकस्य नाकत्वम्[८]; न ह वा अस्मै किञ्चनाकं भवति य एवं वेद, कमेव ॥ ५ ॥ इयꣳ ह वाव पूरन्तरिक्षं पूरसौ पूराप: पू:; ता देवा: पुरोदाशेनैव[९] व्याश्नुवत तत्पुरोडाशस्य पुरोडाशत्वम्; पुरोदाशो ह वै नाम तं पुरोडाश इत्याचक्षते परोक्षेण, परोक्षप्रिया इव हि देवा:; स यथो हैनेनैता देवता: पुरो व्याश्नुवतैवमु हैनेनैवंविद्[१०] यजमान इमाँल्लोकान् व्यश्नुते ॥ ६ ॥ तदाहु:- किमष्टाकपालमिति[११]; चतस्रो दिशश्चतस्रोऽवान्तरदिशा- स्तानि कपालान्यादित्य [१२][एव पुरोडाशस्तद्वा एतद्रेतसो रूपꣳ शुक्लस्य, शुक्लो ह्यसावादित्य एता]स्यै[१३] देवतायै सायुज्यꣳ सलोकतां जयति य एवं वेद। इत्यधिदेवतम्[१४] ॥७ ॥ अथाधिपुरुषम्; षोढाविहितꣳ ह[१५] शिरो हनू अष्टमे, तानि कपालानि; मस्तिष्क एव पुरोडाशस्तद्वा एतद्रेतसो रूपꣳ शुक्लस्य, शुक्लो

१. MHP लब्धोदरꣳस्तौ; thus AO VI.19a:117.16. २. MHP om; thus AO VI.19a:117.17. ३. AO VI.19a:117 fn 2 आवां. ४. MHP नौ; thus AO VI.19a : 117.20. ५. MHP कथनिष्येथे. ६. MHP broken. ६क. MHP अजनिष्य. ७. MHP तेभ्य:. ८-८. H om. ९. MHP पुरोडाशे°. १०. MHP हेने°. ११. MHP °कपाल इति. १२. MHP broken. १३. MHP स्य for स्यै. १४. MHP °धिदेवम्; thus AO VI.20:121.28. १५. MHP हि; thus AO VI.20:121.28.

ह्यसावादित्य [एत][१]स्यै देवतायै सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ८ ॥ तदाहुरित्थंविद: पश्यामो वै वयमष्टाकपालं चरन्तमिति; एताꣳ हि ते पश्यन्ति, पशुमान् भवति य एवं वेद ॥ ९ ॥ सप्त शीर्षण्या: प्राणा हृदयमष्टमं, तानि कपालानि; [एवमेतेनाङ्ग][२]व्याख्यानेनान्यो भवितुं कामयेत, नैव गौर्नाश्व:; को ह वै नाम कꣳ ह्येतत्कपालानां कपालत्वम्; साङ्गो ह सतनु: सप्राण: सकक्थ [२क]एतेनाङ्गव्याख्यानेनामुष्मिँल्लोके संभवन्[३] संभवति; [अष्टाकपाल][४] एव पुरोडाश एष प्रजापतिरेतस्यै देवतायै सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ १० ॥ इति न्वन्वाख्यानम्; अथात आदेशा एव ॥ ११ ॥ [५]

अथात आदेशा एव। तदाहुर्- यत्समवदेवाग्नेश्चान्यासां च देवताना- मेतस्मिन्पुरोडाशे भवत्य[थ कस्मान्नु हैषोऽग्निनैव क्रतुराख्यायते; स यदु][५] हैवादोऽग्निर्वरं वव्रे मयैवैष क्रतुराख्याता३ इति, तस्मान्नु हैषोऽग्निनैव क्रतुराख्यायते ॥ १ ॥ तदाहुर्- यदाग्नेय्यौ[६] याज्यानुवाक्ये **'अग्नयेऽनुब्रूह्यग्निं यज'** इति यजन्त्यथ क्वास्यैता[७] देवता: प्राश्नन्तीति[८]; **'अग्निर्मूर्धा'** इत्यग्नि:, **'दिव:'** इति द्यौ:, **'ककुद्**, इत्यादित्य:, **'पति:[८]'** इति वायु:[९], **'पृथिव्या अयम्'** इति पृथिवी, **'अपाम्'** इत्याप:, **'रेताꣳसि जिन्वति'** इति वरुण:, **'भुव:'** इत्येव पृथिवी, **'यज्ञस्य रजसश्च नेता'** इत्यन्तरिक्षम्[१०], **'यत्रा[११] नियुद्भि:'** इति वायु:, **'सचसे शिवाभि:'** इत्याप:, [१२]**'दिवि'** इति[१२] द्यौ:, **'मूर्धानम्'** इत्यादित्य:, [१३][**'दधिषे सुवर्षाम्'** इति वरु]ण:, **'जिह्वामग्ने चकृषे हव्यवाहम्'** इत्यग्निरित्यत्रो हैवास्यैता देवता: प्राश्नन्ति ॥ २ ॥ सो ह वै **'एष ते'** ता एव देवदेवता अधिवदति; **'यज्ञेन यज्ञम्[१४]=देवा:'** इति; **'यज्ञेन यज्ञमयजन्त देवा:'** इति स यदु हैवादोऽग्निनैवाग्निमीजिरे, तदु हैवापीदमेव ह्यग्निनैवाग्निं यजन्ते तदु हैवास्यैतत्; **'तानि धर्माणि प्रथमान्यासन्'** इत्येतदु हैवेदꣳ सर्वं प्रथमं बभूव; **'ते ह नाकं महिमान: सचन्त'** इत्येता उ हैवाष्टौ देवता नाकं महिमान: सचन्ते; **'यत्र पूर्वे साध्या: सन्ति देवा:'** इत्येता उ हैवेदं देवता अनुपूर्वꣳ साधयन्तीश्चरन्ति यदिदं किञ्च ॥ ३ ॥ तदाहुरित्थंविदो मा ब्राह्मणाय मा ब्रह्मचारिवासिने पुरोडाशं प्रदातेति, व्रीहियवयोर्ह्येवैषो[१५]ऽन्ततो मेध: समतिष्ठत ॥ ४ ॥ [६] [इति तृतीयोऽनुवाक:]

१. MHP broken. २. MHP broken. २क. AO VI.20:121.32: °तेनान्वाख्यायेना°. ३. MHP संभुवन्. ४. MHP broken. ५. MHP broken; thus AO VI.21:122.11. ६. MHP °दाग्नेयौ. ७. MHP °स्यैका. ८-८. MHP °तीत्य.....द्यौ: ककुदित्य..कं पतिर्. ९. MHP वायुं. १०. MHP °रिक्ष. ११. MP यत्वा, H यत्र. १२-१२. MHP देवीति. १३. MHP broken. १४. MHP abr, cf TS III.5.11.21. १५. MHP °वैषान्ततो.

प्रजापतिर्ह वावाष्टाकपालो[ऽष्टाकपालो][१] वावेदं[२] सर्वमिति मन्यमानोऽष्टाकपालेनादीक्षत; तस्मात्परि दिश आवर्तन्त परि भूतानि परि मासा अर्धमासा[२] ऋतवः संवत्सरः॥ १ ॥ स ऐक्षतेदं कृत्वा रात्स्यामीति वा अमंसि; तदिदमन्यथाऽभूदिति; स [३]विष्णुमपश्यत् त्रेधैषु[३] लोकेषु विक्रान्तम्; तस्य त्रीणि कपालान्याहरदिमानेव तल्लोकाँस्तानेतेष्वष्टास्वप्यसृजत[४]; स एतेनाग्नाग्नावैष्णवेनैकादशकपालेनादीक्षत; ततो वै तमभि दिश आवर्तन्ताभि भूतान्यभि मासा अर्धमासा ऋतवः संवत्सरः॥ २ ॥ तं दिशोऽभ्यावृत्यैक्षन्त तद्दीक्षितस्य दीक्षितत्वं, दिग्भिर्ह वै नामेक्षितस्तं दीक्षित इत्याचक्षते परोक्षेण, परोक्षप्रिया इव हि देवाः॥ ३ ॥ य यज्ञो देवेभ्यो निलायत, तं देवा यज्ञक्रतुभिरन्वैच्छन्, तं यज्ञक्रतुभिर्नान्वविन्दन्, त[५](मिष्टिभिः प्रैषमैच्छन्, यदिष्टिभिः प्रैषमैच्छंस्तदिष्टीना)मिष्टित्वम्; तमेतेनाग्नावैष्णवेनैकादशकपालेनान्वविन्दन्॥ ४ ॥ सो ह वा एषाऽ[६]नुवित्तिर्नामेष्टिर्यदाग्नावैष्णवः, स यमाग्नावैष्णवमनिरुप्य दीक्षयन्त्यननुवित्तयज्ञमु हैव तं दीक्षयन्ति; अथ यमाग्नावैष्णवं निरुप्य दीक्षयन्त्यनुवित्तयज्ञमु हैव तं दीक्षयन्ति॥ ५ ॥ अन्नं वा आपोऽन्नं नवनीतमन्नं दर्भपुञ्जीलानि श्रीर्वासः श्रीराञ्जनमाग्नावैष्णव एव दीक्षा सौम्य एवैषोऽध्वरो यदेता आहुतयः **'आकूत्यै'** इति; स यमाग्नावैष्णवमनिरुप्य दीक्षयन्ति बहिर्धा तस्य यज्ञाच्छ्रियमन्नाद्यं दधति, तत्तद् व्यर्धुकं[७], तत्तद् व्यथते; तन्नु हैतदेवं न कुर्यात्॥ ६ ॥ अथ यमाग्नावैष्णवं निरुप्य दीक्षयन्ति दीक्षया च तस्य सौम्येन चाध्वरेण श्रीरन्नाद्यमुभयतः परिगृहीतं भवति, तत्तत् समर्धुकं, तत्तन्न व्यथते; तन्नु हैतदेवमेव कुर्यात्॥ ७ ॥ तदु वा आहू रेतसो वा एतद्रूपम्॥ ८ ॥ [७]

तदु वा आहू रेतसो वा एतद्रूपं यदाग्नावैष्णवो, यज्ञो यजमानो, रेत एव वा एतस्मिन्काले यजमाने[८] भवतीति॥ १ ॥ तन्नु हैतदेके निरुप्याग्नावैष्णवमभिषिञ्चन्ति; स यदेवं कुर्याद्यथा रेतो विनेनिज्यात् तादृक् तत्; तन्नादृत्यम्॥ २ ॥ तद्वा इदमन्वाहुर्- अङ्गिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रा(वेशयन्नप्सु स्नाति साक्षादेव दीक्षातपसी)[९] अवरुन्ध इति; स यमाग्नावैष्णवं निरुप्याभिषिञ्चति [१०][दीक्षात]पोभ्या[मु है][११]वैनं समर्धयति॥ ३ ॥ तीर्थे स्नाति तीर्थमेव समानानां

१. MHP om. २. MHP twice. ३-३. MHP विष्णुर्यपश्यत्रेधेषु [M °त्रैधे]. ४. MHP °ष्टाप्यसृ°. ५. MHP abr. as त=मिष्टित्वम्; cf. ABr. I.2; AO VI.12 : 123.23 supplies त(मिष्टिभिः प्रैषमैच्छन् तदिष्टीना)मिष्टित्वं. ६. MHP °वित्तिन्ना°. ७. MHP द्व्यर्धक. ८. MHP यजमानो; thus AO VI.24:125.16. ९. MHP abr; see TS VI.1.1.5. १०. MHP broken. ११. MHP broken.

भवतीति; तदाहुः- कतमत्तत् तीर्थमित्यूर्ध्वमाग्नावैष्णवादेताभ्य आहुतिभ्यः **'आकूत्यै'** इत्येतद्ध वै तत् तीर्थं तीर्त्वेव[१] हि मन्यते,ऽथ यदग्निहोत्रं जुहोति तत्तीर्थं तीर्त्वेव[१] हि मन्यते, ऽथ यद्दर्शपूर्णमासाभ्यां यजते तत्तीर्थं तीर्त्वेव[१] हि मन्यते, ऽथ यच्चातुर्मास्यैर्यजते तत्तीर्थं तीर्त्वेव[१] हि मन्यते, ऽथ यदिष्टिपशुबन्धाभ्यां यजते तत्तीर्थं तीर्त्वेव[१] हि मन्यते, ऽथ यत्सौम्येनाध्वरेण यजते तत्तीर्थं तीर्त्वेव हि मन्यते,ऽथ यद्[२] ब्राह्मणं परि वा वेवेष्टि[३] ददाति वा तस्मै तत्तीर्थं तीर्त्वेव[१] हि मन्यते; वागु ह वाव तीर्थं, स य एनयाऽनृतं वदति न हैनया स किञ्चन तरति; अथ य एनया सत्यं वदति स हैनया तरति; एतावन्त्यु ह वै तीर्थानि; तीर्तं स्वानां भवति य एवं वेद॥ ४ ॥ [८] [इति चतुर्थोऽनुवाकः]

प्रजापतिः प्रियं पुत्रं लौहायस्यां चब्वां[४] गुहास्वन्तरदधात्[५]; सोऽदृश्यमानो देवानावददृश्यमानोऽसुरानभ्यतपत्; तेऽसुरा ऐच्छन्त प्रजापतिर्वाव न इदं पिता सजातमिति गोश्चर्मणि हिरण्यमाददत; ते देवाः पितरं प्रजापतिमब्रुवन्-प्रजापते ये ते ज्येष्ठाः पुत्रा धनं त आदिषत किं वयं भवामेति॥ १ ॥ सोऽब्रवीत् प्रजापतिश्छन्दसां वीर्यमादाय तद् वः प्रदास्यामीति; स छन्दसां वीर्यमादाय तदेभ्यः प्रायच्छत्; तानसुरा अब्रुवन्नेतेदमुभयेऽन्विच्छाम यदिदमदृश्यमानमस्मानभितपत्यदृश्यमानं युष्मानवतीति; तान्[६] देवा अब्रुवन्नेवमस्त्विति; तेऽदीक्षिता[७] अयजन्त, ते न काञ्चन सम्पदं व्याश्नुवत॥ २ ॥ अथ ह वै तर्हि हीनकाना नाम मनुष्या आसंस्ते पितरं प्रजापतिमब्रुवन्- प्रजापते ये ते ज्येष्ठाः पुत्रा धनं त आदिषत, छन्दसां वीर्यं देवेभ्यः प्रादाः किं वयं भवामेति; तेभ्य एतमाग्नावैष्णवमेकादशकपालं दीक्षां तपः प्रायच्छत्॥ ३ ॥ तान् देवा अब्रुवन्नेतेदमुभयेऽन्विच्छाम यदिदमदृश्यमानमस्मानभितपत्यदृश्यमानं युष्मानवतीति; देवा यूयं स्थेत्यब्रुवन् मनुष्या वयम्; यदेतमुभयेऽन्विच्छाम किं भवामेति; यो वोऽनुब्रवातै[८] यः[९] श्राम्याद्[९] यो यजातै यो ददाद् यः साधु करवाद् देवानामेव स एकोऽसदिति; तस्माद् योऽनुब्रूते यः श्राम्यति यो यजते यो ददाति यः साधु करोति देवानामेव स एको भवति॥ ४ ॥ त एतेनाग्नावैष्णवेनैकादशकपालेनादीक्षन्त; तत्तपस्तप्त्वोभयेऽन्विच्छन् प्राञ्चो होतार ऐच्छन् प्रत्यञ्चोऽध्वर्यव उदञ्च उद्गातारो दक्षिणा चमसाध्वर्यवः; तस्मात् प्राङासीनो होता शंसति, प्रत्यङ्[१०] तिष्ठन्नध्वर्युः प्रत्यागृणात्युदङ्ङ-

१. MHP तीर्थेव; thus AO VI.25:125-126, 1-6. २. MHP wrongly repeat इष्टिपशुबन्धाभ्यां यजते तद् after यद्. ३-३. MHP वा वेष्टि. ४. H च वां. ५. MHP °रधात्; thus AO VI. 26a : 126.15. ६. MHP om; thus AO VI. 26a:126.22. ७. MHP AO VI, 26a:126.23: ते दीक्षिता. ८-८. MP वो नुब्रुवातै, H वानुब्रु; thus AO VI.26a:126.31. ९-९. MHP यश्रामाभ्य. १०. MHP प्रत्यङ्ङति.°

वृत्योद्गातोद्गायति, दक्षिणा चमसाध्वर्यवो मार्जयन्ते[१] ॥ ५ ॥ तदेभ्य एषा देवताभाच्चात्वाल, इदं नु भातीवेति[२], तदन्वखनꣳस्तस्मादेतत्[३] खायत इव यच्चात्वालः; तत् तत उदद्रवत् , तदाग्नीध्रीयं[३क] धिष्णियं प्रापद्यत, तत् तत्राभात्, तत्र परिनिषद्यास्तुवत; तत् तत उदद्रवत्, तद्धोतुर्धिष्णियं प्रापद्यत, तत् तत्राभात्, तत्र परिनिषद्यैवास्तुवत; तत् तत उदद्रवत्, तन्मैत्रावरुणस्य धिष्णियं प्रापद्यत; [तत् तत्राभात्, तत्र][४] परिनिषद्यैवास्तुवत; तत् तत उदद्रवत्, तद्ब्राह्मणाच्छꣳसिनो धिष्णियं प्रापद्यत; तत् तत्राभात्, तत्र परिनिषद्यैवास्तुवत; तत् तत उदद्रवत्, तत् पोतुर्नेष्टुरच्छावाकस्य मार्जालीयमित्येतान् धिष्णियान् प्रापद्यत; तत् तत्र त[त्राभात्, तत्र तत्र][५] परिनिषद्यैवास्तुवत; [६]तत् ततस्तत[६] उदद्रवत्, तदाग्नीध्रं प्रापद्यत, तदाग्नीध्रे गृहीत्वाऽऽरभ्योपावसꣳस्तस्मादाग्नीध्रे सँवसन्ते; एतामु हैवैतद्देवताममृतामारभ्य गृहीत्वोपवसन्ति; तस्माद् यत्रयत्रैषा देवताऽभात् [७]तदेवानु देवविहितिम्[७] ॥ ६ ॥ तत् तत उदद्रवत्, तद्धविर्धाने प्रापद्यत ॥ ७ ॥ [९]

तद्धविर्धाने प्रापद्यत, तज्जोषं कृत्वाऽनुप्रापद्यत; तस्माज्जोषंकृतेषु राजानं प्रपादयत्येतामेवानु देवविहितिम्[८]; तदभ्यष्टुव[९]ꣳस्तद् ग्रहानगृह्णन्त ॥ १ ॥ तदेभ्यो ग्रहगृहीतं तिरो[ऽभवत्, तद् विता][१०]सेन[मृग][११]मत्सरत्; तस्माद् वितासेनमृगं[१२] त्सरन्ति[१२]; तस्मान्नु [१३]हैतदप्येतर्ह्यध्वर्यवः त्सरन्तीव प्रश्रिताः प्रस्तेरण द्रवन्तः ॥ २ ॥ तत् त्रिवृता स्तोमेनान्वैच्छन् , पञ्चदशेनान्वविन्दन्, सप्तदशेनाहरन्नेकविꣳशेन सुवर्गे लोके[१४][ऽगच्छन्...एकविꣳश आ]दित्यः; तस्य[१५].... णस्य प्रियमाणस्य प्रियं रेतोऽपतत्, सोऽब्रवीत् को म इदꣳ संभरिष्यतीति; सा गौरब्रवीद् वरं वृणा अहमेतत् संभरिष्यामि, पश्यतःपश्यतः प्रियाऽसानीति; तद् गौः[१६] समभरत्; तस्माद् गौः पश्यतःपश्यतः प्रिया; पश्यतःपश्यतः [प्रियो भवति य एवं वेद ॥३ ॥ सोऽब्रवीत्][१७] को[१८] म इदमनु[१९] समागमयिष्यतीति; किं स स्याद्य एनमेतदनु समागमयेदिति; देवानामेव स एकोऽसदिति; तस्माद्योऽग्निहोत्रं जुहोति, यः सोमेन यजते, यः सान्नाय्येन, देवानामेव स एको भवति, स ह्येतदनु समागमयति ॥ ४ ॥

१-१. MHP °यते. २. MHP भाति वेति; thus AO VI.26a:127.8. ३. MHP °दतैतत्. ३क. MHP तदग्निध्रियं; thus AO VI.26a:127.9. ४. MHP broken. ५. MHP broken. ६-६. MHP तत्तत; thus AO VI. 26a:127.17. ७-७. MHP तदेवाना...विहितिं; AO VI.26a:127.21 : तद् देवना...विहितम्. ८. AO VI.26b:129.16-17 : °यत्येतम° विहितं. ९. MHP °भ्यष्टवन्. १०. MHP broken. ११. MHP broken. १२. MP °मृगन्यरन्ति, H °मृगं भरन्ति. १३. MHP हैतदप्येवैत°. १४. MHP broken; thus AO VI.26b : 129.22. १५. MHP broken after तस्य. १६. MHP गौर°. १७. MHP broken. १८. MHP का. १९. MHP इदमानु.

तच्छ्रायन्तीयेनाश्रयते[१]|ति, यच्छ्रायन्तीयेनाश्रयꣳस्तच्छ्रायन्तीयस्य श्रायन्तीयत्वम् ॥ ५॥ तद् वारव|न्तीयेनावारय|न्, यद् वारवन्तीये|[१]नोपरिष्टादवारयꣳस्तद्वारवन्तीयस्य वारवन्तीयत्वम् ॥६ ॥ श्यैतेन श्येती अकुरुत तच्छ्यैतस्य[२] श्यैतत्वम्; तस्मान्मृगꣳ श्यैतं कुर्वन्ति ॥ ७ ॥ प्रमꣳहिष्ठीयेनोपरिष्टात्प्रमादयꣳस्तत्प्रमꣳहिष्ठीयस्य प्रमꣳहिष्ठीयत्वम्; तस्माच्छ्रेष्ठमागतं प्रमादयति, विन्द[ते][३] प्रमदं य एवं वेद ॥ ८ ॥ तद् देवाः समन्तं पर्यविशन्, वसवः पुरस्ताद्, रुद्रा दक्षिणत, आदित्याः पश्चाद् विश्वेदेवा उत्तरतोऽङ्गिरसोऽधस्तात्, साध्या उपरिष्टात्; सा ह वा एषा देवतैवं परिविष्टा; परि हैनꣳ स्वाविशन्ति, विन्दति परिवेष्टारं य एवं वेद ॥९ ॥ तच्छन्दाꣳस्यन्वायन्; [४]तदत्येकान्यरिच्यन्त, नैकानि व्याश्नुवत; बृहत्येवास्पृशत् संप्रति सुवर्गं लोकं दशभिर्दशभिरन्तरिक्षं दशभिरिमं लोकꣳ षड्भिर्ऋतूनिति; इतरं द्वादशभिरिमं लोकं द्वादशभिरन्तरिक्षं द्वादशभिरमुं लोकम् ॥१० ॥ तानीमान्यूनाति-रिक्तानि छन्दाꣳसि बृहतीमब्रुवन् बृहति[५] यो वै[६] समानानामृध्नोति तमुपसमायन्त्युप[७] वायाम यथैतदसदिति[८]; सा तथेत्यब्रवीद्, वशं तु म इतेति; तान्यस्यै वशमायन् ॥ ११ ॥ सा जगतीमब्रवीद्— द्वादशाक्षराणि गायत्रियै प्रत्यूहेति; तानि प्रत्यूहत्[८क]; ते द्वे बृहत्यौ भूत्वा बृहतीमप्यैताम्; सा[९] त्रिष्टुभमब्रवीदष्टाक्षराण्युष्णिहे प्रत्यूहेति; तानि प्रत्यूहत्; ते द्वे बृहत्यौ भूत्वा बृहतीमप्यैताम्[९]; सा पङ्क्तिमब्रवीच्चत्वार्यक्षराण्य-नुष्टुभे प्रत्यूहेति; तानि प्रत्यूहत्; ते द्वे बृहत्यौ भूत्वा बृहतीमेवाप्यैताम्; बृहत्येव बृहत्यभवत् ॥ १२ ॥ ता वा एताः सप्त बृहत्यः सप्तैते [१०]रश्मय आदित्यस्य[१०]; त[११] उ ह वा एत[१२] इम एवाभि पुरुषं प्राणा भवन्ति यद् बृहत्यः; एतैरुवेव प्राणैरादित्य-मुद्यन्तमनुसमारोहत्येवंविदस्माल्लोकात् प्रेयन् ॥ १३ ॥ स उ ह वा एष एव छन्दोरथो यद् बृहत्योऽश्वाश्चत्वारश्चक्रे षष्ठ्यौ[१३] रथः सप्तमः; एतेन छन्दोरथेनादित्य इमान् लोकाननु समीयते; वहन्ति हैनं चतस्रः संयुक्ता य एवं वेद ॥ १४ ॥ [१०] [इति पञ्चमोऽनुवाकः]

अग्निर्ह वावाग्निरादित्य एव विष्णुरेष आग्नावैष्णव, एषा दीक्षा; स देतावन्तरेण तदस्याभि दीक्षितं भवति य एवं वेद ॥ १ ॥ वायुर्ह वाव विष्णुरेष

---

१. MHP broken between °श्रयते and न्तीयेनावारय [MHP स्तयन्वारय] and before नोप° cf TB. I.5.12.1; JB. II.112. २. MHP तच्छ्येत°. ३. MHP broken. ४. MHP तं; thus conjectured AO VI. 26d:130 fn 1-2. ५. MHP बृहती. ६. MHP वे. ७. MHP समाययन्त्यु. ८. MHP यतैतदसीति; thus Ao VI. 26d:130.18. ८क. Caland conjectures the text as प्रत्यौहत् AO VI.26d :130 fn 4. ९-९. MHP twice. १०-१०. MHP twice. ११. AO VI. 26d : 130.25 : ता. १२. AO ibid : एता. १३. बृहत्यौ implied AO VI. 26d:130 fn 5.

हीदः सर्वं विशति[१] यदिदं किञ्चापि ह्येष तत्र भवति यत्रैनं न मन्यन्ते[२]; स यद्वायुः स्पृशति तदस्याभि दीक्षितं भवति य एवं वेद ॥ २ ॥ आपो ह वाव दीक्षा; स यदापः स्पृशन्ति तदस्याभि दीक्षितं भवति य एवं वेद ॥ ३ ॥ विद्युद्ध वाव दीक्षा; स यदभिविद्योतते तदस्याभि दीक्षितं भवति य एवं वेद ॥ ४ ॥ स्तनयित्नुर्ह वाव दीक्षा; स यदभिस्तनयति तदस्याभि दीक्षितं भवति[३] य एवं वेद ॥ ५ ॥ [४]मनो ह वाव दीक्षा; स यन्मनसा ध्यायति तदस्याभि दीक्षितं भवति य एवं वेद ॥ ६ ॥ तद् वा एतद् [५]वाक् चैव[५] मनश्च मिथुनः स्त्र्येव विद्युत् पुमान् स्तन[यि]त्नुः[६]; सा ह वा एषा देवता व्यस्यते[७] यद्विद्योतते, तामभिक्रन्दति यत् स्तनयति[८], यत्रो[९] वै विद्योतते स यथा वडवा वृषाणं दृष्ट्वा व्यस्यत एवः ह वा एषा देवतैतदेव तं वृषाणं दृष्ट्वा व्यस्यते, यद्विद्योतते तामभिक्रन्द[ति][१०] यत् स्तनयति यत्रो वै[११] विद्योतते; स यदभिस्तनयति तावेवमेव सर्वाणि भूतानि प्रजनयन्तौ परीतः; सा ह वा एषा सामान्येन देवता वाग् विद्युत् स्नययित्नुरापो वायुरिति; स यद्वायुः स्पृशति तदस्याभि दीक्षितं भवति य एवं वेद ॥ ७ ॥ [११] [इति षष्ठोऽनुवाकः]

वसन्तो ग्रीष्मो वर्षा अभिपूर्यमाण[पक्षः][१२] पूर्वा[ह्णोऽह][१३]रेते ह देवा ऋतवोऽवन्ति हैनं देवा देवहूत्या[१४] य एवमेतान् देवान् ऋतून् वेद ॥ १ ॥ शरद्धेमन्तः शिशिरोऽवाच्छन्नापरपक्षोऽपराह्णो रात्रिरेत उ ह [पितर ऋतवोऽवन्ति हैनं][१५] पितरः पितृणाः हवेषु य एवमेतान् पितृनृतून् वेद ॥ २ ॥ [१६][यस्मादेत ऋत]वः पितरस्तस्मात् तेषु न कुर्वीत; पूर्वाह्ण एव दीक्षेत; [१७]त उ ह वा एत[१७] एव लोका उरामथयो यदृतवः पितर; एते[१८] ह वै तस्य यज्ञं मथ्नन्ति यो[१९]ऽपराह्णे दीक्षत[२०]; एतेषामु ह वाव परिचक्षा प्रातःसवनं माध्यन्दिनः सवनं, नापराह्णे सवनं नाम तृतीयसवनमित्येवोदाचक्षत एतस्यापभाषस्य[२१] भीषेतीदः स्थापयन्ति य

१. MHP विशन्ति. २. MHP मन्यते; thus AO VI.27:132.8. ३. MHP wrongly repeat यत्रैनं न मन्यते, स यद्वायु स्पृशति तदस्याभि दीक्षितं भवति after भवति. ४. MHP wrongly add आपो before मनो. ५-५. MHP वाक्वेव. ६. MHP स्तनत्नु. ७. MHP प्यस्य ते. ८. MHP यच्छ्नूनयति. ९. M यत्तो वो, HP यत्र वो. १०. MHP om. ११. MHP तै. १२. MHP broken; thus AO VI.28a:133.2. १३. MHP broken; thus AO ibid. १४. MHP देवदूत्या; thus AO VI.28a:133.3. १५. MHP. AO VI. 28a:133.5 om. १६. MHP broken; thus AO VI.28a:133.6. १७-१७. MHP स उ ह वा एष; thus AO VI.28a:133. f.n. 4. १८. M एतेर्ह, HP एतैह. १९. MHP ये°. २०. MHP दीक्षन्ते. २१. MHP °स्यावभाष°; thus AO VI.28a:133.10.

एवंविदः ॥ ३ ॥ तन्नादृत्यम्[१]; एतेषु ह वा ऋतुष्विन्द्रो जातो, माघे ह वै जातस्तस्मान्नु ह मघवान्नाम; तमाप्नुवन्ति[२] सर्वाणि भूतानि; एतस्यै देवतायै सायुज्यं सलोकतां जयति य एवं वेद ॥ ४ ॥ मिथुनस्यो वा एतद्रूपं यद् दीक्षायै, गुहेव[३] हि मिथुनमिष्यते, गुहेव[३] रात्रिस्तस्मान्नु ह सायमेव दीक्षेत ॥ ५ ॥ रेतसो वा एतद्रूपं यद् दीक्षायै, गुहेव[४] हि रेतः सिच्यते, गुहेव[४] रात्रिस्तस्मान्नु ह सायमेव दीक्षेत ॥ ६ ॥ गर्भस्यो वा एतद्रूपं यद् दीक्षितः; तं गर्भं भवन्तः सर्वाणि भूतानि गर्भोऽनुभवन्ति; तस्मान्नु ह सायमेव दीक्षेत ॥ ७ ॥ अस्तमु ह वा एतां देवतां यतीं रात्रिर्गर्भं धत्ते; तां गर्भं भवन्तीं सर्वाणि भूतानि गर्भोऽनुभवन्ति; तस्मान्नु ह सायमेव दीक्षेत ॥ ८ ॥ तन्नु हैतदेके पूर्वाह्ण एव दीक्षन्ते ॥ ९ ॥ [१२]

तन्नु हैतदेके पूर्वाह्ण एव दीक्षन्ते; स यथा वारणं नागः हस्तिनमारण्यमुद्द्रुतमन्वा[५]रिरीप्सेतैवः ह वा एत एतां देवतामुद्द्रुतामन्वारिरीप्सन्ते ये पूर्वाह्णे दीक्षन्ते, तां नाप्नुवन्त्युद्द्रुतेव ह्येषा देवता तदास्माल्लोकाद् भवति ॥ १ ॥ अथो यथा [६]वारणं नागः [६]हस्तिनमारण्यः सःशान्तः[७] सुप्तमधिरोहेदेवः ह वा एत एतां देवताः सःशान्ताः सुप्तामधिरोहन्ति येऽपराह्णे दीक्षन्ते, तामाप्नुवन्ति, सःशान्तेव[८] ह्येषा देवता [९]तदास्मिन् लोके भवति तया सहामुं लोकमुद्द्रवति[१०], सहेमं लोकं पुनरागच्छति ॥ २ ॥ तदु[११] ह वा एताविन्द्राग्नी एवैतस्यां देवतायामस्तमितायाः संपद्येते[१२]; स यदेनयोर्हस्तौ प्रतपत[१३] एते एव तद् देवते आरभते; अथ यद्धस्तौ प्रतप्य[१४] मुष्टीकरोत्येते एव तद् देवते अभिदृढमारभते यथाऽऽभ्यां नावच्छिद्येयेति ॥ ३ ॥ स यो ह वा एवंविदं दीक्षितमेवंविदा वा दीक्षितमुप वा मीमाःसेतानु वा व्याहरेत् तं ब्रूयादेतस्यै त्वा[१५] देवताया आवृश्चामि यद् देवते[१६] आरभासै[१७]; त्वमेवैतामार्तिमारिष्यसीति; शश्वद्ध तथैव स्याद् यथैनं ब्रूयात्; तस्मान्नु ह यज्ञस्याविदेव स्यान्नोपद्रष्टा ॥ ४ ॥ [१३] [इति सप्तमोऽनुवाकः]

१. MP तनादृ°, H तदनादृ°. २. MHP तन्नाप्नु°. ३. MHP गुहैव; thus AO VI. 28b.134.15-16. ४. MHP इहेव; thus AO VI. 28b:134.17. ५. MHP °मन्थारि°. ६-६. MHP वारणं नागं हस्तिनं repeated. ७. MHP संशास्तं; thus AO.VI.28c : 135.8. ८. MHP संशातेव. ९. MHP तदस्मि°; thus AO VI. 28c:135.10. १०. MHP °मुद्रवति. ११. MHP तावु; thus AO VI.28d:135.29. १२. MHP संपद्येत. १३. MHP व्रतवत; in P corrected as व्रतपत; thus AO VI. 28d:135.30. १४. MHP व्रतस्य; thus AO VI.28d:135.31. १५. MHP त्वाव. १६. MHP यदेवते. १७. MHP आरभ्यासै; thus conjectured AO. VI. 28d:136 fn. 2.

प्रजापतिश्छन्दाꣳस्यसृजत; तानि सृष्टान्यशनायन्; तान्यन्नस्यैवादीध्यन्त[१]; स ऐक्षत प्रजापतिः कथं तान्यशनायेयुर्यान्यहꣳ[२] सृजेयेति; तेषामाधीताच्चत्वार्येतानि[३] यजूꣳषि मिथुनान्यसृजत '**आकूत्यै प्रयुजेऽग्नये स्वाहा**' इति, स्त्री[४] वा आकूतिः प्रयुक् प्रजापती रेत एवाग्निः; '**मेधायै मनसेऽग्नये स्वाहा**' इति, स्त्री वै मेधा मनः प्रजापती रेत एवाग्निः; '**दीक्षायै तपसेऽग्नये स्वाहा**' इति, स्त्री वै दीक्षा तपः प्रजापती रेत एवाग्निः[५]; '**सरस्वत्यै पूष्णेऽग्नये स्वाहा**' इति, स्त्री वै सरस्वती पूषा प्रजापती रेत एवाग्निः॥ १॥ स एतामग्ने रेतसोऽधि दिव्यां धारामसृजत प्रजापतिश्छन्दोभ्योऽन्नमक्षितिम्; '**आपो देवीर्बृहती[६]र्विश्वशम्भुवो द्यावापृथिवी**' [७]इत्येव रसेन[८] समतर्पयत्; '**उर्वन्तरिक्षं बृहस्पतिर्नो हविषा वृधातु**' इति बृहस्पतिर्नोऽन्नेन वर्धयत्विति वाव छन्दाꣳस्यब्रुवन्; एतया हास्य दिव्यया[९] धारयाऽद्भिः सन्तृप्तो लोको न क्षीयते य एवं वेद॥ २॥ तमाशयं पर्यैक्षत प्रजापतिः; स ऐक्षतास्ति न्वा अस्मिन्भोग्यमिति; तं पर्यैन्द्ध, तस्मादृचो[ऽसृजत][१०]; तं पर्यैवैन्द्ध, [तस्मा][११]द्यजूꣳष्यसृजत; [तं पर्यैवैन्द्ध][१२], तस्मात्सामान्यसृजत; तं पर्यैवैन्द्ध, तस्मात्सम्पन्निदेशमेकपरमसृजत[१२क]; तं पर्यैवैन्द्ध, तस्मादन्वाख्यानान्यसृजत; तं पर्यैवैन्द्ध, तस्माद् गाथानाराशꣳसीरसृजत; तं पर्यैवैन्द्ध, तस्माद्रैभी[रसृजत॥ ३॥ तदस्मा अ][१३]च्छदयत्; तस्य [१४][र]सोऽपास्रवत्; तस्मिन्नानीयाप्स्वोषधीषु वनस्पतिषु विन्यदधात्; तन्मध्वभवत्; उल्बस्यो वा[१५] एतद्रूपं यन्मधु॥ ४॥ [१४]

उल्बस्यो[१५] वा एतद्रूपं यन्मधु; तस्माद् ब्रह्मचारी मधु नाश्नीयादिति; तदु वा आहुर्- एषा चेद् वा अस्मिन् परिचक्षा स्यात्, स्ना[त्वा मध्वश्नीयात्][१६]; स यद् ब्रह्मचारी मध्वश्नाति छन्दाꣳस्येव रसेन प्रीणात्यथो छन्दःस्वेव रसं दधाति; तस्माद् ब्रह्मचार्येव मध्वर्हति, ब्रह्मचारी हि मधव्यः॥ १॥ [१७]तद् या[१७] वासन्तिका मधुकृतो मधुकुर्वन्ति प्रातःसवनीया[१८] हैव ता निविदोऽथ या ग्रैष्मा म[धुकृतो मधु कुर्वन्ति माध्यन्दिनीया हैव ता निविदोऽथ या वार्षि][१९]का मधुकृ[तो][२०] मधु कुर्वन्ति

१. MH तान्यन्यस्यै°; P तान्यस्यै. २. MHP °शनायेयेयुर्न्याहं. ३. MHP °माधीतच्चत्वा°; thus AO VI.29a : 136.30. ४. MH स्त्रीणि, P त्रीणि. ५. MHP °ग्नस्, ६. MHP °र्व्यहती°. ७. MHP om इति. ८. M.HP रसन; thus AO VI. 29a : 137.6. ९. MHP तिव्य°. १०. MHP broken. ११. MHP om. १२. MHP om. १२क. AO VI.29a:137.13: °मेकापर°. १३. MHP broken; °च्छादयत्; thus AO VI. 29a : 137.16. १४. MHP broken. १५. MHP उद्बस्यो : thus conjectured AO VI. 29:138.fn.3.१६. MHP broken; thus supplied AO VI. 29b:138.19-20. १७-१७. MHP तया. १८. MHP °नीयान. १९. MHP broken. २०. MHP broken.

तृतीयसवनीया हैव ता निविदः॥ २॥ तद् वा[१] एतदग्निष्टोमसंमितं यन्मधु; य एवंविद्वान् ब्राह्मणाय मध्वाहरत्यग्निष्टोसंमितꣳ हैवास्य भवति॥ ३॥ तदाहुः- किं मध्विति; संवत्सरो ह वै मधु, तस्यो' [....][२] रसः॥ ४॥ तदाहुः- किमेव मध्विति; श्रोत्रियो ह वै मधु, तस्यो ह ब्रह्मचारिण एव मधुकृतश्छन्दाꣳसि रसस्तस्मादेवंवित् स्वे कुलेऽनुपद्रष्टो मधु नाश्नीयादिति॥ ५॥ तददहꣳस्तस्य येऽङ्गारा आसꣳस्तेऽङ्गिरसोऽभवꣳस्तदङ्गिरसां जन्म; तस्मादङ्गिरसोऽर[ण्येऽध्याय्या अशान्ता इव हि; ये घोरा अङ्गारा विस्फुलिङ्गभूता][३]स्ते मृगा ऐणेया आसꣳस्तस्मात्ते [४]विष्फुलिङ्गभूताः पतन्ति॥ ६॥ तदवौक्षꣳस्तेऽशाम्यꣳस्तेऽथर्वणोऽभवꣳस्तदथर्वणां जन्म तस्मादथर्वाणो ग्रामेऽध्याय्याः शान्ता इव हि; योऽवोक्षितो धूम उदैत् ते मृगा धूम्रा अभवन्; ये दृश्यरोहा [५][आसꣳ]स्ते वा एते छन्दसाꣳ सजन्मानश्छन्दोभ्यो-[ऽधि][६] निर्मिता आप्रीताः पशवश्चरन्ति; तस्मादमाꣳसाशो[७] मार्गमश्नीयाच्छन्दो-भ्योऽधि निर्मिता आप्रीताः पशवः॥ ७॥ [१५] [इत्यष्टमोऽनुवाकः]

इदं वा अन्वाहुः प्रजापतिर्यज्ञमसृजत; सोऽस्मात् सृष्टः[८] पराङैत्[९]; स प्र यजुरब्लीनात् प्र सामेति; तस्मिन्थ्तिुनमैच्छत; तन्नाविन्दद् यथा पुमान् पुꣳसि; [स प्र][१०] सामा(ब्लीनात्; तस्मिन्मिथुन)[११]मैच्छत; तन्नाविन्दद् यथा पुमान् पुꣳसि॥ १॥ स एतां वाचमृचमनुष्टुभं पर्यपश्यत्; [१२]तस्यै न्यूनमपश्यद्[१२], अस्ति न्वा अस्यै न्यूनमिति तामभ्यायत; साऽस्मा अश्वाऽभवदश्व इतरोऽभवद्, गौर्यभवद् गौर इतरोऽभवद्, गवय्यभवद् गवय इतरोऽभवद्, [१३]उष्ट्र्यभवद् उष्ट्र इतरोऽभवद्, अजाऽभवद् बस्त इतरोऽभवच्छरभ्यभवच्छरभ इतरोऽभवद्, एण्यभवत् कृष्ण इतरोऽभवद्, रोहिदभवद् ऋष्य[१४] इतरोऽभवत्; तावेवमेव[१५] सर्वाणि भूतानि पर्यैतामन्यद्रूपं कुर्वाणौ॥ २॥ सैताꣳ सूर्मिं कर्णकावतीꣳ शयानामध्यगच्छत् पुरुषमेतं वागेषा; तां प्राविशत्; साऽतः[१६] पुरोऽकुरुत[१७] यद् दन्ताꣳस्तामन्वागच्छत् प्रजापतिः; स ऐक्षत पुरो वै किल मदकृतेति; स एतद्रूपमकुरुत यदोदनस्यैतस्यै देवतायै प्रजापतिः; तमभ्यध्यायत्; स ऐक्षताभि वै किल मां ध्यायतीति[१८]; स

१. MHP तद्वां. २. MHP broken. ३. MHP broken. ४. MH विवष्वलिङ्ग°, P विष्ण्वलिङ्गा°. ५. MP broken. ६. MHP om. ७. MHP °मांसांशो. ८. MHP सृष्टाः. ९. MHP पराहैत्. १०. MHP om. ११. MHP सामन्नैच्छत which seem to be abr. text as सामा=मैच्छत; thus AO VI. 30:139. 30. १२-१२. MHP wrongly repeated. १३. MHP उष्ष्य°. १४. In later texts ऋश्य. १५. MHP तावेमेव. १६. MHP सतो; thus AO VI. 30.140.fn 2. १७. MHP पुरोगुरुत. १८. MHP ध्यायतेति; thus conjectured AO VI. 30:140 : fn 3.

उपसेचनेनालमकुरुत; तमलङ्कृतमभितरामिवाध्यायत्[1]; तस्मादुतैतच्छ्रिया-लङ्कृतमभितरामिव[2] ध्यायन्ति ॥ ३ ॥ सैता:[3] पुर: प्रमृज्य तमभ्यग्रसत; तमादाय तेनान्तत:[4] समभवत्; ततो हैवापीदमेतर्हि संभवत:[5] ॥ ४ ॥ तन्नु हैतदेकेऽश्नन्तो भाषन्त, एतामु ह वै स देवतामभ्याक्रन्दति योऽश्नन् भाषते; स यदि परिग्लायेत् कामं प्रतिलभ्य भाषेत; तस्मान्नु ह जिह्वयैव च[6] स्वादु विज्ञायत [7]एतया च[7] ॥ ५ ॥ तद्वा इदमन्वाहु:- सप्ताक्षरं प्रथमं पदं, सप्तपदा[8] शक्वरी, पशव: शक्वरी, पशूनेवावरुन्धे; एकस्मादक्षरादनाप्तं प्रथमं पदं, तस्माद् यद् वाचोऽनाप्तं तन्मनुष्या उपजीवन्तीति ॥ ६ ॥ तदाहु:- कतमत् तद्वाचोऽनाप्तमिति; एतद्ध वै तद्वाचोऽनाप्तं [9]यदेतन्न्यूनमिवोपस्थ एव स्त्रीणाम्; अथ हैतदतिरिक्तमस्य रूपं यत्प्रजननस्य; स यद्ध वा एते न स्यातां नो हैव मिथुनीस्युर्न प्रजा: प्रजायेरन् ॥ ७ ॥ तामेतेषु त्रेधा विक्रान्तेषु पदेष्वाक्रमत[10], सा ब्रह्मौदनमेव प्रथमेन पदेनाधत्त ॥ ८ ॥ [१६]

सा [11]ब्र(ह्मौदनमेव प्रथमेन पदेना)धत्ताग्न्याधेयं द्वितीयेन पूर्णाहुतिं तृतीयेन ॥ १ ॥ तामभ्येवैत्, साऽग्निहोत्रमेव प्रथमेन पदेनाधत्तेष्टिं द्वितीयेन पौर्णमासं तृतीयेन ॥ २ ॥ तामभ्येवैत्, साऽमावास्यामेव प्रथमेन पदेनाधत्त चातुर्मास्यानि द्वितीयेन पशुबन्धं तृतीयेन ॥ ३ ॥ तामभ्येवैत्, सा दीक्षणीयमेव प्रथमेन पदेनाधत्त प्रायणीयं [12]द्वितीयेनातिथ्यं तृतीयेन ॥ ४ ॥ तामभ्येवैत्, सा तिस्र एवोपसदस्त्रिभि: पदैरधत्त ॥ ५ ॥ तामभ्येवैत्, सा वेदिमेव प्रथमेन पदेनाध[12]त्तोत्तरवेदिं द्वितीयेनोत्तरनाभिं तृतीयेन ॥ ६ ॥ तामभ्येवैत्, साऽग्निप्रहरणमेव प्रथमेन पदेनाधत्ताग्नीध्रं द्वितीयेन सदस्तृतीयेन ॥ ७ ॥ तामभ्येवैत्, सा हविर्धाने एव प्रथमेन पदेनाधत्तोपरवान् द्वितीयेन धिष्णियाꣳस्तृतीयेन ॥ ८ ॥ तामभ्येवैत्, सा वैसर्जनमेव प्रथमेन पदेनाधत्ताग्नीध्रीयमग्निं द्वितीयेन य एवैष प्रह्रियते यूपं तृतीयेन ॥ ९ ॥ तामभ्येवैत्, साऽग्नीषोमीयमेव पशुं प्रथमेन पदेनाधत्त पशुपुरोडाशं द्वितीयेन हविस्तृतीयेन ॥ १० ॥ तामभ्येवैत्, सा वसतीवरीरेव प्रथमेन पदेनाधत्त विश्वरूपा [13][एव द्विती]येन प्रातरनुवाकं तृतीयेन ॥ ११ ॥ तामभ्येवैत्, सा द्रोणकलशमेव प्रथमेन पदेनाधत्ताधवनीयं द्वितीयेन पूतभृतं तृतीयेन ॥ १२ ॥ तामभ्येवैत्, सा त्रीण्येव

१. MHP °मिव ध्यायात्; thus AO VI. 30 : 140.B. २. MHP च्छ्रियोऽलङ्कृ°. ३. MHP सैतां. ४. MHP तेनान्त:. ५. MHP संभवस्. ६. MHP read च after स्वादु. ७-७. MHP एतयैव; thus AO VI. 30 : 140.18. ८. MP सप्तदा. ९. MHP यदेतन्यू°. १०. MHP पदेषाक्र°. ११. MHP abr. as सा ब्र=धत्ता°. १२-१२. H om text between प्रायणीय and उत्तरवेदिं. १३. MHP broken.

सवनानि त्रिभि: पदैरधत्त ॥ १३ ॥ तामभ्येवैत्, सा त्रीण्येवोक्थानि[1] त्रिभि: पदैरधत्त ॥ १४ ॥ तामभ्येवैत्, सा त्रीनेव रात्रिपर्यायाꣳस्त्रिभि: पदैरधत्त ॥ १५ ॥ तामभ्येवैत्, सा राथन्तरमेव सन्धिं प्रथमेन पदेनाधत्त षोडशिनं द्वितीयेनावभृथं तृतीयेन ॥ १६ ॥ तामभ्येवैत्, सोदयनीयमेव प्रथमेन[2] पदेनाधत्तानूबन्ध्यं[2] द्वितीयेनोदवसानीयं[3] तृतीयेन ॥ १७ ॥ त उ ह वा एतावन्त एव यज्ञक्रतवो भवन्ति यावत्[3क] पूर्णाहुत्यै प्रजापति: ॥ १८ ॥ तं देवा अब्रुवन् वज्रो वा अमꣳसि यज्ञानामसञ्जय: षोडशी; कथमेनꣳ शान्त्यामवदध्यामेति; तमन्तरा रात्रिं चोक्थानि चावदधुरेतस्याꣳ शान्त्याम्; अत्रो ह पूर्णाहुतिरेवेदꣳ सर्वं भवति यदिदं किञ्चैतैरादेशै: ॥ १९ ॥ [१७] [इति नवमोऽनुवाक:]

अमो वा इदमेक आसीत्; तस्यैकस्य व्रजत: पश्चाद् घोषोऽजायत; तस्मादुतैतदेक[स्य][4] व्रजत: पश्चाद् घोष इव जायते ॥ १ ॥ सोऽवापश्यत् कोऽसीति; अहमवित्रीति सावित्रीति; सा सावित्र्यभवदृगेषा ॥ २ ॥ अथ कस्त्वमिति; अहमम इति; क: सोऽम इति सामेति; ते ऋक्सामे अभवताम्; ते अब्रूताꣳ संभवाव प्रजायावहै[5] भूयाꣳसावसावेति[6]; ते समभवतां, ते [7]गर्भमादधातामुमेवादित्यम्; सा ह वा एषा कृष्णा देवता यदसावादित्यस्तस्या एतद्रूपं यत्कृष्णाजिनस्य; [8]स य एवं[8]विद्वान् कृष्णाजिनमासजत एतस्यै हैव तद्[9] देवतायै रूपं बिभर्ति ॥ ३ ॥ स यो ह वा [10]एवंविद्वान् दीक्षितमुप[10] वा मीमाꣳसेतानु वा व्याहरेत् तं ब्रूयाद्- एतस्यै त्वा देवताया आवृश्चामि यस्यै देवतायै रूपं बिभर्षि[11], त्वमेवैतामार्तिमारिष्यसीति[12]; शश्वद्ध तथैव स्याद् यथैनं ब्रूयात्; तस्मान्नु ह यज्ञस्याविदेव स्यान्नोपद्रष्टा[13] ॥ ४ ॥ तस्येमे एवाण्डकपाले आस्तां यद् द्यावापृथिवी; तयोरेतद्रूपं यत्कृष्णाजिनस्य; स य एवंविद्वान् कृष्णाजिनमासजते[14] द्यावापृथिव्योरेव रूपं बिभर्ति ॥ ५ ॥ तदु ह वा एतद्[15] ऋक्सामयोरेव[15] रूपं यत् कृष्णाजिनस्य; एष वा ऋचो वर्णो यच्छुक्लं कृष्णाजिनस्यैष साम्नो यत् कृष्णम्; स य एवंविद्वान् कृष्णाजिनमासजत ऋक्सामयोरेव रूपं बिभर्ति ॥ ६ ॥ तदु ह वा

१. MHP वोत्तमानि; thus AO VI. 32.143.17. २-२. MHP प्रथमेनाधत्तनूवध्यं. ३. °येन नोदवसां. ३क. AO VI. 32. 143.22 यत्. ४. MHP om. ५. MHP व्रजाया°. ६. MHP भूयांसोसावेति. ७. MHP गर्भमदधा°. ८-८. AO VI. 33 : 144.17 : स यदेतद्; thus MHP. ९. AO ibid : ताद्. १०-१०. MHP एवं विदन् दीक्षितमेवंविदा वा दीक्षित°. ११. MHP विभर्मि; thus AO VI. 33:144.20. १२. MHP °मरिष्यतीति; thus AO VI. 33 : 144.21. १३. MHP °न्नो च द्रष्टा. १४. MHP add तं after °सजते. १५-१५. P एतादृक्°, MHP °योरेवं.

एतदहोरात्रयो रूपं यत्कृष्णाजिनस्य; एष वा अह्नो वर्णो यच्छुक्लं कृष्णाजिनस्यैष रात्रिया यत् कृष्णम्; स य एवंविद्वान् कृष्णाजिनमासजतेऽहोरात्रयोरेव रूपं बिभर्ति॥ ७॥ स उ ह वा एष एव मृत्युर्यदहोरात्रे; ते एतामेव देवतां नाप्नुतो यदादित्यम्; व्यवहारꣳ[1] ह्येवैनयोरेषा देवताऽनूदेति [1]व्यवहारमन्वस्तमेति; नो ह वा एवंविदं दीक्षितं मृत्यराप्नोति यं चैवंविद्[2] दीक्षयति; ते उ ह वा अस्यैते वाससी एव भवतो यदहोरात्रे॥ ८॥ उद्यन्नेवाहःपरिधत्ते॥ ९॥ [१८]

उ[3](द्यन्नेवाहःपरिध)त्तेऽस्तंयन् [4]रात्रिम्; अनन्तंभावुकꣳ हास्य भवत्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एवं वेद॥ १॥ ते उ ह वा अस्यैते प्रमदे एव भवतो यदहोरात्रे; स यथा कुशीभ्यां प्रमाद्येदेवꣳ ह वा एषा देवतैतदेवाभ्यां प्रमाद्यति; उद्यन्[5] रात्रिमुदस्यत्यहरिदमागच्छति; तस्माद् दिवा नक्षत्राणि न दृश्यन्ते रात्रिर्हि तेषु तदा भवति; अस्तंयन्नहरुदस्यति रात्रिरियमागच्छति; तस्मान्नक्तं नक्षत्राणि दृश्यन्तेऽहर्हि तेषु तदा भवति; विन्दते प्रमदं य एवं वेद॥ २॥ तदु ह वा इ[दमन्वाहुरेष वा][6] ऋचो वर्णो यच्छुक्लं कृष्णाजिनस्यैष साम्नो यत्कृष्णमथ यदस्मिन् बभ्रूणीव[7] तद् यजुषो रूपम्; स य एवंविद्वान् कृष्णाजिनमासजते ब्रह्मण एव रूपं बिभर्ति॥ ३॥ तदु ह वा अस्यैतत्पात्रमेव भवत्यृङ्मयं यजुर्मयꣳ साम[मयं यत् कृष्णाजिनम्....][8]; यजमानो यदेनदासर्पति **'स्वाहा यज्ञं मनसा'**, **'स्वाहा द्यावापृथिवीभ्याम्'**, **'स्वाहोरोरन्तरिक्षात्'** इत्येतैरुवेव स्वाहाकारैरात्मानं तपसि जुहोति दीक्षितः; तस्मादुतैतद्दीक्षितस्य माꣳसानि प्रैव स्रꣳसते॥ ४॥ **'स्वाहा यज्ञं [9]वाता[दारभे'** इति यदङ्गुलीरुत्पिचति] तदा हैत्य.... हेव[9] तद्देवताममृतामारभ्य चरति दीक्षितः, तस्य न काचनार्तिर्भवति न रिष्टिः॥ ५॥ ग्रहो वै गृहीतस्तिष्ठिति यजमानोऽसावेव कृष्णाजिन, एष उ हैव प्रथमो ग्रहाणां गृह्यत एष उ ह हूयते॥ ६॥ नौर्वा एष [10]संवत्सरस्तस्य वसन्तः शि]रो ग्रीष्मो दक्षिणः पक्षो वर्षा पुच्छꣳ शरदुत्तरः पक्षो हेमन्तो[10] मध्यम्; स उ ह वा एष एव संवत्सरो यत्कृष्णाजिनम्; मृत्युर्वै संवत्सरो, मृत्युमेव नावं कृत्वा सुवर्गं लोकमभ्येत्यमुमादित्यम्॥ ७॥ तस्या उ हैके योगं विदुः **'मनोयुगस्युत प्रजातेन्द्रस्त्वा शक्रः शक्वरी[11]...भिर्हवामहे'**, तस्यास्ते[12] वसन्तः

१. MHP व्यावारꣳ; thus AO VI. 33 : 145.1. २. MHP वैवंवि. ३. MHP abr. as उ = ते. ४. MP ताद्रात्रिमननंभा°, H यद्रात्रिमननुक°; thus AO VI. 34:145.30. ५. MHP प्रमाद्यद्युन्. ६. MHP broken. ७. MHP बभ्रूमिव; thus conjectused AO VI. 35:147 fn.1. ८. MHP broken. ९-९ MHP वाव... तदा हैत्य... हेव तद्. १०-१०. MHP एषा... रा ग्री.. मन्तो. ११. MHP broken between शक्वरी and भिहवामहै. १२. MHP तस्यान्ते.

शिरो ग्रीष्मो दक्षिणः पक्षो वर्षाः पुच्छꣳ शरदुत्तरः पक्षो हेमन्तो मध्यम्; **'नौरसि संपारणी स्वस्ति मा संपारय'** इति॥ ८॥ तद्वा एतद् वाचश्च मनसश्च चेष्टितमेते हि ब्रह्मप्रत्यक्षम्॥ ९॥ [१९] [इति दशमोऽनुवाकः]

॥ इति प्रथमा दशिका समाप्ता॥

सुत्वा ह या[ज्ञसेनः सार्ञ्जयो राजाऽऽस ब][1]हुयाजी; स [दीक्षां][2] विदाञ्चकार नेष्टापूर्तस्याक्षितिम्; स हामुं लोकं गत्वेष्टापूर्तस्य [3]क्षित्यै बिभयाञ्चकार॥ १॥ अथ ह केशी पाञ्चालराजो युवतर एवास्मिन्[4] लोकेऽनूचान आस बहुयाजी; स हेष्टापूर्तस्याक्षितिं विदाञ्चकार, न दीक्षाम्॥ २॥ तꣳ ह [5][स्मादीक्षित]मागत्य नाम्नाभिवदति, तस्य ह स्मान्नमशित्वा व्रजत्यृषिरेषः॥ ३॥ सुत्वा ह याज्ञसेनः सार्ञ्जयो[6] राजा हिरण्मयो हꣳसो भूत्वाऽऽपपात; तस्य हाग्रेण शालामुपविश्य [7]केशी३नित्यामन्त्रयाञ्चक्रे; तस्यो ह तदधीव[8] मनस्यास को नु नो यद् दीक्षितान् स्वकेन[9] नाम्नैवामन्त्रयत इति॥ ४॥ तꣳ होवाच- मा सोम्य क्रुधो[10], राजा त्वमसि, राजानो वयꣳ स्मस्त उ त्वत् स्थविरतराः पितृमात्राः; त[11] उ त्वा दूरादर्थेनाभ्यपप्ताम[12], दीक्षां वयं विद्मस्त्वं न वेत्थ; इष्टापूर्तस्याक्षितिं त्वं वेत्थ वयं न [13]विद्मः; तां त्वमस्मभ्यं ब्रूहि, तां[14] वयं तुभ्यं वक्ष्याम इति, भगव इति॥ ५॥ तस्मा उ हैतामेव दीक्षामुवाच— तपो ह दीक्षा[15](मुपैमि सत्यꣳ स्वꣳ श्रद्धां दक्षिणामन्नमक्षितिं ब्रह्म)लोकमिति॥ ६॥ वागु ह वाव दीक्षा, स य एतयाऽनृतं वदत्यदीक्षित एव सोऽथ य एनया सत्यं वदति स एव दीक्षितः॥ ७॥ तदाहु-रित्थंविदश्चक्षुषि[16] वाव वयं[16] दीक्षितं चादीक्षितं[17] च विजानीम इति, वाचि हैनं विजानन्ति; स यदि ह वा अप्येवंविद् दीक्षितो मनाग्[18] वाचा स्खलेत कामꣳ हैवास्य नाम गृह्णीयात् काममन्नमश्नीयात्॥ ८॥ तपो ह दीक्षामुपैमीति॥ ९॥ [२०]

तपो ह दीक्षामुपैमीति तपो ह्येवैष दीक्षामुपैति, तपो ह्येवैष दीक्षा; सत्यꣳ

१. MHP broken, thus AO VI. 37.147.31. २. MHP broken. ३. MHP °स्या; क्षित्यै; thus AO VI. 147.32. ४. MHP युवाऽस्मिन्; thus AO VI. 37 : 148.1. ५. MHP broken ; thus AO VI. 37 : 148.3. ६. MHP साञ्जर्यो [P सञ्ज°]. ७. MHP केशिनीत्य°. ८. MHP तदथोव; thus conjectured AO VI. 37 : 148 fn 5. ९. MHP सको; thus AO VI. 37 : 148.7. १०. M कुहा; HP कुडो; thus AO VI. 37:148.8. ११. MHP ते उ; thus AO VI. 37 : 148.9. १२. MHP °वप्ताम. १३. MHP विन्म; thus AO VI. 37:148.11. १४. AO VI. 37 : 148. om. १५. MHP abr. as दीक्षा=लोकमिति; thus AO. VI. 37:148.12-13. १६-१६. MHP चक्षुषीवा वयं; thus Ao VI. 37 : 148.16. १७. दीक्षितञ्चोदी°. १८. MHP मनग्.

स्वमिति यस्यो एव सत्यꣳ स्वꣳ स एव दीक्षितः; श्रद्धां दक्षिणामिति यस्यो एव श्रद्धा दक्षिणा सोऽमुष्मिँल्लोके दक्षिणया संगच्छते; अन्नमक्षितिमिति यस्यो एवामुष्मिँल्लोकेऽन्नं न क्षीयते; ब्रह्मलोकमिति ब्रह्म ह वा अनन्तो लोकोऽन्तवन्तो हैवान्ये लोका, अनन्तो हास्याक्षय्यो लोको भवति य एवं वेद ॥ १ ॥ तत् सत्यमिति हैनमुवाच [१]यत्वा ह क[बा]न्ध[१] आथर्वणो दीक्षितमागत्य न त्वा नाम्नाऽभिवदिष्यति न ते[२]ऽन्नमशिष्यतीति; अथ स तस्मा उवाच— आपो वा[व][३] भगव इष्टापूर्तस्याक्षितिरिति; स यो ह वा अप[४] इष्टापूर्तस्याक्षितिं वेदाद्भिर्हास्य संतृप्तो लोको न क्षीयते ॥ २ ॥ उत्पातराजाजगाम कबन्ध आथर्वणस्तꣳ ह दीक्षितमागत्योवाच— समाप्नुहि भगवो गृहपत[५] इति; स होवाच सर्पिष्मत् पचन्त्विति; नेति होवाच, दीक्षिता[६] वै मन्यामह इति कामं [७]तु वाव[७] ह दीक्षितस्य नाम गृह्णीयात्, काममन्नमश्नीयाद्, ब्रह्म तु हैनं न पृच्छेदन्यस्य ब्रह्मचारी सन् ; ब्रह्म हि दीक्षितस्यान्नम् ॥ ३ ॥ सैषा केशिनी दीक्षैवमाहृताऽमुष्माल्लोकात् , तामिदं केशिनी दीक्षेत्याचक्षते ॥ ४ ॥ **[२१]** [इति प्रथमोऽनुवाकः]

संततꣳ ह वा अन्यो यज्ञं वेद विच्छिन्नमन्यः; स यो नु हैनꣳ संततं वेद स[८] संप्रति वेद; स पूर्वेद्युर्देवयजनमध्यवस्यति; तस्मिन्नग्निहोत्रं जुहोति; तेनाग्निहोत्रेण पृथिव्यै देवयजनं संतायते ॥ १ ॥ तदाहुः- कथमग्निहोत्रेण दीक्षा संतायत इति; अग्निहोत्रोच्छिष्टमातच्य[९] निदध्यात्; तन्मथित्वा दीक्षणीयस्याज्येऽपि कुर्यात् ; एवं नु हाग्निहोत्रेण[१०] दीक्षा संतायते ॥ २ ॥ तदाहुः- कथं दीक्षया[११] प्रायणीयः संतायत इति; यस्यै प्रथमव्रतं प्रयच्छेदुत् ताꣳ सृजेदथान्यस्यै प्रदेदीयेत; यस्यै प्रथमव्रतं प्रयच्छेत् तस्यै दुग्धं मथित्वा प्रायणीयस्याज्येऽपि कुर्यात् ; एवं नु ह दीक्षया प्रायणीयः संतायते; य उ ह वाव प्रायणीयः स उदयनीयः ॥ ३ ॥ तदाहुः— कथमग्न्याधेयेन दीक्षा संतायत इति[१२]; यावत्कृत्वो हैष निर्मन्थ्येन चर[ति][१३] तावत्कृत्वो हैवाग्न्याधेयेन संतायते; अत्र संततैरु वै वाप्यविच्छिन्नै[र्यज्ञै][१४]र्यजत एवंवित् ॥ ४ ॥ तदाहुः— किं तदहरुपवसथे सायमग्निहोत्रं भवति ॥ ५ ॥ **[२२]**

१-१. MHP यत्वावकन्ध; thus AO VI. 37 : 148.21. २. MHP तेन्नमधिष्य°. ३. MHP वा. ४. MHP आप. ५. MHP गृहवत. ६. MHP दीक्षितं; thus AO VI. 37 : 149.3. ७-७. MHP त्वाव; thus conjectured AO VI. 37 : 149 fn 2. ८. MHP om ; thus AO VI. 38 : 150.10. ९. MHP °तच्यं°. १०. MHP हानिहोत्रेण. ११. MHP दीक्षाया. १२. MHP repeat यस्यै प्रथमव्रतं=सन्तायत इति after इति. १३. MHP om; thus AO. VI. 38 : 150.20. १४. MHP broken.

तदा[१](हुः- किं तदहरुपवसथे सायमग्निहोत्रं भव)तीति; स यदग्नीषोमीयस्य पशोः पृषदाज्येनानूयाजान् यजति तदु ह तत्राग्निहोत्रं भवति ॥ १ ॥ तदाहुः— किमौषसमग्निहोत्रं भवतीति; स यदेव प्राजापत्यं दधिग्रहं जुहोति[२] तदु हैव तत्राग्निहोत्रं भवति ॥ २ ॥ तदाहुः— किं प्रातःसवनेऽग्निहोत्रं भवतीति; यदेव मैत्रावरुणग्रहं[३] पयसा श्रीणाति, पयस्या भवति तदु हैव तत्राग्निहोत्रं भवति ॥ ३ ॥ तदाहुः- किं माध्यन्दिने सवनेऽग्निहोत्रं भवतीति; यदेव दधिघर्मेण चरति तदु हैव तत्राग्निहोत्रं भवति ॥ ४ ॥ तदाहुः- किं तृतीयसवनेऽग्निहोत्रं भवतीति; [४]यदेवाशिर-मानयत्यादित्यग्रहं[५] जुहोति तदु हैव तत्राग्निहोत्रं भवति ॥ ५ ॥ तदाहुः— किमुक्थ्येऽग्निहोत्रं भवतीति; यदेव सवनीयस्य पशोः पृषदाज्येनानूयाजान् यजति, तदु हैव तत्राग्निहोत्रं भवति ॥ ६ ॥ तदाहुः— किमतिरात्रेऽग्निहोत्रं भवतीति; यदेवानूबन्ध्यस्य पृषदाज्येनानूयाजान्[६] यजति, तदु हैव तत्राग्निहोत्रं भवति ॥ ७ ॥ तदाहुः— किमग्निहोत्रं भवतीति; यदु हैव किञ्च दध्नः क्रियते तदु हैव तत्राग्निहोत्रं भवति ॥ ८ ॥ **[२३]** [इति द्वितीयोऽनुवाकः]

संवत्सरो ह वै दीक्षित एष प्रजापतिः; स कार्त्तिके दीक्षते; तमनु सर्वाणि भूतान्यावेष्टितानि[७] चरन्त्येताꣳश्चतुरो मासो दीक्षितस्य रूपेण ॥ १ ॥ स वसन्ता क्रीणाति; स एताꣳश्चतुरो मास उपसद्भिरेति; तपो वा उपसदस्तपसो[८] रूपं ग्रीष्मस्तमनु सर्वाणि भूतानि सꣳस्विन्नानि विस्रस्तचेलानि[९] चरन्त्येताꣳश्चतुरो मास उपसदां रूपेण ॥ २ ॥ सोऽषाढासु प्रसुनोति[१०]; स एताꣳश्चतुरो मासः सोमः स्रवति; तस्मादुतैनं[११] न किञ्चन हिꣳस्यात्; सर्वो हि सोमपो योऽपां भक्षयति; तस्मादुतैनं[११] न किञ्चन हिꣳस्युः ॥ ३ ॥ तस्य क ऋत्विजः[१२] के होत्रकाः के चमसाध्वर्यव इति; तस्याहोरात्रा एवर्त्विजोऽर्धमासा होत्रका [१३]मासाश्चमसाध्वर्यवः; तस्माद् वर्षासु न सुनुयान्नेद् देवैः संसुनवानीति ॥ ४ ॥ तदाहुः— कः संवत्सर इति; वसन्तो ह वाव संवत्सर, एते चत्वारो मासा एष ऋतुः ॥ ५ ॥ तदाहुः- क एव संवत्सर इति; ग्रीष्मो ह वाव संवत्सर, एते चत्वारो मासा एष ऋतुः ॥ ६ ॥ तदाहुः- क एव संवत्सर इति; वर्षा ह वाव संवत्सर, एते चत्वारो मासा एष ऋतुः ॥ ७ ॥ तदाहुः— एते वै सर्व

---

१. MHP abr. २. MHP जुहोतीति. ३. AO. VI.39:151.19:. °वरुणं ग्रहं. ४. MHP °शिरमवन°, thus AO VI 39 : 151 : 23. ५. MHP °दित्य हं; AO VI. 39:151.23-24 : आदित्यं ग्रहं. ६. MHP °दाज्यानूया°. ७. MHP °तान्यवेष्टि°. ८. MHP add रूपसो after तपसो. ९. MHP विस्रस्तानिस्रस्तचेलानि; thus AO VI. 40:152.6. १०. MH प्रसनोति, P प्रसन्नोति. ११. MHP तस्मादुतैतं. १२. MHP ऋत्विजा. १३. AO VI.40:152.11:मासश्चम°.

ऋतवो यद् वर्षाः; वर्षाश्चेद् वा ऋतूनां कल्पन्ते[१], सर्व एवान्य ऋतवः[२] कल्पन्ते; वर्षाश्चेद् वा ऋतूनां मुह्यन्ति सर्व एवान्य ऋतवो मुह्यन्ति; तस्मादेष एवर्तुर्यद् वर्षाः॥ ८ ॥ तदाहुः— कः संवत्सर इति ॥ ९ ॥ [२४]

तदाहुः— कः संवत्सर इति; षड्ढ[३] वा ऋतवः संवत्सरः॥ १ ॥ तदाहुः— क एव संवत्सर इति; पञ्च ह[४] वा ऋतवः संवत्सरः॥ २ ॥ तदाहुः— क एव संवत्सर इति; द्वादश ह वाव मासाः संवत्सरः॥ ३ ॥ तदाहुः— क एव संवत्सर इति; त्रयोदश ह वाव मासाः संवत्सरः॥ ४ ॥ तदाहुः— क एव संवत्सर इति; षड्ढ[३] वाव मासाः संवत्सरः॥ ५ ॥ तदाहुः— क एव संवत्सर इति; पञ्च ह वाव मासाः संवत्सरः॥ ६ ॥ [तदाहुः— क एव संवत्सर][५] इति; चत्वारो ह वाव मासाः संवत्सर॥ ७ ॥ [तदाहुः–क एव संवत्सर इति; त्रयो ह वाव मासाः संवत्सरः॥ ८ ॥ तदाहुः— क एव संवत्सर][६] इति; द्वौ ह वाव मासौ संवत्सरः॥ ९ ॥ तदाहुः–क एव संवत्सर इति; मासो[७] ह वाव संवत्सरः॥ १० ॥ [तदाहुः— क एव संवत्सर][८] इति; अर्धमासो ह वाव संवत्सरः॥ ११ ॥ [तदाहुः— क एव संवत्सर इति][९]; द्वादशाहो ह वाव संवत्सरः॥ १२ ॥ तदाहुः— क एव संवत्सर इति; त्रयोदशाहो ह वाव संवत्सरः॥ १३ ॥ तदाहुः– क एव संवत्सर इति; षडहो ह वाव संवत्सरः॥ १४ ॥ तदाहुः— क एव संवत्सर इति; [पञ्चाहो ह वाव संवत्सरः॥ १५ ॥ तदाहुः— क एव संवत्सर इति; चत्वार्यहो][१०] ह वाव संवत्सरः॥ १६ ॥ तदाहुः— क एव संवत्सर इति; त्रियहो ह वाव संवत्सर इति॥ १७॥ तदाहुः–क एव संवत्स]र इति; द्वियहो ह वाव [संवत्सरः॥ १८ ॥ तदाहुः– क एव संवत्सर इति; अहोरात्रो[११] ह वाव संवत्सरः॥ १९ ॥ तदाहुः– क एव संवत्सर इति; अहर्ह वाव संवत्सरः॥ २० ॥ तदाहुः— क एव संवत्सर इति; एष ह वाव संवत्सरो य एवैषोऽहरहः पुरस्ता[त्प्रत्यङ्ङुदेति; यो][१२] ह वावैतमेवꣳ संवत्सरमहरहः पुरस्तात्प्रत्यञ्चमुद्यन्तं वेदैतस्यै देवतायै सायुज्यꣳ सलोकतां जयति॥ २१ ॥ [२५] [इति तृतीयोऽनुवाकः]

इयꣳ ह वाव प्रायणीयोऽसावुदयनीयः; अग्निर्ह वाव [१३]प्रायणीयोऽग्निरुदयनीयः; वायुर्ह वाव प्रायणीयश्चन्द्रमा [उदयनीयः; आदित्यो ह वाव][१४] प्राय-

१. MHP कत्वन्ते. २. MHP repeat अन्या ऋतवः. ३. MHP षड् वा. ४. MH om. ५. MHP om. ६. MHP om. ७. MHP मासौ. ८. MHP om. ९. MHP om. १०. MHP broken. ११. MHP °रात्रयोर्ह. १२. MHP broken. १३. MHP °योनिरु° १४. MHP broken thus conjectured; AO VI. 41 : 153.20 om next प्रायणीयश्चन्द्रमा. cf. TS VI.1.7.9; MS.III 7.2; Kāṭh 23.8.

णीयश्चन्द्रमा उदयनीय[१] इत्यधि[देवत][२]म्॥ १ ॥ अथाधिपुरुषम्। आस्यꣳ ह वाव[३] प्रायणीयो मन उदयनीयः; चक्षुर्ह वाव प्रायणीयश्चक्षुरुदयनीयः; श्रोत्रꣳ ह वाव प्रायणीयः श्रोत्रमुदयनीयः; [प्राणो ह वाव प्रायणीयो वागुदयनीयः][४]; तद्वा एतदुपनिषदादानमन्वाख्यानम्॥ २ ॥ पञ्चो [ह वावैतानि यज्ञे सर्वाणि समवरुध्यन्ते][५]; तदाहुः– कथमस्यैतानि[६] यज्ञे सर्वाणि समवरुध्यन्त इति; स[७] पथ्याꣳ स्वस्तिं यजति, वाचमेव [८]तयाऽवरुन्धे, वाचं प्रीणाति; सोऽग्निं यजति, यज्ञमेव तेनावरुन्धे, यज्ञं प्रीणाति; स सोमं यजति, पितृकार्यमेव तेनावरुन्धे, पितृकार्यं प्रीणाति; स[९] सवितारं यजत्यलङ्कार[मेव तेनावरुन्धेऽलङ्कारं प्रीणाति; सोऽदितिं][१०] यजति, पक्वमेव तयाऽवरुन्धे, पक्वं प्रीणाति; एवं नु हास्यैतानि यज्ञे सर्वाणि समवरुध्यन्ते॥ ३ ॥ तद्वा इदमन्वाहुर्— देवासुराः संयत्ता आसन्; तेऽसुरा दिग्भ्य आबाधन्तेति; ते देवाः पथ्याꣳ स्वस्तिमयजन्, य एव पुरस्तादसुरा आसन् ताꣳस्तया प्राणुदन्त[११]; तेऽग्निमयजन्, य [एव दक्षिणतोऽसुरा आसꣳस्ताꣳ][१२]स्तेन प्राणुदन्त; ते सोममयजन्, य एव पश्चादसुरा आसꣳस्ताꣳस्तेन प्राणुदन्त; ते सवितारमयजन्, य एवोत्तरतोऽसुरा आसꣳस्ताꣳस्तेन प्राणुदन्त; तेऽदितिमयजन्, य एवोपरिष्टादसुरा आसꣳस्ताꣳस्तया प्राणुदन्त; एवं ह वै सर्वाभ्यो दिग्भ्यो यजमानो द्विषतो भ्रातृव्या[नाबाधते][१३] ॥ ४ ॥ इदमन्वाहुर्— देवा वै [१४][देव]यजनमध्यवसाय दिशो न प्राजान(न्, तेऽन्योऽन्यमुपाधावन् त्वया प्र जानाम त्वयेति; तेऽदित्याꣳ समध्रियन्त त्वया प्र जानामेति; साऽब्रवीद् वरं वृणै मत्प्रायणा एव वो यज्ञा मदुदयना असन्निति; तस्मादादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयः॥ ५ ॥ पञ्च देवता यजति पञ्च दिशो दिशां प्रज्ञात्या, अथो पञ्चाक्षरा)[१५] पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवावरुन्ध इति॥ ६ ॥ ते देवाः पथ्याꣳ स्वस्तिमयजन् प्राचीनमेव तया [१६](दिशं प्राजानन्नग्निना दक्षिणा सोमेन प्रतीचीꣳ सवित्रोदीचीमदि)त्योर्ध्वाम्॥ ७ ॥ पथ्या ह वाव स्वस्ति प्राची दिगग्निर्दक्षिणा सोमः प्रतीची सवितोदीच्यदितिरूर्ध्वा यजमानो हविः सुवर्गो लोक आहवनीयः; तस्य यदवदायावदानान्याहवनीये जुहोति

१. MHP उदयन. २. MHP broken. ३. MHP वाद्व. ४. MHP possibly the text omitted; cf KāṭhS. 34.6; Kauṣ Br. VII. 9. ५. MHP broken. ६. MHP कामस्यै°. ७. MHP om. ८. AO VI. 42 : 153.30 : तेनाव°. ९. MHP om. १०. MHP broken; thus AO VI. 42:154.1-2. ११. MHP प्रागुदन्तं. १२. MHP broken ; thus AO VI.43:154.9-10. १३. MHP broken. १४. MHP om. १५. MHP abr as प्राजान=पङ्क्ति, cf TS VI. 1.5.1-2. १६. MHP abr. as प्राचीमेव तया=त्योर्ध्वाम् ; cf TS VI. 1.5.3.

यजमानमेव तत्सुवर्गे लोक आहवनीय आदधाति ॥ ८ ॥ तदाहुर्- यद् **देवस्य त्वा** ॥ ९ ॥ [२६]

तदाहुर्— यद् '**देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामदित्यै पथ्यावत्या अग्निवत्यै[१] सोमवत्यै सवितृवत्यै[२] जुष्टं निर्वपामि**' इति निर्वपत्यथ[३] क्वास्यैता देवताः प्राश्नन्तीति; स यदेतस्मिञ्चरौ शृत आज्यमानयति येन प्रचरिष्यन् भवति पुनराज्यस्थाल्यां कृत्वाऽथैनेन प्रचरत्यत्रो हैवास्यैता[४] देवताः प्राश्नन्ति ॥ १ ॥ तदाहुः— कतमावेतस्य क्रतोराज्यभागाविति; [५][या]वु हैवैतावग्नीषोमाविज्येते[६] एतावु हैवैतस्य क्रतोराज्यभागौ; ता उ ह वा एता दिश एव भवन्ति यद् दिशस्तस्माद् दिशः प्रज्ञायन्त इयमेकेयमेकेति[७] ॥ २ ॥ अथ यदेना हविषः[८] प्रत्यक्षं न यन्ति, तस्मादशरीरा दिशोऽशरीरेण ह्याज्येनेज्यन्ते, [९]तस्मादन्याऽन्यस्यामव्यवच्छिन्नास्तस्मादन्तरिक्षलोको नापिधीयते ॥ ३ ॥ त उ ह वा एते प्राणा एव भवन्ति यत्प्राणास्तस्मात्प्राणाः प्रज्ञायन्तेऽयमेकोऽयमेक इति ॥ ४ ॥ अथ यदेना हविषः प्रत्यक्षं न यन्ति तस्मादशरीराः प्राणा अशरीरेण ह्याज्येनेज्यन्ते [१०]तस्मादन्योऽन्यस्मादव्यवच्छिन्नास्तस्मादन्तरतः प्राणा नापिधीयन्ते ॥ ५ ॥ अष्टावत्तः स्विष्टकृत्; तेषां यानि षड् ऋतव एव ते; ये द्वे अहोरात्रे एव ते; अत्रो ह स्विष्टकृत् संवत्सरमेवाभिसंपद्यते ॥ ६ ॥ द्वादशावत्तेडाऽन्नमु वा इडाऽन्नमेवावरुन्धे ॥ ७ ॥ असुरा वा एतस्मिन्काले देवानुपायन्त; ते देवा वाचि यज्ञं समारोह्य पलायन्त; [११]ताञ्छंयुर्बार्हस्पत्योऽब्रवीद् वरं वृणा अथाहमतोऽसुरानपनोत्स्ये, मदन्त एवैष यज्ञक्रतुरसदिति; सोऽसुरानपानुदत; तस्मान्नु हैष शंय्वन्तो[१२] यज्ञक्रतुः ॥ ८ ॥ ते देवा अभिपर्यावृत्याब्रुवन् समिष्टयजुर्वा इदꣳ हित्वा पलायिष्महि कस्मिन्निदꣳ होष्याम इति; वाचीत्यब्रुवन्, वाचि हि यज्ञꣳ समारोह्य पलायिष्महीति; तस्मान्नु हैतद् वाचि[१३] हूयते यत्समिष्टयजुः '**जूरसि धृता[१४] (मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवस प्रसवे वाचो) यन्त्रमशीय स्वाहा**' इति ॥ ९ ॥ [२७] [इति चतुर्थोऽनुवाकः]

१. MHP अनिवत्यै. २. MHP °पितृवत्यै; thus AO VI.44:154.19-20. ३. MHP °पन्त्य°. ४. MHP हैवास्य. ५. MHP om. ६. MHP °ज्येत. ७. MHP °मेकेऽयमेके°. ८. MHP हविषं. ९. MHP °न्यस्यानरव्य°. १०. MHP तस्मादस्मादन्योऽ° ११. MHP ताञ्छयु°; AO VI.45:155.14: ताञ्छम्यु. १२. MP शंय्यन्तो, H शंयन्तो १३. MHP वा वि. १४. MHP abr. as जूरसि सृता = यन्त्र°; cf TS I.2.4.2.

पञ्चकृत्वो ध्रुवामभिघारयति, विꣳशतिरेतासां[१] देवतानामवदानान्यष्टावत्तः स्विष्टकृद्, द्वादशावत्तेडा, द्विरग्नीध आदधाति, प्राशित्रमेवैतेषामष्टाचत्वारिꣳशः ॥ १ ॥ तेषां यानि चतुर्विꣳशतिः सा गायत्री, यान्यष्टाविꣳशतिः[२] सोष्णिग्, यानि द्वात्रिꣳशत्साऽनुष्टुग्, यानि षट्त्रिꣳशत्सा बृहती, यानि चत्वारिꣳशत्सा पङ्क्तिर्यानि [३][चतुश्]चत्वारिꣳशत्सा त्रिष्टुग्, यान्यष्टाचत्वारिꣳशत्सा जगत्येतानि वै चतुरुत्तराणि[४] छन्दाꣳसि ॥ २ ॥ तेषामु वै पुनरेव यानि नव स त्रिवृत्स्तोमो, यानि पञ्चदश स[५] पञ्चदशो, [६]यानि सप्तदश [स][५] सप्तदशो[६], यान्येकविꣳशतिः स एकविꣳशो, यानि सप्तविꣳशतिः[७] स त्रिणवो, यानि त्रयस्त्रिꣳशत् स त्रयस्त्रिꣳश[८], एते षडुत्तराः स्तोमाः ॥ ३ ॥ सप्तदश[९] परिशिष्यन्ते, ताः सामिधेन्यः, सोऽर्धमासाः स ऐन्द्रः[१०]; पञ्चदशो वज्रोऽत्र ह वा अस्यैतत् प्रायणीय एव सर्वꣳ समारूढं भवति चतुरुत्तराणि च छन्दाꣳसि षडुत्तराश्च स्तोमाः सामिधेन्योऽर्धमासा इति; तस्मादाहुर्यश्चैवं वेद यश्च न प्रायणीयो यज्ञ इति, प्रायणीयो [११]ह्येव [य]ज्ञः[१२] ॥ ४ ॥ [२८] [इति पञ्चमोऽनुवाकः]

इदं वा अन्वाहुः- कद्रूश्च[१२] वै सुपर्णी चात्मरूपयोर[१३](स्पर्धेताꣳ सा कद्रूः सुपर्णीमजयत्; साꣳब्रवीत् तृतीयस्यामितो दिवि सोमस्तमा हर, तेनात्मानं निष्क्रीणीष्वेति ॥ १ ॥ इयं वै कद्रूरसौ सुपर्णी छन्दाꣳसि सौपर्णेयाः ॥ २ ॥ साऽब्रवीदस्मै वै पितरौ पुत्रान् बिभृतस्तृतीयस्यामितो दिवि सोमस्तमाहर तेनात्मानं निष्क्रीणीष्वेति मा कद्रूरवोचदिति ॥ ३ ॥ जगत्युदपतच्चतुर्दशाक्षरा सती, साऽप्राप्य न्यवर्तत, तस्यै द्वे अक्षरे) अमीयेताम् ॥ ४ ॥ त्रिष्टुगुदपतत् त्रयो[१२](दशाक्षरा सती, साऽप्राप्य न्यवर्तत, तस्यै द्वे अक्षरे) अमीयेताम् ॥ ५ ॥ ते गायत्रीमब्रूतां त्वमुत्पतेति; सा तथेत्यब्रवीच्चक्षुर्मे दत्तमिति, तां तथेत्यब्रूताम्[१५]; साऽग्निमब्रवीच्चक्षुर्मे देहीति, तां तथेत्यब्रवीत्[१६]; साऽऽदित्यमब्रवीच्चक्षुर्मे देहीति, तां तथेत्यब्रवीत्; अथो

१. MHP °रेतसां. २. MHP यान्यष्टाविंशतिन्यष्टाविंशति. ३. MHP om. ४. MHP om; thus AO VI.46:156.21. ५. MHP om. ६-६. Caland thinks it as interpolation (AO VI. 46:157 fn 2). therefore he puts the text under square bracket ; (AO VI.46:156.22 23). ७. MHP °विंशः AO VI.46:156.23 °विंश. ८. MHP °त्रिंशत्. ९. MHP; AO VI. 46:156.23. पञ्चदश; the number of Samidhenīs is 17 not 15; cf VādhŚS I. 7.9; III.11.15; IV 2.32 etc. १०-१०. MHP इन्द्रः. ११-११. MHP °...ह्यवज्ञ. १२. MHP क्रतुश्च. १३. MHP abr. as °रूपयोर=अमीयेताम्; cf. TS VI.1.6.1-4. १४. MHP abr. as त्रिष्टुगुदपाद त्रयो=च्छमीयेताम्; cf TS VI.1.6.5. १५. MHP repeat त्वमुत्पतेति सा तथेत्यब्रवीच्चक्षुर्मे दत्तमिति तां तथेत्यब्रूतां between तथेत्यब्रूतां and साऽग्नि°. १६. MHP ब्रूतां.

[1]एतशानामश्वानां जवं ददामीति हैनामादित्योऽब्रवीत् ॥ ६ ॥ तामुदपातयत्—'**सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः**[2] **(कनीनिकां यदेतशेभिरीयसे भ्राजमानो विपश्चिता; चिदसि मनाऽसि धीरसि दक्षिणाऽसि यज्ञियाऽसि क्षत्रियाऽस्यदितिरस्युभयतःशीर्ष्णी सा नः सुप्राची) सुप्रतीची संभव**' इति ॥ ७ ॥ तस्यै वा अतिपादादबिभयुः[3]; तां '**मित्रस्त्वा पदि बध्नातु**' इति पदि यजुषाबध्नन्; '**पूषाऽध्वनः**[4]**(पात्विन्द्रायाध्य)क्षाय**' इतीन्द्रमेवास्या अध्यक्षमकुर्वन्; '**अनु त्वा माता मन्यताम्**' इत्यनुमदन्, '**अनु पिता**[5]**(ऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः सा देवि देवमच्छेहीन्द्राय) सोमम्**' इति; सा सोममादत्त ॥ ८ ॥ ताꣳ सोममाह्रियमाणं [6](गन्धर्वो विश्वावसुः पर्यमुष्णात्; स तिस्रो रात्रीः परिमुषितोऽवसत्; तस्मात् तिस्रो रात्रीः क्रीतः सोमो वसति ॥ ९ ॥ ते देवा अब्रुवन्स्त्रीकामा वै गन्धर्वाः स्त्रिया निष्क्रीणामेति; ते वाचꣳ स्त्रियमेकहायनीं कृत्वा तया निरक्रीणन् ॥ १० ॥ सा रोहिद्रूपं कृत्वा गन्धर्वेभ्योऽपक्रम्यातिष्ठत्, तद्रोहितो जन्म ॥ ११ ॥ ते देवा अब्रुवन्नप युष्मदक्रमीन्नास्मानुपावर्तते; विह्वयामहा इति) ब्रह्म गन्धर्वा अवदन्नगायन् देवाः ॥ १२ ॥ '**ये ह पूर्वे जना आसुः**' इति ब्रह्म गन्धर्वा अवदन्। **°येभ्यः पूर्ववहो हितम्। शीर्षण्वाꣳस्तेभ्यो**[7] **गन्धर्वः पुरो देवेभ्य आतपत्**[8] ॥ **ये ह पूर्वे जना आसुः पूर्वे पूर्वतरेभ्यः। मूर्धन्वाꣳ**[9]**स्तेभ्यः सौभुवः**[10] **पुरा सूर्यादुतातपद्**' इति ॥ १३ ॥ '**या स्त्रीणां प्रथमा वर्या**' इति गाथां देवा अगायन्। **°यस्यां विश्वमिदं जगत्। तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ॥ सरस्वति प्रेदमव सुभगे वाजिनीवति। तां त्वा विश्वस्य भूतस्य प्रगायामस्यग्रतः**' इति ॥ १४ ॥ सा देवान् गायत उपावर्तत; [11](तस्माद् गायन्तꣳ स्त्रियः कामयन्ते; कामुका एनꣳ स्त्रियो) भवन्ति य एवं वेद; तस्मादुतैव[12] स्त्रियो मनस्विनीतमा[13] अन्यत[14] उपमन्त्रिताः पुꣳस उपावर्तन्ते[15] ॥ १५ ॥ तस्मान्नु ह ब्रह्म च गाथां च पुरस्तात् सोमस्य

१. MHP त तेशानाम°. २. MHP abr. as °रक्ष्णः=सुप्रतीची, cf. TS I.2.4.5-6. ३. MHP °दवभयुः. ४. MHP abr. cf. TS. I.2.4.8. ५. MHP abr., cf. TS. I. 2.4.8. ६. MHP abr, cf. TS. VI. 1.6.11-14. ७. MH शीर्षबाꣳ°, P शीषबाꣳ°. ८. M °तपन्, H आपतत्, P आतपतत्. ९. MP मूर्धान्वाꣳ°. १०. MP सौक्षुवः, H सौभ्रवः, thus AO. VI.47 : 158.12. ११. MHP abr. as उपावर्तत=भवति, cf TS VI.1.6.14-15. १२. MHP °दुतैत. १३. MHP °स्विनितमा; cf TS VI.1.6.8. : तेजस्विनीतमा. १४. MHP अन्यतस्तूपमन्त्रिता पुंसे; thus AO. VI. 47 : 158,19. १५. MHP om.

क्रयादभिव्याहरेदेताम्[1] ह तद् देवताममृतामवरुन्धे ॥ १६ ॥ तदाहुः— को विश्वावसुरिति ॥ १७ ॥ [२९]

[2][तदाहुः- को विश्वावसुरि]त्यसौ[3] वा आदित्यो विश्वावसुः; स यदु हैवैषोऽहश्च रात्रिश्च विषुरूपे वस्त एषो हैवास्य सा विश्वावसुता ॥ १ ॥ पद्भ्यां द्वे सवने समगृह्णान्मुखे(नैकम्; यन्मुखेन समगृह्णात्तदधयत्तस्माद् द्वे सवने शुक्रवती प्रातःसवनं च)[4] माध्यन्दिनं चेति ॥ २ ॥ ते उ ह वा एते सवने शुक्रवती प्रातःस[5](वनं च माध्यन्दिनं च; तस्मात् तृतीयसवन ऋजीषमभिषुण्वन्ति धीतमिव हि मन्यन्ते ॥ ३ ॥ आशिरमव नयति सशुक्रत्वाया)थो सं भरत्येवैनत् ॥ ४ ॥ तं [6]गायत्र्याहरन्तीत्यकामयत; तेन वसन्तं प्राविशत्; तां तत्रान्वविन्दन्— '**अदितिरसि**' इति ॥ ५ ॥ तेन शरुं प्राविशत्; तां तत्रान्वविन्दन्— '**आदित्याऽसि**' इति ॥ ६ ॥ तेन हेमन्तं प्राविशत्; तां तत्रान्वविन्दन्— '**शुक्राऽसि**' इति ॥ ७ ॥ तेन शिशिरं प्राविशत्[7]; तां तत्रान्वविन्दन्— '**चन्द्राऽसि**' इति ॥ ८ ॥ तेन संवत्सरं प्राविशत्[7]; तां तत्राभ्यगृह्णन् '**बृहस्पतिस्त्वा सुम्ने रण्वतु**' इति; '**रुद्रो वसुभिरा चिकेतु**[8]' इत्यधिवदन्[8] ॥ ९ ॥ ते देवा अब्रुवन्ननेनाहुत्याऽऽहरामेति; तदनेनाहुत्याऽऽहरन् '**पृथिव्यास्त्वा मूर्धन्ना**[9]**(जिघर्मि देवयजन इडायाः पदे) घृतवति स्वाहा**' इति ॥ १० ॥ यावत्मूतꣳ[10] संवपतीति ब्राह्मणम्; स उ ह वा एष एव सोमो राजा प्रत्यक्षं यदेते ꣳसवः; तस्यै वा अपक्रमादबिभयुः; ताꣳ स्पन्द्यां[11] कृत्वाऽन्वपाघ्नꣳ[12]स्तस्माच्छदिरन्वारभेते न स्पन्द्याम्; एतद्ध वा एतस्या अप्येवैतर्हि भयमपक्रमादेवैतस्यै एव तद् देवतायै[13]; अनपक्रामुका हास्य वाग् भवति य[14] एवं वेद ॥ ११ ॥ '**एष ते गायत्रो भागः**' इति प्रातःसवनꣳ हैवैतद्, '**एष ते त्रैष्टुभो भागः**' इति माध्यन्दिनꣳ हैवैतत् सवनम्, '**एष ते जागतो भागः**' इति तृतीयसवनꣳ हैवैतत्; '**छन्दोमानाꣳ साम्राज्यं लोकं गच्छ**' इति यदेवोर्ध्वꣳ सवनेभ्यः क्रियते तदु हैवास्यैतदत्र संस्थितेन हैनेन चरत्येवंवित् ॥ १२ ॥ ग्रहो वै गृहीतस्तिष्ठति यजमानोऽसावेव कृष्णाजिने; तस्य भक्षाभक्षस्य मीमाꣳसा; अध्वर्यविति पृच्छेद्— यत्सुरापाय सोमपीथं प्रदास्यसि[1] छेत्स्यसि न्वा एनꣳ सुरापीथाद्, [2]यद्यु वा अस्मै[2] न प्रदास्यसि

१. MHP °व्याहरे एता°. २. MHP om. ३. MHP. तत्यसौ. ४. MHP abr., cf. TS VI.1.6.9. ५. MHP abr., cf TS. VI.1.6.9-10. ६. MHP गायत्रा. ७. MHP °विशन्. ८. M चिकोत्वित्यधि°, P चिकेत्विध्यव°. ९. MHP abr., cf. TS I.2.5.8. १०. MHP यावद्भूतं, thus AO VI.48:160.2.; cf TS VI.1.8.8. Keith.(T.S. vol. II p.496 fn.5, reads यावन्मूतं. ११. MHP स्पन्द्यं. १२. MHP °न्वपघ्नꣳ. १३. MHP तदेव तया; thus AO VI.48:160.7. १४. MHP om.

यज्ञादेनꣳ सोमपीथादन्तरेष्यसि; कथं करिष्यसीति ॥ १३ ॥ [३][स य]दु हैवादो राजन्यो राज्ञा सङ्गच्छतेऽत्र भक्षितो हैवास्य तदा सोमो राजा भवति; काले तु हास्मै पार्श्वतस्तिष्ठन् दधि प्रदेदीयेतैवमु हैनꣳ सोमपीथान्नान्तरेति ॥ १४ ॥ '**अमात्योऽसि**' इति स यदु हैवादो राजन्यो[४] . . . हैवैनममा कुरुते; '**शुक्रस्ते**[५] **ग्रहः**' इत्यसावादित्यः शुक्रस्तस्मा एनं गृह्णाति; '**अभि त्यं देवꣳ सवितारम्**' इत्यतिच्छन्दसर्चा मिमीते; तद्वा एतच्छान्तं[६] छन्दः शान्तः सुवर्गो लोकस्तस्य चत्वारि पदानि षोडशकलानि, षोडशकलः [७][चतु]ष्पादः षोडशकलंषोडशकलं कृत्वा हरति; स यत्प्रथमꣳ हरत्यस्मिन्नेवैनं लोक आदधाति; अथ यद् द्वितीयꣳ हरत्यन्तरिक्षलोक एवैनमादधाति; अथ यत् तृतीयꣳ हरति दिविलोक एवैनमादधाति; अथ [८]यच्चतुर्थꣳ हरति [९][नाकस्यैवैनं पृष्ठ आदधाति; अथ यत्पञ्चमꣳ हर]ति ब्रध्नस्यैवैनं विष्टप आदधाति ॥ १५ ॥ एतावन्तो वै देवलोकास्तेष्वेवैनं यथापूर्वमाधाय पञ्चकृत्वस्तूष्णीꣳ हरति; दश संपद्यन्ते, दशाक्षरा विराड् विराजमेव तदन्नाद्यमृत्विजो यज्ञमुखे यजमान[मादधति ॥ १६ ॥ '**अदितिरस्युभयतः**][१०]**शीर्ष्णी**' इत्येकादशाक्षराणि; तेषां यान्यष्टौ सा गायत्री; यानि नव त्रिवृत्स्तोमः; द्वे अक्षरे उदिते द्विपादु हैव यजमानोऽत्रो ह यजमानो नानाश एवानयोर्लोकयोः प्रतितिष्ठति ॥ १७ ॥ तदाहुरिति [के]चन— क्व ह्यस्यैतत् सर्वस्य किं भविष्यति यदेकः प्रतिगृह्णाति; न हैनं दक्षिणा प्रतिगृहीताऽऽप्नोति य एवं वेद ॥ १८ ॥ तदाहुः— किमेव गायत्रीति; संवत्सरो वै गायत्री; भूरिति द्वे अक्षरे भुव इति द्वे; एषा वै सत्याजहार; सा सोमं चाहरच्चत्वारि च[ाक्षराण्यन्तरि][११]क्षमिति चत्वारि; तानि वा एतान्यष्टौ संपद्यन्तेऽष्टाक्षरा गायत्री ॥ १९ ॥ तदाहुरित्थंविदः प्रतिगृह्ये न वा एतद् गायत्रियै कलंबुष्ठिकायां[१२] च न यदन्तरा प्रायणीयं चोदयनीयं चापि ह्येतेन बहून्ययुतानि दक्षिणानां दक्षिणापथेनेयुरिति न[१३] .... पद ॥ २० ॥ तद्वा इदमन्वाहुर्— गायत्र्युदपत[१४]च्चतुरक्षरा सत्यजया ज्योतिषा, तमस्या अजा(ऽभ्यरुन्ध तदजाया)[१५] अजत्वमिति ॥ २१ ॥ तदाहुः- कतमा साऽजेति; एषा ह वै साऽजा यैषा

१. MHP °स्यसी. २-२. MHP यद्युपास्मै. ३. MHP om; thus AO. VI.49:161.7 ४. MHP broken राजन्यो and हैवै°. ५. MHP शुक्रन्ते. ६ MHP °छाप्तं. ७. MHP broken ८. MHP यत्तृतीयं चतुर्थं. ९. MHP broken. १०. MHP broken. ११. MHP broken १२. MP कलंकुष्ठि°. १३. MHP broken. १४. MHP °त्र्युदपदत्. १५. MHP abr. cf. T VI. 1.6.७

पुरस्तादादित्यस्यौषस्युदेति[१]; एतस्यै ह वा एषा देवतायै पत्नी; तां पुरस्कृत्योदेति; तस्मादेष एवं देवानां तपत्येव; [स][२] यो ह वा एवंविद्वान् जायां पुरोदधीत शश्वद्धैवमेव[३] मनुष्याणां तपो यदेव जाया[४]; एतद्ध स्म वै विद्वाꣳसः पूर्वे राजानो ब्राह्मणाश्च महान्तो जायां पुरोदधतेऽन्नस्य[५] रूपमिति वदन्तः; स यो ह वा एवं-विद्वान् जायां पुरोदधीत शश्वद्धान्नाद एव स्यात् ॥ २२ ॥ इयं वै कद्रूरसौ सुपर्णी; मनो वा इयं, मनः कद्रूः; वागसौ, वाक् सुपर्णी; छन्दाꣳसि सौपर्णेयाः; स यद्ध वै वाङ् न स्यान्न तर्हि छन्दः स्यात्; यदा ह्येवैनद् वाचाऽभिव्याहरत्यथ छन्दो भवति; तद् वा एतद् वाचश्चैव मनसश्च चेष्टितम्, एते हि ब्रह्म प्रत्यक्षम् ॥ २३ ॥ **[३०]**
[इति षष्ठोऽनुवाकः]

तस्माद् वावोह्यमानाद्[६] देवता विपलायन्त[७] मामस्मा आलप्स्यन्ते मामिति; तमग्निरुपाधारयत्; तं व्रीहिरुद्गतो[८]ऽवापश्यदुप न्वा एनमग्निरदीधरदिति; तस्मान्नु[९] हैनमग्निना च व्रीहिभिश्च प्रतितिष्ठन्त उप ह्येनमेतावधारयताम् ॥ १ ॥ तदाहुर्— यत् सोमस्य हातिथ्यं क्रियते, विष्णव उ हविर्निरुप्यतेऽग्नावु[१०] ह हूयते, कथमेतदिति; व्रीहिमेवैतं[११] विष्णवे मेधायालभन्ते, विष्णुं छन्दोभ्य आलभन्ते, छन्दाꣳसि सोमाय राज्ञ आलभन्ते, सोमꣳ राजानं देवेभ्य आलभन्ते; तं यथा महोक्षं मेदयेयुरेवमेनमे-तैर्हविर्यज्ञैर्मेदयन्ति; तद्धविर्यज्ञानाꣳ हविर्यज्ञत्वम् ॥ २ ॥ [१२]ते वा[१२] एते देवा अन्योऽन्यस्यान्नं, तेऽद्यमानाः पीयमाना न क्षीयन्ते[१३]; तस्मान्नु ह श्रोत्रियोऽन्नꣳ स्याद्, एवꣳ हैवाद्यमानः पीयमानो न क्षीयते यथैते देवा[१४] न क्षीयन्ते[१४] ॥ ३ ॥ तद्वा इदमन्वाहुः— शिरो वा एतद् यज्ञस्य यदातिथ्यꣳ हविरेतद् यत् पुरोडाश इति; स यद्धविरासाद्या[ग्निं][१५] मन्थति हव्यायै[वासन्नाय सर्वा देवता][१६] जनयतीति ॥ ४ ॥ तदाहुः— कतमास्ता देवता या हव्यायासन्नायाग्निना सह जायन्त इति; '**गायत्रं छन्दोऽनु प्रजायस्व**' इत्येकादशाक्षराणि, '**त्रैष्टुभं छन्दोऽनु प्रजायस्व**' इत्येकादश, '**जागतं छन्दोऽनु प्रजायस्व**' इत्येकादशैता[१७] वै[१७] त्रयस्त्रिꣳशद्देवता हव्यायासन्ना-याग्निना सह जायन्ते; तस्मादाहुरग्निः सर्वा देवता इति ॥ ५ ॥ असुरा वा एतस्मिँल्लोके देवानुपायन्त ॥ ६ ॥ **[३१]**

१. MHP °त्यस्योष°; thus conjectured AO VI. 50:162. fn 1. २. MHP broken. ३. MHP शश्वद्धवैमेव; thus AO. VI. 50.162.4. ४. MHP देवं भाया; Caland thinks that the text भाया has been awefully corrupted, AO VI.50:162 fn.3. ५. MP °ऽन्नास्य. ६. Possibly वाव ओह्य° AO VI.51.162. fn.4. ७. MHP निपला°; thus AO VI. 51.162.22. ८. MHP °रुद्वतो. ९. P तन्नु. १०. MHP °रुच्यते; thus AO VI.52 : 163.9. ११. MHP °मेवैतं; thus conjectured AO VI.52:163.fn.2. १२-१२. MHP देवा. १३. H नष्टीयन्ते. १४-१४. MHP देवानां न क्षीयते. १५. MHP om. १६. MHP broken; thus AO. VI. 53 : 164.4. १७-१७. MHP °दशैता वे; AO VI.53a:164.7: दशैव, ता वै.

अस्सुरा वा एतस्मिँल्लोके[१] देवानुपायन्त[२]; ते देवा मनसि यज्ञꣳ समारोह्य पलायन्त; तान्[३] पुरूरवा ऐडोऽब्रवीद् वरं वृणा, अथाहमतोऽसुरानपनोत्स्ये, मदन्त एवैष यज्ञक्रतुरसदिति; सोऽसुरानपानुदत; तस्मान्नु हैष इडान्तो यज्ञक्रतुः॥ १॥ ते देवा अभिपर्यावृत्याब्रुवन्– समिष्टयजुर्वा इदꣳ हित्वा पलायिष्महि कस्मिन्निदꣳ होष्याम इति; मनसीत्यब्रुवन्, मनसि हि यज्ञꣳ समारोह्य पलायिष्महीति; तस्मान्नु हैतं[४] मनसि हूयते यत्समिष्टयजुः; तत् '**प्रजापतौ त्वा मनसि जुहोमि**' इति त्रिरवजिघ्रति यजमानः; एते नु हैतस्य क्रतोरनूयाजाः॥ २॥ हिरण्यमवधाय पञ्चकृत्वस्तानूनप्त्रं विगृह्णाति; एत उ हैतस्य क्रतोः पत्नीसंयाजाः; '**आ पतये त्वा गृह्णामि**' इत्ययं वै लोक आपतिरस्मिन्नेवैनं लोके प्रतिष्ठापयति; '**परि पतये**' इत्यन्तरिक्षलोको[५] वै परिपतिरन्तरिक्षलोक एवैनं प्रतिष्ठापयति; '**तनूनप्त्रे**[६]' इति दिविलोको वै तनूनपाद्, दिविलोक एवैनं प्रतिष्ठापयति; '**शाक्वराय**' इति नाकस्यो वै पृष्ठꣳ शाक्वरो नाकस्यो एवैनं पृष्ठे प्रतिष्ठापयति; '**शक्मन्नोजिष्ठाय**' इति ब्रध्नस्यो वै विष्टपꣳ शक्मन्नोजिष्ठो, ब्रध्नस्यैवैनं विष्टपे प्रतिष्ठापयति; एतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रतिष्ठापयति[७]॥ ३॥ प्रजापतिर्ह वै परमेष्ठिनमेवाग्रे देवानां पुत्रं जनयाञ्चकार; स ह को मामर्हतीति, यज्ञꣳ श्रममतिमेने; तꣳ ह यज्ञो नास्पृशत्; अथ देवा यज्ञेन श्रमेणैतां [८]गतिमगच्छन् यथैतर्हि[८] देवाः॥ ४॥ तैर्नातीतैव विददर्श; स होवाच प्रजापते किमिदमभूदिति; तꣳ होवाच प्रजापतिर्यज्ञꣳ श्रममत्यमꣳस्थाः, स त्वा नास्पृशत्; अथो देवा यज्ञेन श्रमेणैतां [८]गतिमगच्छन् यथैतर्हि[८] देवाः॥ ५॥ [स][९] होवाच— कमयक्षथेति[१०]; सोमꣳ राजानमयक्ष्महीति; [११]तꣳ ह[११] यक्ष्य इति होवाच, यं यूयमयक्षध्वमिति[१२]; सोमो ह वाव यज्ञोऽथ ये के चार्वाचीनꣳ सोमाद् यज्ञाः सोममेव तैर्यज्ञैर्यजन्ते; तद्धविर्यज्ञानाꣳ हविर्यज्ञत्वम्॥ ६॥ तदाहुः— [१७]कः परमेष्ठीति; आपो ह वाव परमेष्ठी; स यो ह वा आपः परमेष्ठीति वेद परमताꣳ हैव गच्छति॥ ७॥ **[३२]** [इति सप्तमोऽनुवाकः]

---

१. MHP काले for लोके ; thus AO. VI. 53b : 164.15. २. MHP °पायततं. ३. तां. ४. MHP हैनं; thus AO VI. 53b : 164.22. ५. AO VI. 54:165.14 : °लोक वै. ६. MP तनूनपा; H om. ७. MHP प्रतितिष्ठति; thus AO VI. 54 : 165.19. ८-८. MHP °गच्छन्नथैतर्हि; thus AO VI. 55 : 165.27, fn 3 : अगच्छनथैवहि. ९. MHP broken ; thus AO. **ibid.** १०. Caland suggests कमयक्षतेति: AO VI.55 : 166, fn 1. ११-११. MHP तमहं. १२. MHP °मयद्वमिति.

तदाहुः–[१]कथमस्यैतेऽनूयाजाः समन्वाग[च्छ]न्तीति[२]; तत् तप्तं व्रतं सुतप्तं चमसे व्रतप्रदाने[३] पर्यस्यति, तद्यजमानो व्रतयति; यज्ञो वै यजमानो यज्ञ एव तद्यज्ञं प्रतिष्ठापयति; एवं नु हास्यैते[४]ऽनूयाजाः समन्वागच्छन्ति॥ १॥ तद्वा[५] इदमन्वाहुर्– घृतं वै देवा यज्ञं कृत्वा प्रचरन्तीति; '**अꣳशुरꣳशुस्ते देव सोमाप्यायताम्**' इति हिरण्यमवधाय राजानमाप्याययन्ति; अमृतं वै हिरण्यममृतेनैवैनं तदमृतं करोति॥ २॥ तद्वा इदमन्वाहुः— शिरो वा एतद्यज्ञस्य यदातिथ्यं, ग्रीवा उपसदः; तस्माद् यदेवातिथ्यं बर्हिर्भवति तत्र[६] स्तीर्णमेव[६] तदुपसदां बर्हिर्भवति; तस्माद् यदेव शीर्षन् केशा जायन्ते तैरुवेव ग्रीवाश्छन्ना[७] भवन्ति; यस्मादेवमेतद्यज्ञे क्रियते॥ ३॥ तदाहुर्व्यृद्धं वै॥ ४॥ **[३३]**

[तदाहुर्][८]– व्यृद्धं वा एतद्यज्ञस्य यदुपसदो न प्रयाजा इज्यन्ते नानूयाजाः; कथमेतत् प्राणं पन्थानमापद्यत इति; '**सीद होतः**' इति चत्वार्यक्षराणि, '**सीद होतः**' इति चत्वारि वाव; तान्यष्टौ संपद्यन्ते; अष्टावक्षराणि प्रथमस्या उपसद एवं द्वितीयस्या एवं तृतीयस्यै; तानि चतुर्विꣳशतिः संपद्यन्ते; चतुर्विꣳशत्यक्षरा गायत्री, प्राणो गायत्री, पन्था गायत्र्येवं नु हैतत् प्राणं पन्थानमापद्यते; तस्मात् '**सीद होतः**' इत्येवैतस्य क्रतोः प्रवर, एतस्यै संपदे॥ १॥ गायत्रीरेवानुब्रूयादित्याहुस्तेजो वै गायत्री तेज आत्मन्धत्त इति॥ २॥ त्रिष्टुभ एवानुब्रूयादित्याहुरिन्द्रियं वै त्रिष्टुगिन्द्रियमेवात्मन्धत्त इति॥ ३॥ जगतीरेवानुब्रूयादित्याहुर्जागतो वै पशवः; पशूनेवावरुन्ध इति॥ ४॥ तदु वा आहुर्ग्रीवा वा एता यज्ञस्य यदुपसदो, ग्रीवाश्छन्दसां जगत्यस्तस्माज्जगतीरेवानुब्रूयादिति; जगतीरेवान्वाहैतस्यै वीर्याय संपदे॥ ५॥ **[३४]** [इत्यष्टमोऽनुवाकः]

छन्दाꣳस्यब्रुवन् पाप्मानं धुनवामहा इति; तानि तथेत्यब्रुवन्; तानि गायत्रीमब्रुवन् त्वं धूनुष्वेति; साऽधूनुत; तत् कृतमभवत्[९]; तानि त्रिष्टुभमब्रुवन्[१०] त्वं धूनुष्वेति; साऽधूनुत; सा[११] त्रेताऽभवत्; तानि जगतीमब्रुवन् त्वं धूनुष्वेति; साऽधूनुत[१२]; स द्वापरोऽभवत्; तान्यनुष्टुभमब्रुवन् त्वं धूनुष्वेति; साऽधूनुत; स

---

१. MHP कतम°. २. MHP °गन्तीति. ३. MHP °प्रदाग्ने. ४. AO.VI.56:167.7: हाप्येते. ५. MHP तद्या. ६-६. MH तद्धीर्णमेव, P तदीर्णमिव; thus AO VI.57:167.17-18. ७. MHP ग्रीवाच्छन्ना. ८. MHP, AO VI.58:167.31 om. ९. MHP तत्क्रमभवत्. १०. MHP °ब्रवीत्. ११. H om. १२. AO VI.59a:168.22 om. साऽधूनुत.

कलिरभवत्; तान्यब्रुवन्नगाद्[१] वा अस्मत् पाप्मेति; तेऽया अभवꣳस्तदयानामयात्वम्[२]; तानि वा एतानि विपाप्मानि छन्दाꣳसि; स यस्य ह वशः स्यादेतानि हास्य विपाप्मानि छन्दाꣳसि वषट्कारमश्नुवीरन्॥ १॥ एष उ ह वै श्रोत्रियः सपाप्मा योऽक्षैर्दीव्यति, न हि तस्य छन्दाꣳसि सते; अथ हैष विपाप्मा योऽक्षैर्न दीव्यति, तस्यो ह छन्दाꣳसि सते[३]; तस्मान्नु ह श्रोत्रियोऽक्षैर्न दीव्येत; विपाप्मा ह भवत्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एवं वेद॥ २॥ तं ते च[४]..... निन्नुन् व्यभिनत्; स विभीतको[५]ऽभवत्; तस्माद्वा ओषधयोऽधि[६] पलायन्त; तस्मान्नु हैष वृक्ष[७] एवानुव्यम् ; ते[७] यदश्मास्तैरश्मानमविध्यन् ; तमादाय [८]पर्यैक्षन्तास्ति न्वा अस्मिन् भोग्यमिति; तेऽश्मनः कृतादयो निरमीमत॥ ३॥ [**३५**] [इति नवमोऽनुवाकः]

[ते देवाः][९] कलेरधि सीसं त्रपुलोहमिति[१०] यत् किञ्चैतत् तत् सर्वं निरमीमत; स वै स वज्र एव निरमीयत[११], तस्य वा एतस्य वज्रस्य सर्वमिदमन्नमसिनैव यवान्[११क] कृन्तन्ति, परशुना वनस्पतीन् वृश्चन्ति; अन्नेनो वा एते[१२].... गिरीणां गिरित्वम्॥ १॥ ते देवा अब्रुवन् वज्रो वा अयं निरमायि कथमेनं यज्ञेऽवयातयेमेति[१३]; ते[ऽयस][१४] एवायाशयां[१५] निरमीमत, रजताद् रजाशयाꣳ[१५] हरिताद्धराशयाम्[१५]॥ २॥ तदाहुः- किमयाशयेतीयꣳ ह वा अया[शयाऽन्तरिक्षꣳ रजाशया दिविलोकꣳ हराशया॥ ३॥ तदाहुः— किमेवायाशयेत्यग्निर्ह वा अयाश][१६]या वा[यू][१७] रजाशयाऽऽदित्यो हराशया॥ ४॥ तदाहुः— किमेवा[या][१८]शयेत्यापो ह वा अयाशयौषधयो रजा[शया][१९] वनस्पतयो हराशया॥ ५॥ तदाहुः— किमेवा[या][२०]शयेत्यृचो ह वा अयाशया यजूꣳषि र[जाशया सामानि हराशया॥ ६॥ तदाहुः— किमेवायाशयेति][२१] ब्राह्मणो ह वा अयाशया राजन्यो रजाशया वैश्यो हराशया॥ ७॥ तदाहुः— किमेवा[या][२२]शयेति गावो ह वा

१. MHP यगाद्या; thus AO VI.59a:168.24. २. MHP °मयत्वम्. ३. MHP शते. ४. MHP broken between तं ते च [MHP तं तञ्च] and निन्नुन्. ५. MHP विदितको. ६. MHP °धयोऽभि°; thus AO VI.59b:170.6. ७-७. MHP ऋक्ष एवानुष्यन्ते; thus AO **ibid.** ८. MHP परीक्षन्त; thus conjectured by Caland (AO. VI.59b:170 fn 6). ९. MHP broken; thus AO VI.59b:170.8. १०. AO VI.59b:170.9:°लोकमिति. ११. MHP निरमायत; thus AO VI. 59b :170.10. ११क. MHP मृदान्; thus conjectured AO VI.59b:170.23. १२. MHP broken between एते and गिरीणां. १३. Caland conjectures वियातयामेति for अवयातये° (AO VI. 59b : 170 fn 9). १४. MHP om; thus AO.VI.59b:170.13. १५. AO VI.59.b:170.14. °शयं; thus MHP. १६. MHP broken, १७. MHP om. १८. MHP om. १९. MHP अजा for रजा and शया om. २०. MHP om. २१. MHP om; this is my conjecture. २२. MHP om.

अयाशयाऽजावयो रजाशयाऽश्वा हराशया॥ ८॥ अत्रो होपसद एवेदꣳ सर्वं भवति यदि[दं][१] किञ्चैतैरादेशैः॥ ९॥ [**३६**] [इति दशमोऽनुवाकः]

इदं वा अन्वाहुः- [तेषाम][२]सु[राणां ति][३]स्रः पुर आसन्(यस्मय्यवमाऽथ रजताऽथ हरिणी; ता देवा जेतुं नाशक्नुवन्; ता उपसदैवाजिगीषन्; तस्मादाहुर्यश्चैवं वेद यश्च नोपसदा वै महापुरं जयन्तीति; त इषुꣳ समस्कुर्वताग्निमनीकꣳ सोमꣳ शल्यं विष्णुं तेजनम् ; तेऽब्रुवन् क इमामसिष्यतीति; रुद्र इत्यब्रुवन् , रुद्रो वै क्रूरः सोऽस्यत्विति; सोऽब्रवीद् वरं वृणा अहमेव पशूनामधिपतिरसानीति; तस्माद्रुद्रः पशूनामधिपतिः; ताꣳ रुद्रोऽवासृजत्; स तिस्रः पुरो भित्त्वैभ्यो लोकेभ्योऽसुरान् प्राणुदत; यदुपसद उपसद्यन्ते)[४] भ्रातृव्यपराणुत्या इति॥ १॥ तेऽसुरा पराजितायन्तः पृथिवीलोकमाविशन्; ते यामेव देवतां प्रथमामुपसदमुपासीदꣳस्तयैवैनाꣳस्ततः प्राणुदन्त॥ २॥ ते वा अन्तरिक्षलोकमाविशन्[५]; ते यामेव [५]देव[तां द्वितीयामुपसदमुप][६]सीदꣳस्तयैवैनाꣳ[७]स्ततः प्राणुदन्त॥ ३॥ ते वै दिविलोकमाविशन्; ते यामेव देवतां तृतीयामुपसदमुपासीदꣳ[८][स्त]यैवैनाꣳस्ततः प्राणुदन्त॥ ४॥ ते वा इमाँल्लोकानाविशन्; ते या[९] एव देवतास्तिस्र उपसद उपासीदꣳस्ताभिरेवैनाꣳस्ततः प्राणुदन्त॥ ५॥ ते वा अहोरात्रे आविशन्; ते या एव देवताः सायं प्रातरुपसद उपासीदꣳस्ताभिरेवैनाꣳस्ततः प्राणुदन्त॥ ६॥ ते वै षड्तून् आविशन्; ते या एव देवताः षडुपसद उपासीदꣳस्ताभिरेवैनाꣳस्ततः प्राणुदन्त॥ ७॥ ते वै द्वादश मासान् संवत्सरमाविशन्; ते या एव देवता द्वादशोपसद उपासीदꣳस्ताभिरेवैनाꣳस्ततः प्राणुदन्त॥ ८॥ ते वै चतुर्विꣳशतिरर्धमासानाविशन्; ते या एव देवताश्चतुर्विꣳशतिरुपसद उपासीदꣳस्ताभिरेवैनाꣳस्ततः प्राणुदन्त॥ ९॥ ते वै देवानाविशन्॥ १०॥ [**३७**]

ते[१०](वै देवानावि)शन्; तानवान्तरदीक्षयैवात्मनोऽधि[११] प्राणुदन्त; तेऽवर्तिं पाप्मानं क्षुधं ब्रह्महत्यां प्रत्यूह्य पलायन्त; ते देवा अब्रुवन्निमे वा अवर्तिं क्षुधं पाप्मानं ब्रह्महत्यां प्रत्यूह्य पलायिषत, कथमेतत् स्यादिति॥ १॥ तामेतस्यामाहुत्यामेवान्तरितां[१२] पर्यपश्यन्; **'या ते अग्नेऽयाशया[१३] तनूः'** इति

१. MHP broken. २. MHP broken. ३. MHP broken. ४. MHP abr., cf.TS.VI. 2.3.1-2. ५-५. MHP °न्ते अयमेव देव देव. ६. MHP broken. ७. M सीदꣳस्तवैना°; HP सीदं यैवैनां°. ८. MHP om. ९. MHP य. १०. MHP abr. ११. MHP °त्मनोऽभि; thus AO VI.60:171.12. १२. MHP तमे° रितं; thus conjectured AO VI.60:171.fn.1. १३. MHP अग्नेया तनू.

स्रुचि[१] स्रुवेणाज्यस्थाल्या अध्युपसदमुपहन्ति[२] '°**वर्षिष्ठा गह्वरेष्ठा**' इति; '**उग्रं वचो अपावधीम्**' इति मध्यमे परिधौ स्पर्शयति; ब्रह्महत्या ह वा उग्रं वचो ब्रह्महत्यामपहते ॥ २ ॥ '**तया नः पाहि तस्यास्ते स्वाहा**' इति जुहोति; '**त्वेषं वचो अपावधीम्**' इत्यपक्षिपति[३]; अशनयापिपासे ह वै [४]क्षुत् तमः[४] पाप्मा त्वेषं वचोऽशनयामेव तत् क्षुधं पाप्मानं ब्रह्महत्यामपहते; अनभ्याख्यायुकं[५] हास्याक्षोधुकंभावुकं भवत्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एवं वेद; तस्मान्नु हैषैवमेव होतव्या ॥ ३ ॥ **[३८]** [इत्येकादशोऽनुवाकः]

॥ इति द्वितीया दशिका समाप्ता ॥

इदं वा अन्वाहुर्- असुराणां वा इयमग्र आसीद्यावदासीनः [६](परा पश्यति, तान्नद्देवानाम्; ते देवा अब्रुवन्नस्त्वेव नोऽस्यामपीति; कियद्वो दास्याम इति; यावदियꣳ सलावृकी त्रिः परिक्रामति तावन्नो दत्तेति; स इन्द्रः सलावृकीरूपं कृत्वेमां त्रिः सर्वतः पर्यक्रामत्; तदिमामविन्दन्त; यदिमामविन्दन्त) तद्वेद्यै वेदित्वम् ॥ १ ॥ देवा अब्रुवन् [७]दूरेव्यन्तरा वा इमे लोका दुर्गोपाः[८], कथमेनान् गोप्स्याम इति; त इमामेव वेदिमकुर्वतान्तरिक्षमुत्तरवेदिं[९] दिवमुत्तरनाभिम्; आदित्यमेवास्या[१०] एतं[११] पुरस्ताद् गोप्तारमकुर्वन्नाहवनीयम्; रुद्रमेवास्या एतमुत्तरतो गोप्तारमकुर्वन्नाग्नीध्रीयं धिष्णियम्; अजमेवास्या एतमेकपादं पश्चाद् गोप्तारमकुर्वन् गार्हपत्यम्; यममेवास्या एतं दक्षिणतो गोप्तारमकुर्वन् मार्जालीयं धिष्णियम्; इन्द्रमेवास्या[१२] एतं मध्यतो गोप्तारमकुर्वन् होतुर्धिष्णियम्; ता वा एता देवता एवं विभक्ता इमाँल्लोकान् गोपायन्ति; एतासां देवतानाꣳ सायुज्यꣳ सलोकतां जयति [य एवं वेद][१३] ॥ २ ॥ **[३९]** [इति प्रथमोऽनुवाकः]

तदाहुर्- यमातिथ्यमासाद्याग्निं मन्थन्ति क्वैतस्य विभक्तिरिति; यमेवैतं प्राञ्चमाहवनीयात्प्रहरन्त्येषो एवैतस्य विभक्तिरेत उ[१४] हैवास्य धिष्णिया भवन्त्यविकृष्टा एवाग्नयः ॥ १ ॥ तदाहुर्- यं पशुमुपाकृत्याग्निं मन्थन्ति क्वैतस्य विभक्तिरिति; यमेवैतमुदञ्चमाहवनीयात् पशुश्रपणꣳ हरन्त्येषो एवैतस्य विभक्तिरेत

१. MHP स्रुति. २. MHP °मुपनन्ति. ३. MHP °क्षिपश्यति. ४-४. MH °क्षुतमः. ५. MHP °नभ्याख्यायिकं. ६. MHP abr. as °दासीना=तद्वेद्यै, cf TS. VI.2.4.6. ७. M दूरे, H नूरे, P दूरे. ८. MHP दुर्गोपाः. ९. MHP °रिक्ष उत्तर°. १०. MHP °दित्यदेवा°. ११. MHP एतत्. १२. MHP इन्द्रियमे°. १३. MHP om; thus AO VI. 61 : 173.12. १४. MHP add ते उ after उ.

उ हैवास्य धिष्णिया भवन्त्यविकृष्टा एवाग्नयः ॥ २ ॥ तदाहुर्- यत् सर्व एवान्य ऋत्विजो धिष्णियवन्तोऽथ कतम एवाध्वर्योर्धिष्णिय इति; आहवनीय इति ह ब्रूयाद्, आहवनीयो ह वावाध्वर्योर्धिष्णियः; तस्मादाहवनीयमभ्यावृत्याश्रावयति यथा [१]स्वधिष्णियमेवम् ; एषोऽध्वर्योर्धिष्णिय इत्याहुः ॥ ३ ॥ कतम एव ब्रह्मणो धिष्णिय इति; उद्गातेति ह ब्रूयाद्, उद्गाता[२] ह वाव ब्रह्मणो धिष्णियः; तस्मादुद्गातारमभ्यावृत्यास्ते यथा स्वधिष्णियमेवम् ; एष ब्रह्मणो धिष्णिय इत्याहुः ॥ ४ ॥ कतम एवोद्गातुर्धिष्णिय इति; आदित्य इति ह ब्रूयाद् , आदित्यो ह वावोद्गातुर्धिष्णियः; तस्मादुदगावृत्योद्गा[३]तोद्गायति यथा स्वधिष्णियमेवम्; एष[४] उद्गातुर्धिष्णिय इत्याहुः ॥ ५ ॥ कतम एव सदस्यस्य[५] धिष्णियः सर्वस्य च सदस इति; यजमान इति ह ब्रूयाद्, यजमानो ह वाव सदस्यस्य[५] धिष्णियः, स उवेवेतरेषाꣳ सर्वेषाम्; एष सदस्यानां धिष्णिय इत्याहुः ॥ ६ ॥ कतम एव यजमानस्य धिष्णिय इति; श्रद्धेति ह ब्रूयाच्छ्रद्धा ह वाव यजमानस्य धिष्णियः; तस्मादाहुरश्रद्दधानं यजमानमधिष्णियो यजतेऽधिष्णियोऽयष्टेति वा ॥ ७ ॥ **[४०]** [इति द्वितीयोऽनुवाकः]

इदं वा अन्वाहुर्- देवासुराः संयत्ता आसन्; ते देवा एतं यज्ञवज्रं पर्यपश्यन् यद् यूपम्; तेनासुरानघ्नन्निति; तथो[६] एवैतेन[६] वज्रेण यजमानो द्विषतो भ्रातृव्यान् हन्ति ॥ १ ॥ तेऽसुराः पराजिता यन्तः पितृलोकमाविशन्; तानुपरेणैव पितृलोकात् प्राणुदन्त; ते वा इमं लोकमाविशन्, तान्[७] यदूर्ध्वमुपरादा[७] रशनायास्तेनैवैनाꣳस्ततः प्राणुदन्त; ते वा ओषधीराविशन् ; तान् रशनयैवौषधीभ्योऽधि प्राणुदन्त; ते वा अन्तरिक्षलोकमाविशन् ; तान्[७] यदूर्ध्वं[७] रशनाया आचषाला[त्][८] तेनैवैनाꣳस्ततः प्राणुदन्त; ते वै दिविलोकमाविशन् ; ताꣳश्चषालेनैव दिविलोकात् प्राणुदन्त; ते वा अमुं लोकमाविशन् ; तान्[७] यदूर्ध्वं[७] चषालादतिरिक्तमेतद् यूपस्य तेनैवैनाꣳस्ततः प्राणुदन्त; एवं हैवैभ्यो लोकेभ्यो यजमानो द्विषतो भ्रातृव्यान् प्रणुदते ॥ २ ॥ तद् वा इदमन्वाहुः- कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्धेताम्; सा सुपर्णी कद्रूमब्रवीद्— अन्ध[९] इति; सा कद्रूः सुपर्णीमब्रवीत् पश्येवैं[१०] किल त्वं तद् यदहं पश्यामीति[११];

१. MHP वद्धिष्णि°. २. MHP °गाताता. ३. MHP °दुदजावृ° ४. MHP एषोद्गा°. ५. MHP सदस्य. ६-६. MP ततो वैतेन [P तथो], H तथो तेन; thus AO VI.63:174.30. ७-७. MHP तान्यूर्ध्वमुपरादा. ८. MHP om. ९. AO VI.64a.fn 1 : अघ्न as Ms reading. १०. AO VI.64a:175.fn.2 : पश्ये वै as Ms reading, but this is only in H; thus MP. ११. MHP पश्यमिति.

पश्येयꣳ हीति; [१]तन्नौ कस्या, आत्मनोरिति मातीꣳरिति[१] हाब्रूताम्; [२]ते वैते[२] आत्मनोरेवाꣳशमपजह्नाते[३] ॥ ३ ॥ सा कद्रूः सुपर्णीमब्रवीदश्वोऽयं मेध्यस्तिष्ठति पारे समुद्रस्य, तस्यैष[४] वालो लम्बते; पश्यस्येता३मिति; नेति होवाच; यां वै तां ब्रह्मवाद्यमेव जिगायैषा ह वै सा पृथिवी याऽन्तरेणाग्नी[५]; एष[५] एव स समुद्रो यदाहवनीयः; एष एव सोऽश्वो मेध्यस्तिष्ठति पारे समुद्रस्य यद् [६]यूपस्तस्यैष वालो लम्बते यद् रशना; अनन्धंभावुकं हास्य भवत्यस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एवं वेद ॥ ४ ॥ तद्वा इदमन्वाहुर्— इन्द्रो वृत्रमहन्; तं वृत्रो हतः षोडशभिर्भोगैरसिनादिति[७]; स उ ह वा एतदेवेन्द्रो रूपमकुरुत यद् यूपस्य; स प्राङ्नमत् ; तस्य ये पुरस्ताद् भोगा आसन् ताꣳस्तत्र विचिच्छेद; स प्रत्यङ्ङनमत्; तस्य ये पश्चाद् भोगा आसन् ताꣳस्तत्र विचिच्छेद; एवꣳ हैव द्विषतो भ्रातृव्यस्य स्कन्धाꣳसि वृश्चति य एवं वेद ॥ ५ ॥ [४१] [इति तृतीयोऽनुवाकः]

तद् वा इदमन्वाहुर्- देवा वै सꣳस्थिते सोमे प्र स्रुचोऽ[८](हरन् प्र यूपम्; तेऽमन्यन्त यज्ञवेशसं वा इदं कुर्म इति; ते प्रस्तरꣳ स्रुचां निष्क्रयणमपश्यन्त्स्वरुं यूपस्य सꣳस्थिते सोमे प्र प्रस्तरꣳ हरति जुहोति स्वरुमयज्ञ)वेशसायेति ॥ १ ॥ स उ ह वा एष एव यजमानो यद् यूपः, सुवर्गो लोक आहवनीयः; तं यदाहवनीयेऽनुप्रहरति यजमानमेव तत् सुवर्गे लोक आहवनीय आदधाति ॥ २ ॥ तदाहुः- तिष्ठेदेवैष, एतद्वै सुवर्गस्य लोकस्याक्रमणं यद् यूपः; एतदेवाक्रमणं कृत्वा सुवर्गं लोकमभ्येतीति; यतरदु हैवैनयोः कतरच्च कुर्यात् तत् समृद्धम् ॥ ३ ॥ तद्वा इदमन्वाहुर्- यज्ञेन वै देवाः सुवर्गं लोकमायन्; तेऽमन्यन्त [९](मनुष्या नोऽन्वाभविष्यन्तीति; ते यूपेन योपयित्वा सुवर्गं लोकमायन्, तमृषयो यूपैनैवानु प्राजानन् तद् यूपस्य) यूपत्वमिति ॥ ४ ॥ तदाहुर्- ऋजुरेव यूपः स्यादृजुना वै देवाः सुवर्गं लोकमायन्निति ॥ ५ ॥ स उ ह वा एष एव यजमानो यद् यूपः, स यथेमानि पुरुषस्याङ्गापरूꣳष्यानतोप[नता][१०]न्येवꣳ हैष आनतोपनतः स्याद्, यजमानस्तु हर्जुः[११] स्यात्; तेनर्षयो याजयितारोऽप्येतर्हि सुवर्गं लोकं प्रजानन्ति; एष उ ह

१-१. MHP तन्नोकस्यात्मानोरिति [H °कस्यो°] AO VI. 64 a : 175.29 : तन्नोकस्यामानोरिति as Ms reading ; however, in fn 3 Caland gives the reading of Dr. Dumont as तन्नौ कस्या मातीरिति. २-२. MHP तेवैते; thus conjectured by Caland, AO VI. 64a : 175 fn 4. ३. MHP °रेवाꣳशुम°; thus AO VI. 64a : 176.1. ४. MHP तस्यैषा. ५-५. MHP °ग्नीनेष; thus AO VI. 64a : 176.4. ६. MHP यद्रूप°. ७. MHP भगिरसिनादिति. ८. MHP abr. as स्रुचो=पेशसायेति, cf TS VI. 3.4.23. ९. MHP abr as तेऽमन्यन्त= यूपत्वमिति; cf TS VI. 3.4.20. १०. MHP broken. ११. MHP हर्जः.

त्वयुपितो[१] यज्ञो यथैनं व्रजिनमपहारकं याजयन्ति, तेनर्षयो याजयितारोऽप्येवैतर्हि सुवर्गं लोकं न प्रजानन्ति ॥ ६ ॥ [तदाहुः- क एष यूपः स्यादिति; खादिर एव यूपः स्यादिति; तद् वा][२] इदमन्वाहुर्- वषट्कारो वै गायत्रियै शिरोऽच्छिन(त्; तस्यै रसः परापतत्; सः पृथिवीं प्राविशत्; सः[३] खदिरोऽभवत् ; तस्मात् खादिर एव यूपः स्यात् ॥ ७ ॥ तृतीयस्यामितो [४](दिवि सोम आसीत् ; तं गायत्र्याहरत् ; तस्य पर्णमच्छिद्यत; तत्पर्णोऽभवत् , तत्पर्णस्य) पर्णत्वम् ; तस्मात्पालाश एव यूपः स्यात् ॥ ८ ॥ देवा वै खलं कृत्वोर्जं व्यभजन्त; तत उदुम्बर उदतिष्ठत् ; उर्ग् वा उदुम्बरः; तस्मा[दौदुम्बर एव यूपः स्यात् ॥ ९ ॥ असौ वा आदित्यो यतोऽजायत][५] ततो बिल्व उदतिष्ठत् प्रत्यक्षं यूपः; तस्माद् बैल्व एव यूपः स्यात् ॥ १० ॥ रोहितकेनो वै देवा सुवर्गं लोकमारोहꣳस्तद् रोहितकस्य रोहितकत्वम्; तस्माद् रौहितक[६] एव यूपः स्यात् ॥ ११ ॥ खादिरेणो[७] वै देवा असुराणां वामं [८]वस्वखिदन् ; एवमु हैनेनैवंविद् यजमानो द्विषतो भ्रातृव्यस्य वामं वसु खिदति; तस्मात् खादिर एव यूपः स्यात् ॥ १२ ॥ [४२] [इति चतुर्थोऽनुवाकः]

अग्नीषोमाभ्यां वै प्रणीयमानाभ्यां प्रजापतिरन्नं नाविन्दत् ; तौ तमेवात्स्यतो रूपे[णान्वागच्छेताम्; स एतमग्नीषोमीयं पशुम][९]पश्यत् ; तमालभत; तस्य लोम्नैव लोमास्पृणुत त्वचा त्वचं माꣳसेन [१०]माꣳसमस्थ्नाऽस्थि मज्ज्ञा[१०] मज्जानꣳ शुक्लेन शुक्लम् ; तस्मान्नु हैष[११] आत्मन्वी सर्वाङ्ग आण्डीवलः स्याद् यदग्नीषोमीयः पशुरात्मस्परण[१२] इव हि ॥ १ ॥ त[स्य वा एतस्याग्नीषोमीयस्य पशोर्वपा प्रातः-][१३] सवनस्य रूपं, पुरोडाशो माध्यन्दिनस्य सवनस्य रूपꣳ हविस्तृतीयसवनस्य रूपं, तद्ध्येतदृजीषस्य रूपं यदस्थीनि[१४], सोमस्यैतद्राज्ञो रूपं यन्माꣳसम्; स वा एषोऽग्निष्टोमसंमितो यदग्नीषोमीयः पशुः; स य एवं [१५]विद्वानग्नीषोमीये[न पशुना यजतेऽ][१५]न्नं [१६][विन्दति ॥२ ॥ त]स्यैकादश प्रयाजा एकादशानूयाजा

१. MHP त्वेयुवितो; thus AO VI. 64d;178.18. २. MHP broken. ३. MHP abr. as शिरोच्छिन्न=खदिरो; cf TS III. 5.7.1. ४. MHP abr as तृतीयस्यामिति=पर्णत्वं, cf TS III.5.7.2. ५. MHP broken; thus AO VI. 64e:179.8-9; cf. TS II.1.8.3. ६. MHP रोहितक [M °ही°]. ७. MHP खदिरे° ; thus AO VI. 64e:179.12. ८. MHP wrongly give the sign of broken text between असुराणां वामं वस्व and असुराणां वामं वस्व, the latter being merely a repetitoin of the former ; thus AO VI.64e:179.12. ९. MHP broken ; thus AO. VI.65a:179.23-24. १०. MHP °मन्थास्थिमज्जा. ११. MHP हेष. १२. MHP °रात्मस्फुरण; thus AO VI. 65a:179.27. १३. MHP broken ; thus AO VI.65b:180.14. १४. MHP यदस्मीति; thus AO VI.65b:180.16. १५. MHP broken. १६. MHP broken.

एकादशोपयजः; द्वावाघारौ द्वावाज्यभागौ वपै[व][१] पञ्चमी; पुरोडाशश्च पुरोडाशस्य च स्विष्टकृद्धविश्च वसाहोमश्च[२] वनस्पतिश्च हविषश्च स्विष्टकृत्, तानि वा एतानि ष[ट् संपद्यन्ते][३]; तान्येकादश संपद्यन्ते; त्रयस्त्रिꣳशत् पूर्वाणि; तानि वा एतानि चतुश्चत्वारिꣳशत् संपद्यन्ते; चतुश्चत्वारिꣳशदक्षरा त्रिष्टुप् ; त्रैष्टुभो वा इन्द्र इन्द्रमेवैना एतदभि संपादयति; तस्मादाहुर्यश्चैवं वेद यश्च न त्रिष्टुभोऽनुब्रूहीति[४], त्रैष्टुभेन छन्दसा[ऽन्वा][५]ह ॥ ३ ॥ स्तोकेभ्योऽनुब्रूहीति; षडन्वाह; षड् वा ऋतव ऋतुष्वेव वृष्टिं दधाति; तस्माद् ऋतवो वृष्टिं बिभ्रति, तस्माद् ऋतून् वृष्टिर्बिभर्ति, तस्माद् ऋतुषु वर्षति, यस्मादेवमेतद्यज्ञे क्रियते ॥ ४ ॥ अथातो वपाया एव ॥ ५ ॥ [४३]

अ[६](थातो वपाया ए)व; स यदाज्यस्योपस्तृणीतेऽयꣳ हैव स लोकः; अथ यद्धिरण्यशल्कं प्रास्यत्यग्निर्हैव[७] सः;[७] अथ यद् वपाꣳ संप्रलुम्पत्यभ्रमु हैवास्यैतद् वृष्टिरेव; अथ यदुपरिष्टाद्धिरण्यशल्कं प्रास्यत्यसावु[८] हैव स आदित्यः; अथ यदुपरिष्टादाज्येनाभिघारत्यसावु हैव स लोकः; अत्रो[९] ह वावेदꣳ[९] सर्वं भवति यदिदं किञ्चैतैरादेशैः ॥ १ ॥ ते देवा अग्नीषोमावब्रुवन्नप्येव[१०] वयमेतस्य हविषः प्राश्नीमेति; नेति सोमोऽब्रवीत्; सोऽग्निरब्रवीन्मयि[११] मनाꣳस्यावयध्वं, मामन्वेतस्य हविषः प्राश्नीतेति; तेऽग्नौ मनाꣳस्यावयन्त, तमन्वेतस्य हविषः प्राश्नन् ; स यदाह मनोतायै[१२] हविषोऽवदीयमानस्यानुब्रूहीत्यत्रो[१३] हैवास्यैता देवताः प्राश्नन्ति ॥ २ ॥ आग्नेयीरन्वाहाग्नौ[१४] हि मनाꣳस्यावयन्त; त्रिष्टुभोऽन्वाह, त्रैष्टुभः पशुः; द्वादशान्वाह[१५] द्वादश मासाः संवत्सरः; त्रयोदशान्वाह, त्रयोदशमासाः संवत्सरः[१६];

---

१. M वृवै, H ववै, P ..वै; thus AO VI.65c 180.29. २. MHP °होमञ्च. ३. MHP broken ; thus AO VI.65c:181.1, but om. वा एतानि before षट्. ४. MHP °नुब्रूहि; thus conjectured by Caland AO VI. 65c:181 fn 2. ५. MHP broken; thus conjectured AO VI.65C:181 fn 3. ६. MHP abr. as अ = व. ७-७. MHP °ग्निर्हवसो°, Caland gives the Ms text as अग्निर्हवत्सोऽना in AO VI.66:182. fn 1. ८. MHP प्रास्यत्यस्यत्यसावु; thus AO.66:182.8. ९-९. MHP °ऽ त्रौ ह वैवेदं; AO VI.66.182.11 : अथो. १०. MHP °षोमाववन्नज्येव [°प्येव]; thus AO VI.67:182.27. ११. MHP मत्रि. १२. MHP मनोकायै. १३. MHP °ब्रूहीत्यग्निरत्रो; thus AO VI. 67 : 182.31. १४. MHP °रन्वाह होहि°; Caland conjectures as अन्वाह होताग्नौ हि (AO VI.66:183 fn 1). १५. MHP repeat त्रैष्टुभः पशुर्द्वादशाहान्वाह द्वादशाहान्वाह after द्वादशाहान्वाह. १६. MHP add इरा after संवत्सरः.

स यतरा उ हैव [१]कतराश्चान्वाह, ताः संवत्सरमेवाभि संपद्यन्ते ॥ ३ ॥ तदाहुः- किं मनोतेति; वाग् वै मनोतैषा ह वै[२] मनस्योता तन्मनोतायै मनोतात्वम् ॥ ४ ॥ अथातः पृषदाज्यस्यैव; स उ ह वा एष एव विश्वरूपो ग्रहो गृह्यते यत् पृषदाज्यम् ; स यदाज्यस्योपस्तृणीत आज्यं न्वेव ह तत्; अथ यद् दध्नो गृह्णीते सोमो हैव स राजा ॥ ५ ॥ स यदाज्यस्योपस्तृणीते तस्मात् ताम्रꣳ [३]स्त्रियमृत्वियं विन्दति; अथ यद् दध्नो गृह्णीते[४] तस्माच्छुक्रं पुꣳसो वृष्णियं भवति ॥ ६ ॥ स यदाज्येन पुरस्ताच्चोपरिष्टाच्चाभिघारयति तस्मात् पशुं[५] जायमानमुभयतो रुधिरमनुजायते [६]यमेव कं च ॥ ७ ॥ तदाहुः— का पशोः सꣳस्थेति[७]; स यत् पृषदाज्येन हृदयमुत्तमं कृत्वाऽभिघारयति **'सं ते मनसा मनः'** इत्येषा ह वाव पशोः सꣳस्थाऽत्र सꣳस्थितेन हैनेन चरत्येवंवित् ॥ ८ ॥ स यो ह वा [८]एवंविदमेतस्मिन् काले चेष्टन्तमुप[९] वा मीमाꣳसेतानु वा व्याहरेत् तं ब्रूयाद् यथा [१०]शारीः पूर्वोत्पतिता[१०] अनुप्रविध्येत् तानाध्मायात् तादृक् तत् , त्वमेवैतामार्तिमारिष्यसीति[११]; शश्वद्ध तथैव स्याद् यथैनं ब्रूयात्; तस्मान्नु ह यज्ञस्याविदेव स्यान्नोपद्रष्टा ॥ ९ ॥ [४४] [इति पञ्चमोऽनुवाकः]

इदं वा अन्वाहुर्- देवा वै यज्ञमाग्नीध्रे व्यभजन्त; त[१२](तो यदत्यशिष्यत तदनुब्रुवन् वसतु नु न इदमिति, तद् वसतीवरीणां) वसतीवरीत्वमिति ॥ १ ॥ स उ ह वा एष एव यज्ञो यद् ग्रहो वासतीवरस्तं यदेतया वाचर्चा गृह्णाति, यज्ञो वै वाग् यज्ञेनैव तद् यज्ञं गृह्णाति ॥ २ ॥ **'हविष्मतीरिमा आपः'** इत्याज्यं न्वेव ह तद्, **'हविष्मान् देवो अध्वरः'** इति पुरोडाशो हैवैषः, **'हविष्माँ आ विवासति'** इति सवनीयो हैवैष पशुः, **'हविष्माँ अस्तु सूर्यः'** इति सोमो हैव स राजा; अमृतं वा आपो यज्ञो वसतीवरीस्तं यदेतया वाचर्चानुष्टुभा गृह्णात्यमृतं वै वागमृतेनैवैनं तदमृतं करोति ॥ ३ ॥ **'इन्द्राग्नियोर्भागधेयी [स्थ'** इति नवाक्षराणि, **'मित्रावरुणयोर्भागधेयी][१३] स्थ'** इत्येकादश, **'विश्वेषां देवानां भागधेयी स्थ'** इत्येकादश; तानि वा एतान्येकत्रिꣳशत् संपद्यन्ते; **'यज्ञे जागृत'** इति पञ्च, तानि वा एतानि षट्त्रिꣳशत्

---

१. MHP कन्तरा°. २. MHP वे. ३. MHP स्त्रयमृ°. ४. MHP repeat सोमो हैव स राजा स यदाज्यस्योपस्तृणीते after गृह्णीते. ५. MHP पशुर्जाय°. ६. MHP °ऽयमेव. ७. MHP सꣳस्थितेति; thus AO VI. 69 : 184.22. ८. MHP एवं वेदमे°. ९. MHP चेष्टत°, thus AO VI. 69 : 184.25. १०-१०. MHP शशि [H शरारिः] पूर्वो पतिता; thus AO VI. 69 : 184.26. ११. MP °मरिष्य°. १२. MHP abr. as व्यभजन्तत=वसतीवरी°; cf TS VI. 4.2.1. १३. MHP om; thus AO VI. 70 : 185.25-26.

संपद्यन्ते; षट्त्रिꣳशदक्षरा बृहतीत्यमृतं वा आपः सुवर्गो लोको बृहती; तं यदेतैर्यजुर्भि[र्ग्रहं गृहीत्वाऽऽ][१]भिरद्भिर्यजमानं परिहरत्यमृतेनैवैनं तत् [२]परिवृढः सुवर्गे लोक[२] एतस्यां बृहत्यामादधाति ॥ ४ ॥ ग्रहो वै गृहीतस्तिष्ठति यजमानोऽसावेव कृष्णाजिने[३]; स वै राज्ञा संगच्छते, ग्रहो ग्रहेण समागच्छत्यभि च राजानꣳ सुन्वन्ति जुह्वति च ॥ ५ ॥ क्व ततो यजमानो राज्ञा[४] व्यावर्तत इति; **'स्वाहा यज्ञं मनसा'**, **'स्वाहा द्यावापृथिवीभ्यां'**, **'स्वाहोरोरन्तरिक्षात्'**, **'स्वाहा यज्ञेऽधि यज्ञं विसृजे'** इत्यङ्गुलीरुत्पिचत्यत्रो ह यजमानो राज्ञा व्यावर्ततेऽत्रो हैव यज्ञे यजमानं वसतीवरीष्वपिसृजति; केवलमुवेव ततो यजमानमभि सुन्वन्ति जुह्वति, यजमानो हैव नामातो भवति ॥ ६ ॥ तदाहुः ॥ ७ ॥ [४५]

तदाहुः— कथं छन्दोमयमृत्विजो यज्ञमुखे यजमानं कुर्वन्तीति; **'आसन्यान् मा मन्त्रात्[५] (पाहि कस्याश्चिदभि)शस्त्याः'** इति पुरा प्रातरनुवाकाज्जुहुयात्; ब्रह्म ह वा आसन्यो मन्त्रः; तद् वा एतद् यजुः षोडशकलं, षोडशकलो वै [६]यजमानस्तमेतयैवाहुत्यै[७]वंविदध्वर्युः षोडशानामृत्विजां मुखे[८] दधाति; तं ततः स्तुतशस्त्रैर्न्यासप्रणवैश्छन्दोमयमृत्विजो यज्ञमुखे यजमानं कुर्वन्ति ॥ १ ॥ स उ ह वा एष एव यज्ञो यद् ग्रहो वासतीवरस्तस्य किꣳ स्तोत्रं किमुक्थमिति; तस्यो ह विश्वरूपा एव स्तोत्रं प्रातरनुवाक[९] उक्थम् ॥ २ ॥ प्राणापानावेवास्यैतौ यदुपाꣳश्वन्तर्यामौ, वागैन्द्रवायवो, दक्षक्रतू मैत्रावरुणः श्रोत्रमाश्विनश्चक्षुषी शुक्रामन्थिनौ मुखमाग्रयणोऽङ्गान्युक्थ आयुर्ध्रुवः प्रतिष्ठर्तुपात्रे ॥ ३ ॥ तस्यो वै पुनराघारावेवास्यैतौ यदुपाꣳश्वन्तर्यामौ, प्रयाजा द्विदेवत्या आज्यभागौ शुक्रामन्थिनौ हविराग्रयण उक्थः स्विष्टकृदनूयाजा ध्रुव, एतामु हैवास्य यज्ञविहितिमनु दर्शपूर्णमासौ विहितौ भवतः ॥ ४ ॥ तदाहुर्– अध्वर्यो यद् दश ग्रहाः प्रातःसवने गृह्यन्ते तेषां क्वोक्थानि; **'वायवा याहि दर्शत'** इत्युपाꣳश्वन्तर्यामयोः, **'इन्द्रवायू इमे सुताः'** इत्यैन्द्रवायवस्य, **'मित्रꣳ हुवे पूतदक्षम्'** इति मैत्रावरुणस्य, **'इन्द्रा याहि चित्रभानो[१०]'** इति शुक्रामन्थिनोः, **'भरेष्विन्द्रम्'** इत्याग्रयणस्य, उक्थान्येवोक्थस्याग्निमारुतं ध्रुवस्य ॥ ५ ॥ [४६] [इति षष्ठोऽनुवाकः]

१. MHP broken; thus AO VI. 70 : 185.29-30. २-२. MHP °वृढं सुवर्गो लोकं [H लोको]; thus AO VI. 70 : 185.31. ३. MHP °जिनं; thus AO VI. 71 : 186.25. ४. MHP राज्ञो; thus AO VI. 71 : 186.27. ५. MHP abr. as मन्त्रात्= शस्त्या, cf TS III.1.7.1. ६. MHP यजमानं; thus AO VI. 72 : 187.22. ७. MHP °हुस्त्येवं°. ८. MHP ऋत्विजामुखेषु; thus AO VI. 72 : 187.23. ९. MHP वाकमु. १०. M चित्रभानाविति; H °भानादिति.

स उ ह वा एष एव यज्ञो यद् ग्रहो वासतीवरस्तं यदग्नौ जुहोति, तन्न्वेव हाग्नौ संभवति; स तत ऊर्ध्वो धूम उदेति, सोऽन्तरिक्षं गच्छति; तदु हैवान्तरिक्षे संभवति, स तत ऊर्ध्वो धूम उदेति, स दिवं गच्छति; तदभ्रमिव सꣳहन्ति, तद् वर्षति, यावन्तः स्तोकाः प्रश्चोतन्ति तावन्तो हैव ग्रहाः ॥ १ ॥ त इमामागच्छन्ति तावन्तो हैव ग्रहाः; त इमा कृषन्ति तावन्तो हैव ग्रहाः; तन्मुष्टि[भि]रिव[१] चर्यते, तावन्तो हैव ग्रहाः; तत् पक्वं मुष्टिपरामर्शं लुम्पन्ति तावन्तो हैव ग्रहाः; तन् मृडित्वोपनह्य निदधति[२] ॥ २ ॥ स उ ह वा एष एव सोमो[३] राजा प्रत्यक्षं यद् व्रीहियवौ; तस्य स्थाल्येव द्रोणकलशः, पात्राणि वायव्यान्याधवनीयपूतभृता-वेवास्यैतौ यदुदहरणौ, येऽवघ्नन्ति तेऽभिषुण्वन्ति, [४]यः पचति[४] स शमिता, य उद्धरति स उन्नेता, य उपहरन्ति ते चमसाध्वर्यवो, येऽश्नन्ति त ऋत्विजः ॥ ३ ॥ स यौ प्रथमौ[५] [पिण्डावोदनस्य नि][६]दधाति ॥ ४ ॥ [४७]

स यौ[७](प्रथमौ पिण्डावोदनस्य निद्)धात्युपाꣳश्वन्तर्यामौ न्वेव हास्य तौ, याꣳस्त(त)स्त्रीन्[८] द्विदेवत्या हैवास्य ते; यौ ततोऽपरौ शुक्रामन्थिनौ हैवास्य तौ, यं ततोऽपरमाग्रयणो हैवास्य स; यं ततोऽपरमुक्थ्यो हैवास्य स; यं ततोऽपरं ध्रुवो [हैवास्य सः; यानेवात][९] ऊर्ध्वं दशभ्यः पिण्डेभ्यः पिण्डाननुदधाति, य एवोर्ध्वं दशभ्यो ग्रहेभ्यो[१०] ग्रहा गृह्यन्ते त[११] उ ह वा अस्य ते ॥ १ ॥ स एवैषोऽग्निष्टोम-संमितो यदोदनः; स य एवंविद्वान् ब्राह्मणायौदनं पचत्यग्निष्टोमसंमितꣳ हैव [तस्मा ओदनं पचति ॥ २ ॥ सत्यं][१२] चैव गायत्री श्रद्धा च प्रतिष्ठा; स यो नु ह सत्यं च वदति श्रच्च धत्ते तस्य नु हैतदेवं भवति यथैतदन्वाख्यानेन; अथ ह[१३] योऽनृतं च वदति न च श्रद्धत्ते नो हैतस्यैतदेवं भवति यथैतदन्वाख्यानेन, नो ह त[स्यैतद् भवति; तस्मात् सत्यं][१४] चैव विवदिषेच्छ्रच्च दधीत; उत म एतदेवꣳ स्याद् यथैतदन्वाख्यानेनेति ॥ ३ ॥ स[१५] यत्कामेनोदनं[१५] पचेत् तत् किलेच्छेत्[१६]; तमुद्धृत्य

१. MHP °मुष्टिरिव; thus AO VI. 74 : 188.26. २. HP निदधाति, thus M, AO VI.74:188.28. ३. MHP सोमा. ४-४. MHP यं पचन्ति; thus AO VI.74:188.31. ५. MHP प्रथमे. ६. MHP broken, thus Ao VI.74:189.1. ७. MHP abr. as स यौ=सात्युपाꣳ°. ८. MHP याꣳस्तस्त्रीन्. ९. MHP broken; thus AO VI.74:189.5. १०. MHP add ऽथहेभ्योऽथ between, दशभ्यो and ग्रहेभ्यो. ११. MHP om; thus AO VI.74:189.7. १२. MHP broken; thus AO VI.74:189.9. १३. AO VI.74:189.11 : om. १४. MHP broken; thus AO VI.74:189.13. १५-१५. MHP सायं [HP स] कामेनौ°; thus AO VI.74:189.15. १६. MHP किरेचेत्; thus conjectured AO VI.74:189 fn 5.

प्रभु सर्पिररुपसिच्य तस्मिन् दशहोतारं व्याचक्षीत; तं विदुषे ब्राह्मणाय दद्यात्; [तद् यद् विदुषे ब्राह्मणाय ददाति][१] तद् देवास्तृप्यन्ति; देवेषु तृप्तेषु स[र्व][२]मिदं तृप्यति यदिदं किञ्च; एतद्ध स्म वै तद् विद्वानाह वाधूलो द्वादश न्वा अहं पात्रौदनान् व्यूढच्छन्दस आप्तदक्षिणाद् वृणीयेति; तथा हि सोऽन्नस्य महिमानमेव तत् ॥ ४ ॥ [४८] [इति सप्तमोऽनुवाकः]

..........[३] पारिषथोयेन दीव्यति यमेतं पूर्वशिञ्जर इत्याचक्षते; ते ह पारिषथोयो जिगाय [४][य]दस्य स्वमास; तत् स हामत्तो जायामनुप्रदधौ[५]; तस्याः[६] हार्धपरिजितायामुत्तस्थौ; नाद्य[७] देविष्याव इति; सोऽपरेण गार्हपत्य[मृणाकुण्डे न्यपद्यत..........][८] रूपेणेन्द्रस्यारातिकामभिसङ्कल्पमानस्तस्य हेन्द्रं तृतीयस्यां दिवि [९]स[न्तं] तपो[९] जगाम; स ह जातवेदसमामन्त्रयमाण उवाच— जातवेदः शिरो मे रुजतीवेति; तमु ह जातवेदा उवाच— ऋषिर्न्वा[१०] अयमपरेण गार्हपत्यमृणाकुण्डे न्यपाद्य [११][... रूपेण ता]वेवारातिकामभिसङ्कल्पमानो[१२], नो हि ते तदेवैतद्रुजतीवेति; तस्यार्धं व्रजिष्याव इति ॥ १ ॥ ताविन्द्राग्नी आवव्रजतुः[१३]; तमपरेण गार्हपत्यं शयनमाजग्मतुः; तमु ह जातवेदा उवाच— ऋषे किमिदमभूदिति; नैवाशित्वेति होवाच, यद् वै किञ्च दीव्यामो यदन्येऽस्मानेवाभिभवन्ति[१४], तदेवैतदधाम इवेति ॥ २ ॥ तमु ह जातवेदा उवाच— ऋषेऽव वा एतज्जेष्यस्यगद इन्द्रोऽस्त्विति; अगद इन्द्रो बभूव ॥ ३ ॥ प्रातस्तदृषिरवजिगाय ॥ ४ ॥ [४९]

प्रा[१५](तस्तदृषिरवजिगा)य; अतो नो गा वेदः[१६]..... तमिति; तं होवाचैवं [१७]चैतदभूदिति; तं तथेत्यूचतुरजातशत्रुर्मेधातिथः[१८] कुरुराजस्तं त्वा गमयिष्यावः; तस्मा इत्थमित्थं वाचा प्रादुर्भविष्यावो राजन् यो नावेत्थं वेदात् स[१९] स्म त्वा याजयतादिति[२०]; तमु त्वं ब्रवसीति[२१] होवाच- राजन्नहं[२२] वै तमग्निं वेद

१. MHP broken; I conjecture so. २. MHP broken; thus AO VI. 74 : 189.17. ३. MHP text broken before पारिषथोयेन. ४. MHP om. ५. Caland thinks जायमनुप्रदध्यौ (AO VI. 75:190 fn 7 and 8). ६. MHP °पराजिता°; thus AO VI. 75.190.21. ७. MHP नेद्य. ८. MHP broken; thus conjectured, AO VI. 75:190 fn 10. ९-९. MHP सन्तपो; thus AO VI.75:190.23. १०. MHP ऋषीन्वा [°षि°]; thus AO VI. 75 : 190.25. ११. MHP °कुण्डोऽन्यपाद्य and broken therafter. १२. MHP सङ्कल्पयमानो. १३. MHP आव्रजतः; thus AO VI. 75 : 191.3. १४. MHP °नेव° भवन्ति. १५. MHP abr. as प्रा=यातो. १६. MHP broken between वेद and तमिति. १७ MHP चैतद्°; thus AO VI.75:191 fn 5. १८. MHP मेधातिथः [H °थिः] १९. MHP om; thus AO VI.75:191.11. २०. AO VI.75:191.12 : °त्वादिति. २१. MHP ब्रुव°. २२. MHP राजन्नपं.

यस्मिंस्त्वा देवाः समवादिषत; अहं त्वा याजयानीति ॥ १ ॥ स त्रीन् वतीनानेतवै ब्रवसि कुमारानविभ्योऽध्यूर्णांस्तान्[१] पुरस्ताद् राज्ञः[२] प्रस्रष्टवै ब्रवसि; तेषां यो हरिकेशो भविता, सोऽहं भवितास्मीति हैनमुवाच जातवेदाः ॥ २ ॥ सोऽपि[३] नतद्रूप[३] इव तिरो दर्भस्तम्बं भवितासि[४]; स स्म त्वं निर्ज्ञायैतद् वै तिरोऽभूदिति चतुर्गृहीतेन गार्हपत्यस्योद्धते दर्भस्तम्बे हिरण्यमुपास्यानुवित्तिं जुहुतात्[५] '**शृणोत्वग्निः समिधा हवं मे**' इति, तदहमुज्ज्वलितास्मि[६]; तदेनं श्रद्धा वेत्ताथ[७] ते बहु धनं दाता[८] राजैष इति[८क] ॥ ३ ॥ तमञ्जसायनीभिरानिन्यतुः; ततोऽर्वागञ्जसायन्य आजग्मतुः कुरुक्षेत्रम्; ताविन्द्राग्नी राज्ञे वाचा प्रादुर्बभूवतू राजन् यो नावेत्थं वेदात् स स्म त्वा याजयतादिति; तं हैतदृषिरागत्योवाच— राजन्नहं वै तमग्निं वेद यस्मिंस्त्वा देवाः समवादिषताहं त्वा याजयानीति; स त्रीन् वतीनानेतवा उवाच कुमारानविभ्योऽध्यूर्णांस्तान्[१] पुरस्ताद् राज्ञः प्रस्रष्टवा[९] उवाच; तेषां यो हरिकेशो बभूव सोऽग्निर्बभूव, सोऽपि[३] नतद्रूप[३] इव तिरो दर्भस्तम्बं बभूव; तदृषिर्निर्ज्ञायैतद् वै तिरोऽभूदिति; चतुर्गृहीतेन गार्हपत्यस्योद्धते ॥ ४ ॥ [५०]

[चतुर्गृहीतेन गार्हपत्यस्योद्धते][१०] दर्भस्तम्बे[११] हिरण्यमुपास्यानुवित्तिं जुहवाञ्चकार[१२] '**शृणोत्वग्निः समिधा हवं मे**' इति; तदग्निरुज्जज्वाल[१३] इति[१४]; तदेनं श्रद्धा[१५] विवेद; तस्मै बहु धनं ददौ राजैषः ॥ १ ॥ तमापः परिसुस्रुवुः; सो[१६] ह वा एषा परिस्रावती[१७] नाम कुरुक्षेत्रेऽग्नेराहुतिः पुरस्तादग्न्याधेयस्य हूयतेऽनुवित्तिर्हि; अनूक्ते प्रातरनुवाके हूयतेऽनुवित्तिर्हि; पुरस्तादुखासंभरणस्य हूयतेऽनुवित्तिर्हि ॥ २ ॥ [१८]यस्यैतस्यामहुतायामन्यत् कर्म कुर्वन्त्यननुवित्ताग्निमु हैव तं याजयन्त्यथ[१९] यस्यैतस्यां हुतायामन्यत् कर्म कुर्वन्त्यनुवित्ताग्निमु हैव तं याजयन्ति[१९] ॥ ३ ॥ तद् वा इदमन्वाहुर्- वसतीवरीर्गृह्णाति, यज्ञो[२०] (वै वसतीवरीर्यज्ञमेवाऽऽरभ्य गृहीत्वो)पवसतीति ॥ ४ ॥ तदाहुः- कतमास्ता वसतीवरय

१. MHP °ध्युणां. २. MHP राज्ञं. ३-३. MHP सोऽपि न तद्रूप. Caland conjectures this text as सो विनतद्रूप or सोऽविनतद्रूप, AO VI.75:191 fn 6. ४. MHP भवितास्मि; thus conjectured AO VI.75:191 fn 7. ५. AO VI.75:191 जुहुयात्; fn8 जुहुयाः. ६. MHP मुज्वलि°. ७. MHP वेत्तात्ते; thus conjectured AO VI.75.191 fn 9. ८. MHP दात. ८क. MHP om; thus conjectured AO VI.75:191 fn 11. ९. MHP प्रष्टवा; thus AO VI.75:191.25. १०. MHP om. ११. AO VI. 75:192.1 om. १२. MHP जुह्वाञ्च°. १३. MHP °रुज्वलज्वाल. १४. AO VI.75:192.2 om. १५. MHP श्रद्ध. १६. MHP सौ. १७. MHP परिस्रावी; thus AO VI.75:192. 4. १८. MHP येऽस्यै°. १९-१९. H om. २०. MHP abr. as यज्ञो=वसतीति, cf TS VI.4.2.1.

इति; स या उ हैवैता औषसं निग्राभ्या आह्रियन्त एता हैवैता वसतीवरयः॥ ५॥ **'यमग्ने पृत्सु मर्त्यम्'** इत्याहवनीये सꣳस्त्रावं जुहोति। °**आवो[1] वाजेषु[2](यं जुनाः। सं यन्ता शश्वती)रिषः स्वाहा'** इति; **'यमग्ने पृत्सु मर्त्यम्'** इत्ययꣳ हैवैष स लोकः; **'आवो वाजेषु यं जुनाः'** इत्यन्तरिक्षलोको हैवैषः; **'स यन्ता शश्वतीरिषः'** इति दिविलोको[3] हैवैषः; **'यमग्ने पृत्सु मर्त्यम्'** इत्यग्निष्टोमो हैवैषः; **'आवो वाजेषु यं जुनाः'** इत्युक्थ्यो हैवैषः; **'स यन्ता शश्वतीरिषः'** इत्यतिरात्रो हैवैषः; **'यमग्ने पृत्सु मर्त्यम्'** इत्यृचो हैवैताः; [**'आवो वाजेषु यं जुनाः'** इति सा][4]मान्युवेवैतानि; **'स यन्ता शश्वतीरिषः'** इति यजूꣳष्युवेवैतानि॥ ६॥ अन्नं वा इषोऽन्नं यजूꣳषि, तस्माद् यजुर्वेदो वेदानामन्नादतमः; यस्मादेवमेतद् यजुरन्त्यं करोत्यत्रो ह सꣳस्त्राव एवेदꣳ सर्वं भवति यदिदं किञ्चैतैरादेशैः॥ ७॥ [५१] [इत्यष्टमोऽनुवाकः]

इदं वा अन्वाहुः- प्राणो वा एष यदुपाꣳशुर्यदुपाꣳश्व[5](ग्रा ग्रहा गृह्यन्ते प्राणमेवानु प्र यन्ति॥ १॥ अरुणो ह स्माऽऽहौपवेशिः प्रातःसवन एवाहं यज्ञꣳ सꣳस्थापयामि, तेन ततः सꣳस्थितेन चरामीति) अष्टौकृत्वोऽग्रेऽभिषुणोत्येका- दशकृत्वो द्वितीयं द्वादशकृत्वस्तृतीयम्; य एव देवाः प्रातःसवनभाजो ये माध्यन्दिनसवनभाजो ये तृतीयसवनभाजो वसवो रुद्रा आदित्या इत्यत्रो [6]हैवैनाꣳस्तर्पयति; अत्र सꣳस्थितेन हैनेन चरत्येवंवित्॥ २॥ स यो ह वा एवंविदमेतस्मिन्काले चेष्टन्तमुप[7] वा मीमाꣳसेतानु वा व्याहरेत् तं ब्रूयादेतस्यै त्वा देवताया आवृश्चामि ये देवते आरभ्यासैः; त्वमेवैतामार्तिमारिष्यसीति[8]; शश्वद्ध वै[9] तथैव स्याद् यथैनं ब्रूयात्; तस्मान्नु ह यज्ञस्याविदेव स्यान्नोपद्रष्टा॥ ३॥ **'इदं विष्णुर्वि चक्रमे'** इतीमे लोकाः; **'त्रेधा निदधे पदम्'** इति सवनान्युवेवैतानि; **'समूढमस्य पाꣳसुरे'** इति यदेवोर्ध्वꣳ सवनेभ्यः क्रियते, तदु हैवास्यैतत् समूढं पाꣳसुरे॥ ४॥ तद्वा इदमन्वाहुर्- यद्वै दिवा भवत्यपो रात्रिः[10] (प्र विशति, तस्मात् ताम्रा आपो दिवा ददृश्रे; यन्नक्तं भवत्यपोऽहः प्र विशति तस्माच्चन्द्रा आपो नक्तं ददृश्रे; छायायै चातपतश्च सन्धौ गृह्णात्यहोरात्रयोरेवास्मै) वर्णं गृह्णातीति॥ ५॥ नक्तमुपाꣳशुं[11] गृह्णीयादित्याहुः॥ ६॥ [५२]

---

१. MHP आपो. २. MHP abr. as वाजेषु=रिषः, cf. TS I.3.13.7. ३. MHP विलो° ४. MHP broken. ५. MHP abr. cf TS VI.4.5.1. ६. MHP हैव ताꣳ. ७. MHP चेष्टतमु° thus AO VI. 76.193.31. ८. MHP त्वमेवैतामरिष्य°; thus AO VI. 76.193.33. ९. MHP om. १०. MHP abr. cf TS VI. 4.2.9. ११. MHP, AO VI.77:194.7 : उपांशु.

नक्त[1](मुपाꣳशुं गृह्णीयादि)त्याहुर्, अहर्ह वा उपाꣳशुरापः सोमो राजा; यत्रैव तदाहर्भवति[2] तत एनं गृह्णाति॥ १॥ दिवाऽन्तर्यामं गृह्णीयादित्याहू[3] रात्रिर्वा अन्तर्याम आपः सोमो राजा; यत्रैव तदा रात्रिर्भवति तत एनं गृह्णाति॥ २॥ नक्तमुपाꣳशुं गृह्णात्यह्न[4] एव [5]रात्रिं निगृह्णाति[5]; दिवाऽन्तर्यामं गृह्णाति रात्रिया एवाहर्निगृह्णाति॥ ३॥ तावु ह वा एतावहोरात्रावेव भवतो यदुपाꣳश्वन्तर्यामौ; तावु ह वा एतौ प्राणापानौ भवतो यदुपाꣳश्वन्तर्यामौ; तावु ह वा एतौ सूर्याचन्द्रमसावेव भवतो यदुपाꣳश्वन्तर्यामौ; स यो ह वा एवमेनयोरेतामुपनिषदं वेद प्राणापानौ म इति शश्वद्ध[6] सर्वमायुरेत्यमृतोऽमुष्मिँल्लोके भवति जरसा विस्रसाऽस्माल्लोकात् प्रैति॥ ४॥ उपाꣳशुमेव गृह्णीयादित्याहुः; प्राणो वा उपाꣳशुः, प्राणो वा इदꣳ सर्वं यदिदं किञ्च॥ ५॥ अथो अन्तर्याममेव गृह्णीयादित्याहुः; अपानो[7] वा अन्तर्यामोऽपानेन वा अश्नात्यपानेन[8] पिबत्यपानेन[9] प्राणित्यत्रो ह्यपान एवेदꣳ सर्वं भवति यदिदं किञ्चैतैरादेशैः; तस्मान्नु हैनावुभावेव गृह्णीयात्॥ ६॥ **'विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः'** इति, **'स्वाहा त्वा सुभवः सूर्याय'** इति जुहोत्यादित्यमेव पूर्वस्योत्तरं करोत्यादित्यमुत्तरस्योत्तरम्॥ ७॥ यदा ह्येवैषाहो[10] अन्तं गच्छत्यथास्तमेति, यदो एव रात्रिया अन्तं गच्छत्यथोदेति; तस्मादादित्य एवाहोरात्रे व्याकरोति॥ ८॥ **'देवेभ्यस्त्वा मरीचिपेभ्यः'** इत्याहादित्यस्य वै रश्मयो देवा मरीचिपास्तेषां तद् भागधेयं तेभ्य एवैनौ जुहोति; तस्मान्नु हैनावुभावेव जुहुयात्॥ ९॥ [५३] [इति नवमोऽनुवाकः]

इदं वा अन्वाहुर्- वाग्वा एषा यदैन्द्रवायवः; [11](यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानु प्रयन्ति॥ १॥ वायुं देवा अब्रुवन्त्सोमꣳ राजानꣳ हनामेति; सोऽब्रवीद्वरं वृणै मदग्रा एव वो ग्रहा गृह्यान्ता इति; तस्मादैन्द्रवायवाग्रा ग्रहा गृह्यन्ते,) तमघ्नन्निति॥ २॥ स उ ह वा एष एतमेव वायुर्ग्रहं वव्रे; **'आ वायो भूष [12](शुचिपा उप नः सहस्रं ते नियुतो विश्ववार। उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्व)पेयम् उपयामगृहीतोऽसि वायवे त्वा'** इत्यवगच्छत्युपगृह्णाति॥ ३॥ **'इन्द्रवायू इमे सुताः'** इतीन्द्रमेव तद् वायोर्मध्यतो दधाति, सा ह वा एषा वायोर्मध्यतोहिता; स यो ह वा एवमेतां देवतां वायोर्मध्यतोहितां वेदैतस्यै देवतायै

---

१. MHP abr. as नक्त=त्याहु°. २. MHP तदाहुः भ° [M °हु भ°]. ३. MHP °त्याहु. ४. MHP °त्यहैव [H °है°]. ५-५. H रात्रिर्भवति तत एनं गृहाति,. ६. H शश्वच्च. ७. MHP अपावोव. ८. MHP अश्वा अपा°. ९. MHP °त्यपान्य. १०. MHP ह्येवैषाहो [H °याहो]. ११. MHP abr. as °वायवो=तमघ्नन्निति, cf TS VI. 4.7.1-2. १२. MHP abr. cf TS I.4.4.1.

सायुज्यꣳ सलोकतां जयति॥ ४॥ [यो ह][1] वा एषा वाच्येव[2] ता वाग्वायुरिन्द्रोऽसावादित्य इति; य उ वा अस्यैष नेमिः पर्यस्तो रास्ना समिव [3]पेपिचत्येतेनो ह वा एषा[4] देवताऽमृतेन[4] परिवृढे, तस्मिँल्लोके तिष्ठत्यन्तरे तस्यां देवतायामन्तरे [5][तिष्ठति]॥ ५॥ तद्वा इदमन्वाहुर्- देवा वै यज्ञाद्रुद्रमन्तरायन्; स आ[दित्यानन्वाक्रमत; ते द्विदेवत्यान् प्रापद्यन्त; तान् न प्रति प्रायच्छन्; तस्मादपि वध्यं प्रपन्नं][6] न प्रति प्रयच्छन्तीति॥ ६॥ तदाहुः- कतमे ते यैर्द्विदेवत्यान् प्रापद्यन्त इति; तानु ह वै तन्मासा एवानुप्रपेदिरे; **'उपयामगृहीतोऽसि वाक्षसदसि'** इति [7][वा]सन्तिको हैवैष ऋतुः, **'वाक्या[भ्यां त्वा क्रतुपाभ्याम्'** इति वासन्तिका उ हैवैते][8] चत्वारो मासाः; **'उपयामगृहीतोऽस्यृतसदसि'** इति ग्रैष्मो हैवैष ऋतुः, **'चक्षुष्पाभ्यां त्वा क्रतुपाभ्याम्'** इति ग्रैष्मा उ हैवैते चत्वारो मासाः; **'उपयामगृहीतोऽसि श्रुतसदसि'** इति वार्षिको हैवैष ऋतुः[9], **'श्रोत्र**[9]**[पाभ्यां त्वा क्रतुपाभ्याम्'** इति वार्षिका उ हैवैते][10] चत्वारो[11] मासाः; ते[12] वा एते द्वादश संपद्यन्ते, द्वादश मासाः संवत्सरः, संवत्सर एव प्रतितिष्ठति॥ ७॥ तदाहुः- कतमः स रुद्रः॥ ८॥ [५४]

तदाहुः- कतमः स रुद्रो य एनानन्वाक्रमत इति; तानु ह वै यदिन्द्र एवान्वाक्रमत[13], तानुवेवादित्यस्तस्मादसावादित्यः सर्वेषां [14][निग्रहयिता; तस्मा-दादित्यो द्विदेवा]त्येभ्यस्तृतीयसवने निगृह्यते[13क] उपरिष्टात् [13ख]सꣳस्त्रावाणामेव॥ १॥ **'उपयामगृहीतोऽसीन्द्रवायुभ्यां त्वा जुष्टं गृह्णाम्येष ते योनिः सजोषाभ्यां त्वा'** इति वाक् च ह वै मनश्च सजोषसौ; **'उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वा जुष्टं गृह्णाम्येष ते योनिर्ऋतायुभ्यां त्वा'** [इति चक्षुषी ह वा][15] ऋतायू; **'उपया[मगृहीतोऽ]**[16]**स्यश्विभ्यां त्वा जुष्टं** [17]**[गृह्णाम्येष ते यो]निर्माध्वीभ्यां त्वा'** इति श्रोत्रे ह वै माध्वी; इत्यधिदेवतम्[18]॥ २॥ अथाधिपुरुषम्। एकपात्रा द्विदेवत्या

१. MHP broken. २. MH स गाव्येव, P समाव्येव. ३. MHP वेविच°. ४-४. MHP °एष देवत्रम्. ५. MHP तस्यां... या after मन्तरे which seems to be repetition of तस्यां देवतायाम्, and thereafter too there is sign of broken text in Ms. ६. MHP broken, cf. TS VI.5.6.4. ७. MHP broken. ८. MHP broken. ९. MHP ऋतुभ्योन. १०. MHP broken. ११. MHP चतुरः. १२. MHP त. १३. MHP °क्रमता. १३क. MHP ह्येते. १३ख. M संस्तावा°. १४. MHP broken. १५. MHP broken. १६. MP broken; H gives the sign of abridged text as उपया=श्विभ्यां. १७. MHP broken. १८. MHP °दैवम [H °दे°]; thus AO VI. 78.194.26.

गृह्यन्ते, द्विपात्रा हूयन्त इति; यदेकपात्रा गृह्यन्ते तस्मादेकोऽन्तरतः प्राणो, द्विपात्रा हूयन्ते तस्माद् द्वौ [द्वौ][1] बहिष्ठात् प्राणाः; एकपात्रा द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति; यदेकपात्रा गृह्यन्ते तस्मादेकं पुरुषस्य [2][शि]श्नं, द्विपात्रा हूयन्ते तस्माद् द्वे समानतः स्रवतो मूत्रं च वाजिनं च॥ ३॥ [५५] [इति दशमोऽनुवाकः]

तदाहुर्- यद् गायत्रं प्रातःसवनꣳ शुक्रामन्थिभ्यां प्रणीयते त्रिष्टुग्भ्यामु ह वा एतावृग्भ्यां ग्रहौ गृह्येते, कथमेतदिति॥ १॥ इमे वै गायत्रियाविति ह ब्रूयाद्, **'आ नः शुक्रः सुवीर्यम्'** इति शुक्रं गृह्णीयात्; **'आ मन्थी गोविदश्वविद्यौ**[2क] **सरथौ सुवर्विदौ'** इत्युपमन्थव मन्थिनमिति; मन्थिनम् **उप शुक्रः सुवीर्यं यो सबन्धू सजोषसौ'** इति॥ २॥ तन्नादृत्यम्; विद्येवैषा, प्रतिवचनमेवैतत्, सम्पदो वै गायत्रं भवति; त्रिष्टुग्भ्यामु ह वा एतावृग्भ्यां ग्रहौ गृह्येते॥ ३॥ **'उन्नीयमानेभ्योऽनुब्रूहि होतुश्चसमनून्नयध्वमुभयतः शुक्रान् कुरुध्वम्'** इति॥ ४॥ तदाहुः- कथमेत उभयतः शुक्रा भवन्तीति; अग्निरेवेतः[3] शुक्र[4] आदित्योऽमुत, एवं[5] नु हैत उभयतः शुक्रा भवन्ति; [अथ यच्छुक्रादुपस्तरणाभिघारणं कुरुत, एवमु हैत उभयतः शुक्रा भवन्ति][6]॥ ५॥ तदाहुः- कथमग्निष्टोमे पथ्या ग्रहाः समवरुध्यन्त इति; **'स प्रथमः संकृतिर्विश्वकर्मा'** इति वैश्वकर्मणः, **'स प्रथमो मित्रः'** इति [7]मैत्रः, **'वरुणः'**[7] इति वारुणः, **'अग्निः'** इत्याग्नेयः, **'स प्रथमो बृहस्पतिश्चिकित्वान्'** इति बार्हस्पत्यः, **'तस्मा इन्द्राय सुतमा**[8] **जुहोमि'** इत्यध्वर्युर्जुहोति, **'तस्मै सूर्याय सुतमा जुहोमि'** इति प्रतिप्रस्थाता सौर्यम्[9]; एवं नु हाग्निष्टोमे पथ्या ग्रहाः समवरुध्यन्ते॥ ६॥ **'प्रैतु होतुश्चमसः'** इत्याह॥ ७॥ [५६]

'प्रैतु होतुश्चमसः' इत्याह, तस्मात् पराङेव वसन्त[10] एति; **'प्र ब्रह्मणः'** इति, तस्मात् पराङेव ग्रीष्म एति; **'प्रोद्गातुः'** इति; तस्मात् पराचीरेव वर्षा यन्ति; **'प्र यजमानस्य'** इति; तस्मात्पराङेव हेमन्त एति; **'प्र यन्तु सदस्यानाम्'** इति, तस्मात् पराच एव मासा यन्ति; **'ऋत्विजां**[11] **चमसाध्वर्यवः सकृत् सकृच्छुक्रस्याभ्युन्नीयोपावर्तध्वम्'** इति, तस्मादभ्यावर्ता अर्धमासा यन्ति; **'सकृत्सकृच्छुक्रस्याभ्युन्नीयोपावर्तध्वम्'**[12] इति यदाहासौ वा आदित्यः

१. MP broken, H तस्माद्वै बहि°; cf TS VI. 4.9.6. ; thus AO VI. 78 : 194.26. २. MHP om. २क. MHP दश्वनिद्ययौ. ३. MHP °रेवैत. ४. MHP शुक्रा. ५. MHP एवे. ६. MHP om. ७-७. MHP मैत्रावरुण. ८. MHP सुतमाञ्जु° [M °ज्जो°]. ९. MHP सौर्य. १०. MHP स; the first and third letters being omitted. ११. MHP ऋत्विजाश्च°. १२. MHP °भ्युनीयो°.

शुक्रस्तस्मादसावादित्यः सकृदेवाह उदेति, सकृदस्तमेति ॥ १ ॥ तावु ह वा एतावाहुती राशी एव भवतो यत्सूर्याचन्द्रमसौ; स या नु हाज्यस्याहुतयो हूयन्ते ता नु हादित्य एव हूयन्त, आदित्ये ह्येवैता आहुतयः प्रतितिष्ठन्ते; [स या नु ह सोमस्याहुतयो हूयन्ते][१] **'सोमो राजा'** इति ता नु ह चन्द्रमसि हूयन्ते, चन्द्रमसि ह्येवैता आहुतयः प्रतितिष्ठन्ति; एवं न हैवैतावाहुती राशी एव भवतो यत्सूर्याचन्द्रमसावेव; एतयोर्देवतयोः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ २ ॥ मध्येऽग्नेरन्नाहुतीराज्याहुतीः पुरोडाशाहुतीः पश्वाहुतीश्च जुहुयादन्तेषु सोमाहुतीः ॥ ३ ॥ [५७] [इत्येकादशोऽनुवाकः]

वाक् च ह वै मनश्च यज्ञं परिगृह्णानावैताम्[२]; तस्यै ह वाचो मनसा पर्याप्तायाः[३] अप्रियेण गर्भोऽस्रꣳसत; सोऽत्रिर्ऋषिरभवत्[४]; सा देवानब्रवीदिमं मे भिषज्यतेति; तमेतेन[५] हिरण्येन दक्षिणाभिरभिषज्यन्; तस्मादात्रेयाय प्रथमाय हिरण्यं दक्षिणां नयन्ति; एतस्यै हैव तद् देवतायै मत्सरमपनिनीषन्तो[६]ऽपीदमेवात्रेयाय[७] हिरण्यं दक्षिणां नयन्ति ॥ १ ॥ तद्वा इदमन्वाहुर्- देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत; ते देवा आग्रयणाग्रा[८](न् ग्रहानपश्यन् ; तानगृह्णत; ततो वै तेऽग्रं पर्यायन् ; यस्यैव विदुष आग्रयणाग्रा ग्रहा गृह्यन्तेऽग्रमेव समानानां) पर्येतीति ॥ २ ॥ तदाहुः— किमाग्रयणस्याग्रयणत्वमिति[९]; **'पर्यावर्तध्वम्'** इत्यन्वाहुर्वाग्वै देवेभ्यो[१०](ऽपाक्रामद्यज्ञायातिष्ठमाना; ते देवा वाच्यपक्रान्तायां तूष्णीं ग्रहानगृह्णत; साऽमन्यत वागन्तर्यन्ति वै मेति; साऽऽग्रयणं प्रत्यागच्छत्) तदाग्रयणस्याग्रयणत्वम् ॥ ३ ॥ तदाहुः- किमाग्रयणस्याग्रयणत्वमिति; स वै प्रातःसवने गृह्यते, तस्याग्रं रोहन्नेति, तदु हैवाग्रयणस्याग्रयणत्वम् ॥ ४ ॥ तदाहुः- किमेवाग्रयणस्याग्रयणत्वमिति; स वै माध्यन्दिने सवने गृह्यते[११], [तस्याग्रमेव[१२] रोहन्नेति, तदु हैवाग्रय]णस्याग्रयणत्वम् ॥ ५ ॥ तदाहुः- किमेवाग्रयणस्याग्रयणत्वमिति; स वै तृतीयसवने गृह्यते, तस्याग्रमेव[१३] रोहन्नेति, तदु हैवाग्रयणस्याग्रयणत्वमिति ॥ ६ ॥ तस्य वा अदस्तृतीयसवने

१. MHP broken. २. MHP °गृह्णानैतान्; thus AO. VI.79:195.9. ३. MHP पर्याप्ताय; thus AO VI.79:195.10. ४. MHP सोऽत्रीर्ऋषिरब्रवीत्; AO VI.79:195.11: ऋषिरब्रवीत्; I have emended the text on the authority of ŚB I.4.5.13 : ततोऽत्रिः सम्बभूव. ५. MHP तममृतेन, thus AO VI.75:195.11. ६. MHP °मविनिनी°. ७. M °मेव धात्रेयायै, H °मेव तद्धात्रेयायै, P °मेनर्धात्रेयायै. ८. MHP abr. as आग्रयणाग्रा=पर्येति, cf TS VI.4.11.1. ९. MHP °स्याग्रयणं. १०. MHP abr. as देवेभ्यो=तदाग्रयण°, cf TS VI.4.11.5. ११. MHP गृह्यन्ते. १२. MHP broken. १३. MHP °ग्रमेवारो°

मैत्रावरुणो हार्योजनस्यान्वाह- **'तिष्ठा सु कं[१] मघवन् मा परा गाः[१] सोमस्य नु त्वा सुषुतस्य यक्षि[२]। पितुर्न पुत्रः सिचमा रभे त इन्द्र स्वादिष्ठया गिरा शचीवः'** इति; स सर्वस्यैव यज्ञस्याग्रं रोहन्नेति तदु हाग्रयणस्याग्रयणत्वम् ॥ ७ ॥ तद्वा इदमन्वाहू रुग्णवत्यर्चा [३](भ्रातृव्यवतो गृह्णीयाद् , भ्रातृव्यस्यैव रुक्त्वाऽग्रꣳ समानानां) पर्येतीति; तस्यैतामृचं गृहस्य रोरुचं कुर्यात् **'विदद्यती सरमा [४](रुग्णमद्रेर्महि पाथः पूर्व्यं सध्रियक्कः। अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा) जानती गात्'** इति; भ्रातृव्यस्यैव रुक्त्वाऽग्रꣳ समानानां[५] पर्येति ॥ ८ ॥ तद्वा इदमन्वाहुर्- देवासुराः संयत्ता आसन् ; ते देवा एतं यज्ञवज्रं[६] पर्यपश्यन् यदाग्रयणम् ॥ ९ ॥ [५८]

देवासुराः [७](संयत्ता आसन् ; ते देवा एतं यज्ञवज्रं पर्यपश्यन् यदा)ग्रयणम्; तेनासुरानघ्नन्निति; तथो एवैतेन यज्ञवज्रेण यजमानो द्विषतो भ्रातृव्यान् हन्ति ॥ १ ॥ स यो ह वा एवंविदमेतस्मिन्काले चेष्टन्तमुप[८] वा मीमाꣳसेतानु वा व्याहरेद्धिंकृत्यैनं निर्दिशेत् **'येन देवा वज्रेणासुरानघ्नꣳस्तेन[९] त्वा हन्म्यसौ[१०] पुरा द्वात्रिꣳश्यै मरिष्यसि'** इति[११]; तथा हैव स्यात् ॥ २ ॥ स पथि [१२]वाचमुत्सृजेदिति वा इदम् ; सैनं पथि वागुत्सृष्टा सुवर्गं लोकमभिवहति ॥ ३ ॥ तदाहुर्- द्रोणकलशमभ्यावृत्य हिंकुर्याद् [१३]**'सोमं राजानम्'** इति[१३]; तदु वा आहुर्- आग्रयणमेवाभ्यावृत्य हिंकुर्यादेष ह्येव तदा सोमो राजा भवति ॥ ४ ॥ स यद्यागात्त उ हैव तदुदगावृदश्वे[१४] इव वाचमुत्सृजति, पथ्येव तद् वाचमुत्सृजति; सैनं पथि वागुत्सृष्टा सुवर्गं लोकमभिवोढुमर्हति ॥ ५ ॥ ग्रहान् ह वा एकोऽध्वर्युर्गृह्णाति, ग्रहा उ हैकमध्वर्युं गृह्णन्ति; एष नु हाध्वर्युर्ग्रहान् गृह्णाति, यो दक्षिणतो गृहीत्वाऽपरेणात्मानꣳ हृत्वोत्तरतो ध्रुवꣳ सादयति[१५]; अथ हैनमध्वर्युं ग्रहा गृह्णन्ति, यो दक्षिणतो ग्रहान् गृहीत्वा पूर्वेणात्मानꣳ हृत्वोत्तरतो ध्रुवꣳ सादयति; तस्मादेवंविदुषाऽध्वर्युणा पश्चाद्धविर्धानेन प्रपद्येद् ग्रहो ह्येवैनं गृह्णीयात्; एष एव ध्रुवस्तस्मादुत्तरत उपचारोऽध्वर्युः स्याद् दक्षिणापर्यावर्तने ॥ ६ ॥ **'ये देवा दिव्येकादश स्थ'** इति

१-१. MHP सुतं गधवन्गापरादाः cf RV III.53.2. २. MHP वक्षि. ३. MHP abr. as रुग्णवत्यर्चा= पर्येति, cf TS VI. 4.11.2. ४. MHP abr, cf TB. II.5.8.10. ५. MP समानां. ६. MHP °वज्रमपर्य°. ७. MHP abr; thus AO VI. 80 : 195.25-26. ८. MHP चेष्टकमु°. ९. MHP °सुरानन्तेन. १०. MHP हन्त्यसौ; thus conjectured AO VI. 80 : 195 fn 5. ११. MHP मरिष्यतीति; thus AO ibid. १२. MHP वापमु°. १३-१३. MHP यामं राज्ञागमिति. १४. MHP तद्यगावृदश्वे. १५. MHP सादयन्ति [M आद°]

गृह्णाति; तदाहुर्- अध्वर्यो यदेष त्रयस्त्रिꣳशते देवताभ्यो ग्रहो गृह्यतेऽथ क्वास्यैता देवताः प्राश्नन्तीति; तस्य वा अदस्तृतीयसवनेऽग्नीत्[1] पात्नीवतस्य यजति **'ऐभिरग्ने सरथं याह्यर्वाङ्[2] नानारथं[2] वा विभवो ह्यश्वाः। पत्नीवतस्त्रिꣳशतं त्रीꣳश्च देवाननुष्वधमा[3] वह मादयस्व'** इत्यत्रो हैवास्यैता देवताः प्राश्नन्ति ॥ ७ ॥ नवकृत्वो हिंकरोति; द्वयोर्द्वारयोः प्रातःसवन आग्रयणं गृह्णाति, तिसृणां माध्यन्दिने सवने, चतसृणां तृतीयसवने; ता वा एता नव, नव पूर्वाणि, तानि वा एतान्यष्टादश संपद्यन्ते ॥ ८ ॥ अष्टौकृत्वोऽग्रेऽववयत्येकादशकृत्वो द्वितीयं द्वादशकृत्व[4]स्तृतीयं, तानि वा एतान्येकत्रिꣳशत् संपद्यन्ते; अष्टादशपूर्वाणि, तानि वा एतान्यूनाःपञ्चाशत् संपद्यन्ते ॥ ९ ॥ चतुरुत्तराणि छन्दाꣳसि; तेषामु वै पुनरेव यानि नव स त्रिवृत्स्तोमो, यानि पञ्चदश स पञ्चदशो, यानि सप्तदश स सप्तदशो, यान्येकविꣳशतिः स एकविꣳशो यानि सप्तविꣳशतिः स त्रिणवो, यानि त्रयस्त्रिꣳशत् स त्रयस्त्रिꣳश; एते षडुत्तरा स्तोमाः, सप्तदशः[5] परिशिष्यन्ते, ताः सामिधेन्यः, सोऽर्धमासस्तदन्नम् ॥ १० ॥ तदाहुः- किमन्नमिति; युग्मꣳ ह वा अन्नं, छन्दाꣳसि पशव, एते त उ लोका इति; अयुजो ह वै लोकास्तोमाश्छन्दाꣳसि पशवः एषा प्रतिष्ठाऽत्रो ह वा अस्यैतदाग्रयण[मग्रे][6]रूढं भवति चतुरुत्तराणि च छन्दाꣳसि षडुत्तराश्च [स्तो]माः[7] सामिधेन्योऽर्धमासा इति; तस्मादाहुर्यश्चैवं वेद यश्चनाग्रयणो यज्ञ इत्याग्रयणो ह्येव यज्ञः ॥ ११ ॥ [५९] [इति द्वादशोऽनुवाकः]

॥ इति तृतीया दशिका समाप्ता ॥

इदं वा अन्वाहुर्- इन्द्रो वृत्रा[8](य वज्रमुद्यच्छत्; स वृत्रो वज्रादुद्यतादबिभेत्; सोऽब्रवीन्मा मे प्रहारस्ति वा इदं मयि वीर्यं प्र ते दास्यामीति; तस्मा उक्थ्यं प्रायच्छत्; तस्मै द्वितीयमुदयच्छत् ; सोऽब्रवीन्मा मे प्रहारस्ति वा इदं मयि वीर्यं तत् ते प्रदास्यामीति; तस्मा उक्थ्यमेव प्राय)च्छत्; तस्मै तृतीयमुदयच्छत्; तं विष्णुरन्वतिष्ठत [9](जहीति; सोऽब्रवीन्मा मे प्रहारस्ति वा इदं मयि वीर्यं तत् ते प्रदास्यामीति); तस्मा उक्थ्यमेव प्रायच्छत्; इन्द्रियं वा अस्मै वीर्यं बलमन्नं

१. MHP अग्नीत्वा. २-२. MHP आर्वाक् सानग्वनारथं. ३. MHP °ननुघडगा. ४. MHP कृत्वा°. ५. MHP पञ्चदश. ६. MHP broken. ७. MHP ताः. ८. MHP abr. as इन्द्रोवृत्रा...°छत् , cf TS VI. 5.1.1. ९. MHP abr. as °तिष्ठत=तस्मा cf TS VI. 5.1.1.

प्रायच्छत्; तस्माद्योऽश्नाति भूय एव तस्येन्द्रियं वीर्यं बलमन्नाद्यं भवति; अथ यो नाश्नाति कनीय एव तस्येन्द्रियं वीर्यं[1] बलमन्नाद्यं भवति ॥ १ ॥ तदधियज्ञम्; वायव्यमभवत् ॥ २ ॥ [६०]

तदधियज्ञम्; वायव्यमभवद्, एषा वै सोमस्य सꣳस्थैषा प्रतिष्ठा यद्वायव्यम्; तस्मान्नु हैतत् सर्वेषां यज्ञानां मध्यतो हितं यद्वायव्यम् ॥१ ॥ तदाहुर्-[एषा वै हविषः सꣳस्थैषा उ भूतानां][2] प्रतिष्ठा यदुदरम्; तस्मान्नु हैतत् सर्वेषां भूतानां मध्यमे हितं यदुदरम्; वृष्टिं वा अस्मै तत्प्रायच्छन्नभ्रमु[3] वै वृष्टिः; तस्मान्नु हैतत्सर्वेषामृतूनां मध्यतो हिता[4] यद् वृष्टिः ॥२ ॥ **'तस्मै त्वा विष्णवे त्वा'** इति यदाहेन्द्रायैवैनं तद् विष्णवे[5] गृह्णाति[6]; य उ वा अस्यैष नेमिः पर्य[स्तो रास्ना समिव पेपिचत्येतेन][7] ह वै[8] सोऽद्य तिष्ठते, नो श्वः; स यं ह वै विष्णुरनुतिष्ठत एवास्ति; अथ यं विष्णुर्नानुतिष्ठते नो हैषोऽस्ति ॥३ ॥ [६१] [इति प्रथमोऽनुवाकः]

यज्ञगाथाऽस्ति[9]— **'यज्ञस्य धाम परमं गुहा यन्निर्मिता महतोऽन्तरिक्षात्। [10]तस्माद्यन्ति पवमानाः पराञ्चस्तस्मादुक्थ्याः[10] पुनरभ्याकनिक्रदत्'**[11] इति; देवा उ ह वा अन्यतरामध्वरस्य [वर्तनिमुपयन्ति मनुष्या][12] अन्यतराम्; अन्यद्यन्ति[13] पवमाना[14] [अन्यदुक्थ्याः]; तस्मादुक्थ्यादर्ध[15]......निति ॥१ ॥ ते वा [एते ग्रहा][16] गृह्यन्ते देवेभ्यश्च मनुष्येभ्यश्च; स ये नु ह पवमानभाजो[17] ग्रहा गृह्यन्ते ते नु[18] ह देवेभ्यो हूयन्ते; देवेषु ह्येवैता आहुतयः प्रतितिष्ठन्ति; अथ य उक्थ्यभाजो ग्रहा गृह्यन्ते त उ ह मनुष्येभ्यो हूयन्ते; मनुष्येषु ह्येवैता[19] आहुतयः प्रतितिष्ठन्ति; एते नु[18] हैते द्वियायतना एव ग्रहा गृह्यन्ते देवेभ्यश्चैव मनुष्येभ्यश्च ॥२ ॥ पराञ्चः[20] पवमाना यन्ति ॥३ ॥ [६२]

पराञ्चः पवमाना यन्ति; तस्मात् त्रयः पराञ्च ऋतवो वसन्तो ग्रीष्मो वर्षा; [अभ्यावर्तमुक्थ्या गृह्यन्ते;] तस्मात् त्रयोऽर्वाञ्च ऋतवः शरद्धेमन्तः

१. MHP give the sign of broken text as वला...रुष...व after वीर्यं and repeat भूय एवेन्द्रियं वीर्यं. २. MHP broken; I conjecture so. ३. MHP °न्नभु [P °मु.] ४. MHP यर्हिता. ५. MHP add इति after विष्णवे. ६. MHP गृध्नाति. ७. MHP broken. cf. Supra IV.54.5. ८. MHP हैमं for ह वै. ९. MHP °गाथासि [H °धा°]. १०. MHP कस्मा° for तस्मा°; cf RV. X.181.2b. ११. MHP करिक्र°. १२. MHP broken. १३. MHP °तर्वाद्यन्ति. १४. MHP broken after पवमाना. १५. MHP broken between °दर्ध and निति. १६. MHP broken ; I conjecture so. १७. MHP °भ्राजो. १८. MHP न्नु. १९. MHP ह्येवैव. २०. MHP पराञ्चं.

[शिशिरः][१] ॥ १ ॥ पराञ्चः पवमाना यन्ति; तस्मात् पराञ्च एव मासा यन्ति; अभ्यावर्तमुक्थ्या[२] गृह्यन्ते; तस्मादभ्यावर्तमर्धमासा यन्ति ॥ २ ॥ पराञ्चः पवमाना यन्ति; तस्मात् सकृद्गता[३] एव देवा अमृताः सुवर्गं लोकम्; अभ्यावर्तमुक्थ्या गृह्यन्ते; तस्मादभ्यावर्तं प्रजाः प्रजायन्ते ॥ ३ ॥ तानि वा एतानि द्वादशाग्निष्टोमस्य स्तोत्राणि, द्वादश मासाः संवत्सरः; तान्यु वै षडेव भवन्ति, षड् वा ऋतवः संवत्सरः; ते द्वे एव भवतो, द्वे द्यावापृथिवी, द्वे अहोरात्रे, द्वे अध्वरस्य वर्तनी; देवा उ ह वा अन्यतरामध्वरस्य वर्तनिमुपजीवन्ति मनुष्या अन्यतराम् ॥ ४ ॥ अनुष्टुभा पवमानꣳ होता शꣳसति[४]; अग्निर्वै पवमानो वृष्टिरनुष्टुप् ; तस्मादिमामग्निना-भिनिवर्तान् सा[५] वृष्टिः प्रजनयन्त्यनुसमेति; यस्मादेवमेतद्यज्ञे क्रियते ॥ ५ ॥ द्वे द्वे पदे न्यस्यत्यनुष्टुभꣳ होता शꣳस[ति][६]; द्विपादु वै यजमानः; अत्रो[७] ह यजमानो ना[ना][८]श एवानयोर्लोकयोः प्रतितिष्ठति ॥ ६ ॥ **[६३]** [इति द्वितीयोऽनुवाकः]

ऋतुना प्रेष्येति[९], तदिन्द्रꣳ होता यजति, क्व तत[१०] ऋतुर्भवतीत्याहुः; ऋतुना[११] प्रेष्येति[९], तन्मरुतः[१२] पोता[१३] यजति, क्व[१४] तत[१०] ऋतुर्भवतीत्याहुः; ऋतुना[११] प्रेष्येत्याह, तत् त्वष्टारं नेष्टा यजति, क्व तत [१५](ऋतुर्भवतीत्याहुः; ऋतुना प्रेष्येत्याह), तदग्निमाग्नीध्रो यजति, क्व तत [१६](ऋतुर्भवतीत्याहुः; ऋतुना प्रेष्येत्याह), तदिन्द्रं ब्राह्मणाच्छꣳसी यजति, क्व तत [१७](ऋतुर्भवतीत्याहुः; ऋतुना प्रेष्येत्याह), तन्मित्रावरुणौ मैत्रावरुणो यजति, क्व तत ऋतुर्भवतीत्याहुः ॥ १ ॥ स यदिन्द्रꣳ होता यजति, वसन्तो ह वा ऋतूनामिन्द्रो, वसन्तमेव तदृतूनाꣳ होता यजति ॥ २ ॥ अथ यन्मरुतः पोता यजति, ग्रीष्मो ह वा ऋतूनां मरुतस्तस्माद् ग्रीष्म ओजिष्ठं तपति, ग्रीष्ममेव तदृतूनां पोता यजति ॥ ३ ॥ अथ यत् त्वष्टारं नेष्टा यजति, वर्षा ह वा ऋतूनां त्वष्टा, वर्षा हि रूपाणि विक्रियन्ते, यदाऽग्निर्वर्षति सर्वमेवेदमन्यथा रूपं भवति, वर्षा एव तदृतूनां नेष्टा यजति ॥ ४ ॥ अथ यदग्निमाग्नीध्रो यजति, शरद्ध वा ऋतूनामग्निस्तस्माच्छरदि शस्यं पच्यते[१८]; तस्माद्य एवैनं[१९] परोक्षं पचति स उवेवैनं तत्प्रत्यक्षं पचत्यग्निरेव; शरदमेव तदृतूनामाग्नीध्रो

१. MHP om; thus AO VI.81:196.17-18. २. MHP अभ्यावव्रमु°. ३. MHP सकृद्द्रुता, P °दृता; thus AO VI.81:196.21. ४. MP शंसक्ति. ५. MHP; °निवर्तीशा, thus conjectured AO VI.82:197 fn 5. ६. MHP शंस. ७. MHP त्रोः. ८. MHP om. ९. MHP प्रेष्यति. १०. MHP त. ११. MHP ऋतूनां. १२. MHP मरुतं. १३. MHP पोतो. १४. MHP त्व for क्व. १५. MH abr. as क्व ततः.... तदग्नि°. १६. MHP abr. १७. MHP abr. १८. MHP पच्यन्ते. १९. MHP एवैनः [°तः]

यजति ॥ ५ ॥ अथ यदिन्द्रं ब्राह्मणाच्छꣳसी यजति, हेमन्तो ह वा ऋतूनामिन्द्रस्तस्माद्धेमन्ते[१] सस्यं पच्यते; स यद्यन्नं[२] भवति हेमन्त एव बहु भवति; अथ यदि बहु भवति हेमन्त एव भूयिष्ठं भवति; तदश्नन्ति; सर्वाणि भूतानि पल्ययन्ते; तेन तृप्ताः सहिता इन्द्रियाविणीः प्रजाः पल्ययन्ते; तस्माद्यश्च श्रद्धत्ते यश्च न तावुभौ हेमन्ते[३]ऽग्नौ दारूण्यभ्याधत्तः; हेमन्तमेव तदृतूनां ब्राह्मणाच्छꣳसी यजति ॥६ ॥ अथ यन्मित्रावरुणौ मैत्रावरुणो यजति, शिशिरो ह वा ऋतूनां मित्रावरुणौ; तस्माच्छिशिरे प्रजाः सँविलीना वरुणगृहीताः पल्ययन्ते; तच्छिशिरमेव तदृतूनां मैत्रावरुणो यजति ॥ ७ ॥ ऋतुभिः प्रेष्येत्याह ॥८ ॥ **[६४]**

ऋतुभिः प्रेष्येत्याह तद् देवं द्रविणोदां होता यजति; ऋतुभिः प्रेष्येत्याह तद् देवं द्रविणोदां पोता यजति; ऋतुभिः प्रेष्येत्याह तद् देवं द्रविणोदां नेष्टा यजति; ऋतुभिः प्रेष्येत्याह तद् देवं द्रविणोदामच्छावाको यजति; ते वा एते चत्वारो मासा वार्षिका द्रविणोदा, एते ह द्रविणस्य दातारो, यदा हि वर्षति सर्वमेवेदं द्रविणं भवति ॥१ ॥ ऋतुना प्रेष्येत्याह तदश्विनावध्वर्युर्यजति; अहोरात्रे ह वा ऋतूनामश्विनावहोरात्रे वै तदृतूनामध्वर्युर्यजति ॥२ ॥ ऋतुना प्रेष्येत्याह तदग्निं गृहपतिं यजमानो यजति; अयꣳ ह वा ऋतूनामग्निर्गृहपतिरस्याꣳ हि सर्व ऋतवः प्रतिष्ठिता, इमामेव तदृतूनामग्निं गृहपतिं यजमानो यजति; ते वा एते द्वादश संपद्यन्ते, द्वादश मासाः संवत्सरः, संवत्सर[४] एव प्रतितिष्ठति ॥३ ॥ तद्वा इदमन्वाहुर्- नान्योऽन्यमनु प्रपद्येत[५], (यदन्योऽन्यमनु प्रपद्येतर्तुर्ऋतुमनु प्रपद्येतर्तवो मोहुकाः स्युः; प्रसिद्धमेवाध्वर्युर्दक्षिणेन प्रपद्यते प्रसिद्धं) प्रतिप्रस्थातोत्तरेणेति ॥ ४ ॥ देवा उ ह वा एतस्मिन्नुक्थ्य आजिमयन्[६]; तमग्निरुदजयत् ; तमिन्द्रोऽब्रवीज्जातवेदोऽस्तु मेऽत्रापीति; अस्तु हीति; असावेवादित्यः सर्वेषां भूतानामुत्तमस्तस्मादुपरिष्टादृतुग्रहाणामैन्द्राग्नो गृह्यते; तस्मादसावादित्यः सर्वाणि भूतान्युपरिष्टादभितपन्नेति; ऋतुषु[७] प्रतिष्ठितो यस्मादेवमेतद्यज्ञे क्रियते ॥ ५ ॥ द्वे द्वे पदे न्यस्यत्यनुष्टुभꣳ होता शꣳसति[८]; द्विपादु यजमानः; अत्रो ह यजमानो नानाश[९] एवानयोर्लोकयोः प्रतितिष्ठति ॥ ६ ॥ **[६५]** [इति तृतीयोऽनुवाकः]

१. M हेमन्त, HP हेमन्. २. MHP यद्यत्वं. ३. MHP हेमन्तो°. ४. MHP om. ५. MHP abr as प्रपद्येत=प्रतिप्रस्था°; cf TS VI. 5.3.8-9. ६. MHP °मयुन्. ७. MHP °दभितः पन्ने°. ८. MHP शंस. ९. MHP नाश.

इदं वा अन्वाहुर्- उभये वा एते प्रजापतेरध्यसृजन्त [१](देवाश्चासुराश्च; तान्न व्यजानादिमेऽन्य इमेऽन्य इति; स देवानꣳशूनकरोत्; तानभ्यषुणोत्; तान् पवित्रेणापुनात्; तान् पुरस्तात् पवित्रस्य व्यगृह्णात्; ते ग्रहा अभवꣳ)स्तद् ग्रहाणां ग्रहत्वम् ॥१॥ तावु ह वा एतावहोरात्रावेव भवतो यदुपाꣳश्वन्तर्यामौ; तावु ह वा एतौ प्राणापानावेव भवतो यदुपाꣳश्वन्तर्यामौ; तावु ह वा एतौ सूर्याचन्द्रमसावेव भवतो यदुपाꣳश्वन्तर्यामौ; [यदुपाꣳश्वन्तर्यामौ][२] गृह्णाति प्राणापानौ हैव तत् पुनर्जायेते[३] ॥२॥ अथ यदैन्द्रवायवं गृह्णातीन्द्रवायू हैव तत् पुनर्जायेते[४] ॥३॥ अथ यन्मैत्रावरुणं गृह्णाति मित्रावरुणौ हैव तत्पुनर्जायेते[३] ॥४॥ अथ यदाश्विनं गृह्णात्यश्विनौ हैव तत् पुनर्जायेते[३] ॥५॥ अथ यच्छुक्रामन्थिनौ गृह्णाति सूर्याचन्द्रमसौ हैव तत् पुनर्जायेते ॥६॥ अथ यदाग्रयणं गृह्णाति विश्वे हैव तद्देवाः पुनर्जायन्ते ॥७॥ अथ यदुक्थ्यं गृह्णातीन्द्रश्च हैव[५] तद्विष्णुश्च पुनर्जायेते ॥८॥ अथ यद् ध्रुवं गृह्णात्यसावु हैव स आदित्यः पुनर्जायते[६] ॥९॥ अथ यदृतुग्रहान् गृह्णात्यृतवो हैव तत् पुनर्जायन्ते ॥१०॥ अथ यदैन्द्राग्नं गृह्णातीन्द्राग्नी हैव तत् पुनर्जायेते ॥११॥ अथ यद् वैश्वदेवं गृह्णाति विश्वे हैव तद्देवाः पुनर्जायन्ते ॥१२॥ अथ यन्मैत्रावरुणं गृह्णाति मित्रावरुणौ हैव तत् पुनर्जायेते ॥१३॥ अथ यदैन्द्रं गृह्णातीन्द्रो हैव तत् पुनर्जायते[७] ॥१४॥ अथ यदैन्द्राग्नं गृह्णातीन्द्राग्नी हैव तत् पुनः पुनर्जायेते। इति नु प्रातःसवनम् ॥१५॥ [६६]

इति नु प्रातःसवनम्। अथ माध्यन्दिनꣳ सवनम्। यच्छुक्रामन्थिनौ गृह्णाति सूर्याचन्द्रमसौ[८] हैव तत् पुनः पुनर्जायेते ॥१॥ अथ यदाग्रयणं[९] गृह्णाति विश्वे हैव तद् देवाः[१०] पुनर्जायन्ते ॥२॥ अथ यन्मरुत्वतीयौ गृह्णा[तीन्द्रो][११] हैव तन्मरुत्वान् पुनर्जायते ॥३॥ अथ यदुक्थ्यं गृह्णातीन्द्रश्चो हैव तद्विष्णुश्च पुनः पुनर्जायेते ॥४॥ अथ यत् तृतीयं मरुत्वतीयं गृह्णातीन्द्रो हैव तन्मरुत्वान् पुनः पुनर्जायते ॥५॥ अथ यन्माहेन्द्रं गृह्णाति महेन्द्रो हैव तत् पुनर्जायते। इति नु माध्यन्दिनꣳ सवनम् ॥६॥ अथ यत् तृतीयसवनम्। स यदादित्यग्रहं गृह्णात्यादित्या हैव तत् पुनर्जायन्ते ॥७॥ अथ

१. MHP abr. as °सृजन्त= तद्ग्रहाणां, cf TB I.5.1.1.; thus AO VI. 83 : 197.29-198.3. २. MHP om; thus AO VI. 83 : 198.6. ३. MHP जायेत. ४. MHP जायेत. ५. MHP ह. ६. MHP जायेते. ७. MHP जायन्ते. ८. MHP °मसो. ९. MHP यदाश्विनं. १०. MHP देवतानां. ११. MHP om.

यदाग्रयणं गृह्णाति विश्वे हैव तद् देवाः पुनर्जायन्ते ॥८॥ अथ यत् सावित्रं गृह्णाति सविता हैव तत् पुनर्जायते ॥९॥ अथ यन्महावैश्वदेवं गृह्णाति विश्वे हैव तद् देवाः पुनः पुनर्जायन्ते ॥१०॥ अथ यत् पात्नीवतं गृह्णाति पत्नीवतो हैव तत् त्रयस्त्रिꣳशद् देवाः पुनर्जायन्ते ॥११॥ अथ यद्धारियोजनं गृह्णातीन्द्रो हैव तद्धरिवान् पुनर्जायते; इति नु तृतीयसवनम् ॥१२॥ तद्वा एतत् पुनर्जनित्रं नामान्वाख्यानम्; तद्य एवं वेदैवꣳ हैवैषु लोकेषु पुनःपुनर्जायते ॥१३॥ [६७] [इति चतुर्थोऽनुवाकः]

तदाहुर्- न वै मृत्युमानन्यमात्मनाऽमृतमर्हति[१] कर्तुं, [२]यदा ह्येव स आत्मनाऽमृतो भवत्यथ हैवान्यमात्मनोऽमृतमर्हति कर्तुम्[२] ॥१॥ तदाहुः- का देवता भूत्वर्त्विजो यज्ञमुखे यजमानं वहन्तीति; अग्निर्हैव भूत्वा होता यज्ञं वा[हति; अश्विनौ है][३]व भूत्वाऽध्वर्यू यज्ञं वहतः; [मित्रावरुणौ हैव भूत्वा][४] मैत्रावरुणो[५] यज्ञं वहति; इन्द्रो हैव भूत्वा ब्राह्मणाच्छꣳसी यज्ञं वहति; मरुतो हैव भूत्वा पोता यज्ञं वहति; ग्नावो हैव भूत्वा नेष्टा यज्ञं वहति; अग्निर्हैव भूत्वाऽग्नीध्रो [यज्ञं वहति; चन्द्रमा हैव][६] भूत्वा ब्रह्मा यज्ञं वहति; सूर्यो हैव भूत्वोद्गाता यज्ञं वहति; प्रजापतिर्हैव भूत्वा सदस्यो यज्ञं वहति; तस्मान्नु ह बहुलतमो बहुवित्तमः स्याद् यत्सदस्यः, प्रजापतिर्हि; विष्णुर्हैव भूत्वाऽच्छावाको यज्ञं वहति; [७]पर्जन्यो [हैव][८] भूत्वोन्नेता यज्ञं वहति; तस्मान्नु ह स वर्षतीव यदुन्नेता, पर्जन्यो हि ॥२॥ तदाहुर्- न वा अपक्षः[९] ॥३॥ [६८]

[तदाहुर्- न][१०] वा अपक्षः सुवर्गं लोकमभिवोढुमर्हतीति[११]; छन्दाꣳसि वै देवानां पक्षाणि[१२]; कानि[१३] छन्दाꣳसि भूत्वर्त्विजो यज्ञमुखे यजमानं वहन्तीति; [१४][अध्वर्यू है][१५]व गायत्रियौ भूत्वा यज्ञं वहतः; अनुष्टुग्घैव[१६] भूत्वा मैत्रावरुणो यज्ञं वहति; त्रिष्टुग्घैव[१७] भूत्वा ब्राह्मणाच्छꣳसी यज्ञं वहति; उष्णिहककुभौ हैव भूत्वाऽग्नीध्रो यज्ञं वहति; बृहती हैव [भूत्वा ब्रह्मा][१८] यज्ञं वहति; जगती[१९] हैव भूत्वोद्गाता यज्ञं वहति; पङ्क्तिर्हैव भूत्वा सदस्यो यज्ञं वहति; अतिच्छन्दा हैव

१. MHP °मात्मनो मृतम°. २-२. MHP om; thus AO: VI. 84 : 199.1. ३. MHP [b]roken; thus AO VI. 84 : 199.6. ४. MHP om; thus AO VI. 84 : 199.7. ५. MHP [...]रुणो. ६. MHP broken, thus AO VI. 84 : 199.10. ७. MHP ब्रह्मन्, thus AO VI. [1]99.14. ८. MHP broken. ९. MHP अवक्षः. १०. MHP broken. ११. MHP लोकमभवो[...]र्हतीति. १२. MHP पक्षिणि; thus AO VI. 85 : 200.8. १३. AO IV.85: 100.8. तानि. [१४.] MHP वहति. १५. MHP broken; thus AO VI. 85 : 200.9. १६. MHP °रष्टुश्चैव. [१७.] MHP त्रिष्टुग्वैव. १८. MHP broken; thus AO VI. 85 : 200.12-13. १९. MHP जगति.

भूत्वाऽच्छावाको यज्ञं वहति; विच्छन्दसी[१] हैव भूत्वा सुब्रह्मण्यश्चोन्नेता च[२] यज्ञं वहत:[३] ॥१॥ तदाहुर्- न वा अयुक्तः सुवर्गं लोकमभिवोढुमर्हतीति; क्वैषां योग इति; तेषां वा अदः[४] प्रातःसवने प्रवरैः सह योगः **'अग्निं युनज्मि 'प्रातर्यावाणमुषर्बुधꣳ स्वाहा'** इति; एष[५] वा[६] एषां योग इत्याहुः॥२॥ क्वैषां विमोक इति; तेषां वा अदस्तृतीयसवने पुरस्तात् समिष्टयजुषां विमोकः **'उद्ध्यागुः प्रतिकूलमिव भद्राः'** इति॥३॥ [६९] [इति पञ्चमोऽनुवाकः]

प्रातःसवने वै सोमेन राज्ञाभिषूयमाणेना पृथिव्यपूर्यत[७]; ते देवा अब्रुवन् - पृथिवी न्वा अनेनापूरि कस्मा इमं होष्याम इति; इन्द्रायेत्यब्रुवन्निन्द्रस्य वावेदं[८] जठरꣳ संभविष्यतीति; तमिन्द्रायाजुहवुः[९] **'यस्ते द्रप्सः स्कन्दति[१०] (यस्ते अꣳशुर्बाहुच्युतो धिषणयोरुपस्थात्। अध्वर्योर्वा परि यस्ते पवित्रात् स्वाहाकृतमिन्द्राय) तं जुहोमि स्वाहा'** इति; तेनेन्द्रः [११]सुहितो वीवास्रꣳसत[११]; तस्मादुतैतदिन्द्रः सुहितो[१२] वीव स्रꣳसते; तमेतयोपरिष्टादध्यजुहवुः **'ऋचा स्तोमꣳ समर्धय'** इति; प्राणो वै गायत्री, प्राणेनैवैनं तत् समर्धयन्; तस्मादेषैतासामनुचरी हूयते॥१॥ तेन वै माध्यन्दिनेऽभिषूयमाणेनान्तरिक्षमपूर्यत; ते देवा अब्रुवन्नन्तरिक्षं न्वा अनेनापूरि; कस्मा इमꣳ होष्याम इति; इन्द्रायेत्यब्रुवन्निन्द्रस्य वावेदं[१३] जठरꣳ संभविष्यतीति; तमिन्द्रायैवाजुहवुः **'यो द्रप्सो अꣳशुः पतितः पृथिव्यां [१४](परिवापात् पुरोडाशात्। धानासोमामन्थिन इन्द्र शुक्रात् स्वाहाकृतमिन्द्राय) तं जुहोमि स्वाहा'** इति; तेनेन्द्रः सुहितो वीवास्रꣳसत[१५]; तस्मादुतैतदिन्द्रः सुहितो वीव स्रꣳसते; तमेतयैवोपरिष्टादध्यजुहवुः **'ऋचा स्तोमꣳ समर्धय'** इति; प्राणो वै गायत्री, प्राणेनैवैनं तत् समर्धयन्; तस्मादेषैवैतासामनुचरी हूयते॥२॥ तेन वै तृतीयसवनेऽभिषूयमाणेन द्यौरपूर्यत; ते देवा अब्रुवन् द्यौर्न्वा अनेनापूरि; कस्मा इमꣳ होष्याम इति; इन्द्रायेत्यब्रुन्निन्द्रस्य वावेदं जठरꣳ संभविष्यतीति; तमिन्द्रायैवाजुहवुः

१. MHP विच्छन्दसि. २. MHP om; thus AO VI. 85 : 200.16. ३. MHP वहतं ४. MHP अवदः; thus AO VI.85 : 200.18. ५. MHP एषा. ६. MHP om. ७. MHP पृथिव्यः पूर्यत. ८. MHP वावेद; thus AO VI. 86a : 201.26. ९. MHP इन्द्राय जु॰. १०. MHP abr. as स्कन्दति=तं जुहोमि, cf. TS.III.1.10.3. ११-११. MHP सहितोऽविवास्रुसत [H ॰वास्तु॰]; thus AO VI. 86 a : 201.28. १२. MHP ॰हितोऽन्वीव॰. १३. MHP वावेद; thus AO. VI. 86a : 202.2. १४. MHP abr. as पृथिव्यां=तं जुहोमि, cf TS III. 1.10.4. १५. MHP विवा॰.

'यस्ते द्रप्सो मधुमाँ इन्द्रियावा[१](न्त्स्वाहाकृतः पुनरप्येति देवान्। दिवः पृथिव्याः पर्यन्तरिक्षात्स्वाहाकृतमिन्द्राय) तं जुहोमि स्वाहा' इति; तेनेन्द्रः सुहितो वीवास्रꣳसत[२]; तस्मादुतैतदिन्द्रः सुहितो वीव[३] स्रꣳसते; तमेतयैवोपरिष्टादध्यजुहवुः **'ऋचा[४] स्तोमꣳ समर्धय'** इति; प्राणो वै गायत्री प्राणेनैवैनं तत् समर्धयन्; तस्मादेषैतासामनुचरी[५] हूयते॥३॥ [७०] [इति षष्ठोऽनुवाकः]

स यत् पृथिव्यां[६] व्यप्रुष्णात्[६] तत् पृथिव्यामन्नमभवद्; अथ यदन्तरिक्षे [व्यप्रुष्णात् तदन्तरिक्षे][७]ऽन्नमभवद्; अथ यद् दिवि[८] व्यप्रुष्णात्[८] तद्दिव्यन्नमभवत्॥१॥ तद् वा इदꣳ सर्वꣳ सोमेन वृतं[९] यदिदं किञ्च; ते देवा अब्रुवन् - सर्वे न्वा अनेनेमा[१०] लोकाः[१०] पूर्णा दुर्गोपाः, कथमेनान् गोप्स्याम इति; स यत् पृथिव्यां व्यप्रुष्णात् तस्याग्निमेव गोप्तारमकुर्वन्; अथ यदन्तरिक्षे [व्यप्रुष्णात् तस्य वायुमेव गोप्तारमकुर्वन्; अथ यद् दिवि][११] व्यप्रुष्णात् तस्यादित्यमेव गोप्तारमकुर्वन्॥२॥ ता वा एता देवता उ[१२] एवं विभक्ता[१३] इमाँल्लोकान्[१३] गोपायन्ति; एतासामेव[१४] देवतानाꣳ सायुज्यꣳ सलोकतां जयति य एवं वेद॥३॥ एतद्ध स्म वै तद् विद्वानाह वाधूलो- येन केन च सहाश्नामि[१५] सोमो वाव[१६] मे राजा भक्षितो भविष्यतीति; स यो ह वा एवंविद्वान् येन केन च सहाश्नाति सोमो हैवास्य राजा भक्षितो भवति॥४॥ तद् वा एतच्चन्द्रमा एवादेशेनैतद् ब्रह्म भवति; एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति य एवं वेद॥५॥ [७१] [इति सप्तमोऽनुवाकः]

द्वे ह वा आहुती अग्निहोत्रमुदकं च यच्च किञ्चान्यत्; तिस्रो ह वा आहुतयः पौर्णमास्युदकं पुरोडाशीया आज्यम्; चतस्रो ह[१७] वा आहुतयोऽमावास्यैता एव तिस्रः सान्नाय्यमेव चतुर्थी; पञ्च ह वा आहुतयश्चातुर्मास्यान्येता एव चतस्रो निर्मन्थ्य एव पञ्चम्यमृता इति; षड्ढ[१८] वा आहुतयः पशुबन्ध एता एव पञ्च माꣳसमेव[१९] षष्ठी; सप्त ह वा आहुतयः सौम्योऽध्वर एता एव षट् सोम एव राजा

१. MHP abr. as इन्द्रियावा=तं जुहोमि, cf. TS III.1.10.5. २. MHP विवा॰. ३. MHP विव. ४. MHP अपा॰. ५. MHP ॰परि. ६-६. MHP पृथिव्यामप्यप्रु॰; thus AO VI. 86b.203.2. ७. MHP om; thus AO VI.86b:203.3. ८-८. MHP दिव्य प्रष्णा॰, ९. MHP वृत्तं; thus AO VI.86 b.203.5. १०-१०. MHP ॰नेमां लोकां. ११. MHP om; thus AO VI. 86b:203.8. १२. AO VI.86b:203.9. om; thus MHP. १३-१३. MHP विभक्तमालो॰; thus AO VI. 86b:203.10. १४. MHP om एव. १५. MHP सहाश्नाति; thus AO VI. 86b.203.12. १६. MHP वाच; thus AO **ibid.** १७. MHP om; thus AO VI. 87:203.26. १८. MHP षड्वा; thus AO VI.87:203.28. १९. MHP मासं एव; thus AO VI.87: 203.29.

सप्तमी; ता उ वै पुनरेकैव भवतीध्म एवेध्मे ह्येवैता आहुतयः प्रतितिष्ठन्ति ॥१॥ [1]ता अनित्थंविदो हूयमानाः[1] ॥२॥ [७२]

ता अनित्थंविदो हूयमाना अग्निरेव संदहति; तस्मै स्वाहेति हैना[2] जुहुयाद् यद्देवत्या हैव स्युः ॥१॥ यो[3] ह वैनमिन्द्रमेवासां[4] तद्वीरं पश्चाद् दधाति; स यथा वित्तस्य वेदस्य वीरं पश्चाद् दध्यादेवमेवामीषां तमिन्द्रमेव चिरं पश्चाद् दधाति ॥२॥ प्राचीर्वा[5] अन्या आहुतयो हूयन्ते प्रतीचीरन्याः ; दक्षिणा अन्या[6] उदीचीरन्याः[7]; स या नु ह प्राचीर्हूयन्ते[8] ता नु ह देवेभ्यो हूयन्ते, देवेषु ह्येवैता आहुतयः प्रतितिष्ठन्ति; अथ या प्रतीचीर्हूयन्ते ता उ ह मनुष्येभ्यो हूयन्ते, मनुष्येषु ह्येवैता आहुतयः प्रतितिष्ठन्ति; तस्मात् सर्व एव प्रत्यङ् प्रतिरन्ति[9] ॥३॥ या दक्षिणास्ताः पितृदेवत्या या उदीचीस्ताः सुवर्ग्याः; अनुवर्गेणैव तत् सुवर्गं लोकमिष्यति, तस्मादेवंविदुषा पुत्र इष्यः[10] ॥४॥ [७३] [इत्यष्टमोऽनुवाकः]

इदं वा अन्वाहुः- सुवर्भानुरासुरः[11] सूर्यं तमसाऽविध्यत; तस्मै देवाः [11क]प्रायश्चित्तिमैच्छन्निति ॥१॥ तस्य दाक्षिणैरेव माध्यन्दिने सवने तमः पाप्मानमपाघ्नन्; **'उदु[12] त्यं जातवेदसम्'** इत्येतयैवास्य प्रथमया तमः पाप्मानमपाघ्नन्, **'चित्रं देवानामुदगादनीकम्'** इति द्वितीयया, **'अग्ने नय सुपथा राये अस्मान्'** इति तृतीयया; तं[13] विपाप्मानं[13] कृत्वा **'दिवं गच्छ सुवः पत'** इति सुवर्गं लोकमगमयन्; तथो एवैतदेवंविदध्वर्युर्दाक्षिणैरेव माध्यन्दिने सवने यजमानस्य तमः पाप्मानमपहन्ति; **'उदु[12] त्यं [14][जातवेदसम्'** इ]त्येतयैवास्य प्रथमया तमः पाप्मानमपहन्ति, **'चित्रं देवानामुदगादनीकम्'** इति द्वितीयया, **'अग्ने नय सुपथा राये अस्मान्'** इति तृतीयया; तं विपाप्मानं कृत्वा **'दिवं गच्छ सुवः पत'** इति सुवर्गं लोकं गमयति ॥२॥ तमवभृथं प्रच्यावयति; तं साम्ना प्रस्तोतान्वेति[15]; साम वै रक्षोहा; साम्नैवास्य तदन्तरेण रक्षाꣳसि पिशाचाꣳस्तमः पाप्मानपमहन्ति ॥३॥ तमपगमयति; एतद्वै सर्वेषां भूतानामायतनं यदाप आयतनमेवैनं तद् गमयति; तमप्सु प्रवेशयति; अमृतं वा आपो अमृतेनैवैनं तममृतं[16] करोति ॥४॥ [७४] [इति नवमोऽनुवाकः]

१-१. MHP तानित्थं°; thus AO VI. 87 : 204.1. २. MHP हैनाञ्जु°. ३. MHP °र्हो. ४. MHP °मिन्द्रमेवा°. ५. MHP प्राची वा. ६. MHP om. ७. MHP give additional text स या नु ह प्राचीरन्या between उदीचीरन्वाः and स या. ८. MHP हूयमत. ९. MHP पतिरिति. १०. H इष्ट्याः, P इष्याः ११. MHP सुवर्भगानु°. ११क. AO VI.88:204.21: °श्चित्तमै. १२. MHP उदि. १३-१३. MHP तमविपा°. १४. MHP om. १५. MHP प्रस्तोस्वचैति; thus AO VI. 88 : 204.28-29. १६. MHP तमृतं.

इदं वा अन्वाहुर्- ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्या[1](द् यो यथासवनं प्रतिगरे छन्दाꣳसि संपादयेत्; तेजः प्रातःसवन आत्मन् दधीतेन्द्रियं माध्यन्दिने सवने) पशूꣳस्तृतीयसवन इति ॥१॥ **'शोꣳसावो३म्'** इति प्रातःसवने होताऽध्वर्युमभ्याह्वयते; तानि वा एतानि त्रीण्यक्षराणि; **'शोꣳसामोदैव'** इत्यध्वर्युः प्रतितिष्ठति; तानि वा एतानि पञ्चाक्षराणि; तानि वा एतान्यष्टौ संपद्यन्ते ॥२॥ **'वाचीन्द्राय'** इत्याह शस्ता होता; तानि वा एतानि पञ्चाक्षराणि; **'उक्थशाः'** इत्याहाध्वर्युः प्रतिगीर्य; तानि वा एतानि त्रीण्यक्षराणि; तानि वा एतान्यष्टौ संपद्यन्तेऽष्टाक्षरा गायत्री, गायत्रं प्रातःसवनं [2](प्रातःसवन एव प्रतिगरे छन्दाꣳसि संपादयति; अथो तेजो वै गायत्री, तेजः प्रातःसवनं,) तेज एव प्रातःसवन आत्मन् धत्ते ॥३॥ **'अध्वर्यो शोꣳसावो३म्'** इति माध्यन्दिने सवने होताऽध्वर्युमभ्याह्वयते; तानि वा एतानि षडक्षराणि; **'शोꣳसामोदैव'** इत्यध्वर्युः प्रत्युत्तिष्ठति; तानि वा एतानि पञ्चाक्षराणि; तानि वा[3] एतान्येकादश संपद्यन्ते ॥४॥ **'वाचीन्द्राय'** इत्याह शस्ता होता; तानि वा एतानि पञ्चाक्षराणि **'उक्थं वाची[न्द्राय']**[4] इत्याहाध्वर्युः प्रतिगीर्य[5]; तानि वा एतानि [षडक्षराणि; तानि वा][6] एतान्येकादश संपद्यन्ते; एकादशाक्षरा त्रिष्टुप्, त्रैष्टुभं माध्यन्दिनꣳ सवनं, [7](माध्यन्दिन एव सवने प्रतिगरे छन्दाꣳसि संपादयति; अथो इन्द्रियं वै त्रिष्टुगिन्द्रियं माध्यन्दिनꣳ सवन)मिन्द्रियमेव माध्यन्दिने सवन आत्मन् धत्ते ॥५॥ **'अध्वर्यो शोशोꣳ सावोम्** इति[तृतीयसवने][8] होताऽध्वर्युमभ्याह्वयते; तानि वा एतानि सप्ताक्षराणि; **'शोꣳसामो[दैव'** इत्यध्वर्युः प्रत्युत्तिष्ठति][9]; तानि वा एतानि पञ्चाक्षराणि; तानि वा एतानि द्वादश संपद्यन्ते ॥६॥ **'वाचीन्द्राय'** इत्याह शस्ता हो[ता][10]; तानि वा एतानि पञ्चाक्षराणि; **'उक्थं वाचि सुवः'** इत्याहाध्वर्युः प्रतिगीर्य[11]; तानि वा एतानि सप्ताक्षराणि; तानि वा एतानि द्वादश संपद्यन्ते; [द्वादशाक्षरा जगती, जागतं, तृतीयसवनं, तृतीय एव सवने प्रतिगरे छन्दाꣳसि संपादयति; अथो पशवो वै जगती पशवस्तृतीयसवनं, पशूनेव तृतीयसवन आत्मन् धत्ते ॥७॥ होता][12]ऽध्वर्युमभ्याह्वयेत **'अध्वर्यो शोꣳसावो३म्'** इति;

१. MHP abr. as अध्वर्युः स्या=पशूꣳस्तृ°, cf TS III 2.9.4; thus AO VI. 88.205.3-4. २. MHP abr. as प्रातः सवनं=तेज एव, cf TS. III. 2.9.5; thus AO VI.89:204.11-12. ३. MHP om; thus AO VI.89.205.15. ४. MHP AO VI. 89:205.17 om. ५. MHP प्रतिशीर्य [M यद्वर्°]; thus AO VI.89.205.17. ६. MHP, broken; thus AO. VI.89: 205.17-18. ७. MHP abr. cf TS III.2.9.6. ८. MHP om. ९. MHP broken. १०. MHP om. ११. MHP प्रतिशीर्य, १२. MHP broken, cf TS III.2.9.7.

अध्वर्युः प्रत्युत्तिष्ठेत्– '**शोशोंऽसा मोदैव**' इति[१]; तानि वा एतानि षड्, इतराणि [षट्][२]; तानि वा एतानि द्वादश संपद्यन्ते; द्वादशाक्षरा जगती जागतेन [पशुनेवात्मन् धत्ते ॥ ८ ॥ स][३] उ ह वा एष एवेन्द्रो यद्धोता, त्वष्टाऽध्वर्युः; स यथा गौर्वाशिता[४] पराच्यृषभायावर्तेत[५] राष्ट्री वाऽश्वायैवमेव[६] पदेपदेऽध्वर्युः[६] प्रतिगरिष्यन् पराङावर्तते[७] पुरस्ताद्धोतुः; तस्यैतद्रेतः सिञ्चति यजमानः; यदेनमभ्याह्वयते तमुक्थायैवाध्वर्युः प्रतिगरे[ण संपाद][८]यति; तं ततः स्तुतशस्त्रैर्न्यासप्रणवैर्लिहन्ति; स यथा वत्सं जातं गौर्लिह्याद्[९] राष्ट्री वा शिशुमेवमेव तद् ऋत्विजो यज्ञमुखे यजमानं स्तुतशस्त्रैर्न्यासप्रणवैर्लिहन्ति ॥९॥ स उ ह वा एष एव[१०] यजमानो यद्धोता यत् त्वष्टा यदिन्द्र इति; एतद्ध स्म वै तद् विद्वान् महाशालः स्वमाचार्यं पप्रच्छ– का नु भगवो[११] देवता[१२] त्वष्टेति; स होवाच– इन्द्रो वै सोम्य त्वष्टेति; स ह प्रव्रजन्नुवाच[१३], स वेदिष्ट मर्या त्वष्टारमिन्द्रो वै किल त्वष्टेतीन्द्रो हैव त्वष्टा ॥१०॥ [७५] [इति दशमोऽनुवाकः]

इदं वा अन्वाहुः:- पुरोहविषि देवयजने याजये[१४](द् यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गं लोकं जयेदिति; एतद् वै पुरोहविर्देवयजनं यस्य होता प्रातरनुवाकमनुब्रुवन्नग्निमप आदित्यमभि विपश्यति; उपैनमुत्तरो यज्ञो नमत्यभि सुवर्गं लोकं जयति ॥ १ ॥ आप्ते देवयजने याजयेद् भ्रातृव्यवन्तं, पन्थां वाऽधिस्पर्शयेत् कर्तं वा, यावान् नानसे) यातवै न रथायेति; यो राजन्योऽनुब्रुवीत[१५] सोऽस्यार्त्विज्यं कुर्यात्; एतद् वा आप्तं देवयजनमाप्नोत्येव भ्रातृव्यं नैनं भ्रातृव्य आप्नोति ॥ २ ॥ एकोन्नते देवयजने[१६] याजयेत् पशुकाममिति; य एकः कुलस्यानुब्रुवीत सोऽस्यार्त्विज्यं कुर्यात्; एतद् वा एकोन्नतं देवयजनं, पशुमानेव भवति ॥ ३ ॥ द्व्युन्नते[१७] देवयजने याजयेत् पशुकाममिति; यौ द्वौ कुलस्यानुब्रुवीयातां[१८] तयोः पुत्र[१९] आर्त्विज्यं कुर्यात्; एतद्वै द्व्युन्नतं[२०] देवयजनं, पशुमानेव

१. MHP °दैवैति. २. MHP om. ३. MHP broken. ४. MHP वाशितायै; thus AO VI. 89 : 205.24. ५. MHP परामृच्यृषभा° [H °च्यृभा°]; thus AO VI. 89 : 205.25. ६–६. MHP °मेवमे पदेऽध्व°. ७. MHP वर्तः;, thus AO VI. 89 : 205.26; cf TS III. 2.9.17. ८. MHP broken, ९. MHP गौर्लीहाद्. १०. MHP wrongly repeat गौर्लिहाद्राष्ट्री=... उ ह वा एष एव between एव and यजमानो. ११. M भगवां. १२. MHP देवा. १३. MHP प्रजन्नु°. १४. MHP abr. as याजये=यातवै, cf TS VI. 2.6.1-5. १५. M °ब्रवीते. १६. M °यजने: यजने. १७. M °न्नते त. १८. M °ब्रवीतायातां. १९. M पुत्रम्. २०. M द्विन्नतं.

भवति ॥४॥ त्र्युन्नते देवयजने याजयेत् सुवर्गकाममिति; ये[१] त्रयः[१] कुलस्यानुब्रुवीरंस्तेषां[२] नप्ताऽऽर्त्विज्यं कुर्यात्; एतद्वै त्र्युन्नतं देवयजनं सुवर्गमेव लोकमेति[३] ॥ ५ ॥ प्रतिष्ठिते देवयजने याजयेत् प्रतिष्ठाकाममिति; समा हैनमनूचाना[४] ऋत्विजो याजयेयुः; एतद् वै प्रतिष्ठितं देवयजनं यत् सर्वतः समं, प्रत्येव तिष्ठति ॥६॥ यत्रान्या[५] अन्याः ॥ ७ ॥ [७६]

यत्रान्या अन्या[६] ओषधयो व्यतिषक्ताः स्युस्तद् याजयेत् पशुकाममिति; बहुविद्वास्यानूचान आर्त्विज्यं कुर्यात्; यस्यान्नस्यान्नस्यैव वेदस्य विपरामृष्टं[७] स्यात् तस्यानुब्रुवीत, सोऽस्यार्त्विज्यं कुर्यात्; एतद्वै व्यतिषक्तं देवयजनं, पशुमानेव भवति ॥ १ ॥ निर्ऋतिगृहीते देवयजने याजयेद् यं कामयेत निर्ऋत्याऽस्य यज्ञं ग्राहयेयमिति; मृषावादी हास्य दुरनूचान आर्त्विज्यं कुर्यात्; एतद् वै निर्ऋतिगृहीतं देवयजनं, निर्ऋत्याऽस्य यज्ञं ग्राहयति ॥२॥ व्यावृत्ते देवयजने याजयेद् व्यावृत्काममिति; सत्यवादी हास्यापरिमितमिव[८] विद्वान् आर्त्विज्यं कुर्यात् ; एतद्वै व्यावृत्तं देवयजनं, वि पाप्मना भ्रातृव्येणावर्तते, नैनं पात्रे न तल्पे मीमांसन्ते ॥३॥ कार्ये देवयजने याजयेद् भूतिकाममिति; स यत् स्नातकापेतं कुलं स्याद् यस्तस्यानुब्रुवीत[८] सोऽस्यार्त्विज्यं कुर्यात्; एतद्वै कार्यं देवयजनं, कार्यो वै पुरुषो भवत्येव। इति न्वन्वाख्यानम् ॥४। अथेतरद्[१०]; ब्राह्मणो ह वा अर्धो देवयजनस्य, श्रद्धाऽर्धः; स यं श्रद्धोपनमेत् , स ब्राह्मणं ब्रूयादस्ति मे देवयजनं, पृथिव्यै मे सुस्थलमिच्छेति ॥५॥ पुरस्तादवनतं स्यात् पश्चात् सर्वतः समं, यत्रेमां दिशं प्राचीमुदीचीमुदपात्रो निनीतः प्रास्यन्देत तद् देवयजनस्य रूपम् ॥६॥ अथ दहनस्य वा श्मशानकरणस्य वा; पश्चादवनत[११]ं स्यात् पुरस्तात् सर्वतः समं, यत्रेमां दिशं दक्षिणां प्राचीमुदपात्रो[१२] निनीतः प्रास्यन्देत तदु दहनस्य वा श्मशानकरणस्य वा ॥ ७॥ प्रतिष्ठाकाममित्युक्तमेतत् ॥८॥ [७७] [इत्येकादशोऽनुवाकः]

॥ इति चतुर्थी दशिका समाप्ता ॥

दश ग्रहाः प्रातःसवने गृह्यन्ते, नवभिर्बहिष्पवमानेन स्तुवते, हिंकार एवैतासां दशमः; सप्तानुष्टुभ आज्यं होता शंसति; ता नव च गायत्रियः संपद्यन्ते[ऽष्टौ

१–१. M येऽत्रयः. २. MHP °नुब्रवीतंस्तेषां. ३. MHP लोकमिति. ४. MHP °नूचान. ५. MH यत्राग्न्या. ६. MHP om. ७. MHP विपारमृष्टं; thus AO VI.90a:207.25. ८. MHP ...भिप°; thus conjectured by caland, AO VI.90a:20 fn2 ब्रवीत. ९. MHP. १०. MHP अथेतर; thus AO VI. 90b : 208.18. ११. MHP पश्चादनवर्तं; thus AO VI. 90b: 208.23. १२. MHP प्रतीचीमु°; thus AO VI. 90b : 208.24.

चाक्षराणि परिशिष्यन्ते][१]; अष्टाक्षरा वै गायत्री; ता वा एतत् त्रिꣳशत् संपद्यन्ते; त्रिꣳशदक्षरा विराडन्नं विराड्[२], विराजमेव तदन्नाद्यमृत्विजो यज्ञमुखे यजमानायापिदधति[३]; अहोरात्राभ्याꣳ ह वा अर्धमासः स्तब्धोऽर्धमासेन मासो मासेनर्तुर्ऋतुना संवत्सरः संवत्सरेण सुवर्गो लोकः॥ १ ॥ आज्यमेवात ऊर्ध्वमुक्थं होता शꣳसति; पञ्चदशान्याज्यानि, पञ्चदशो माध्यन्दिनः [४]पवमानस्ताः पञ्चसप्ततिस्तेऽर्धतृतीया मासाः; सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविंशं यज्ञायज्ञियमेकविꣳशो वा इतोऽसावादित्यः; अत्र[५] हादित्यमेकविꣳशमभि संपद्यते; अहोरात्राभ्यामेव तदर्धमासमभ्यारोहत्यर्धमासेन[६] मासं[७] मासेनर्तुमृतुना[८] संवत्सरꣳ सवत्सरेण सुवर्गं[९] लोकम्; तद्वा एतदेव श्रीर्नामान्वाख्यानं; तद् य एवं वेदैवꣳ [१०]हैवेमाँल्लोकानभ्यारोहति[११] ॥२ ॥ अन्तःस्तोत्रेषु पुरोडाशाः श्रप्यन्तेऽन्तःस्तोत्रेषु पुरोडाशैः प्रचरन्ति; अहोरात्रयोरेव तदर्धमासे मास[१२] ऋतौ[१२] संवत्सरे शरद्यन्तः सस्यं पच्यते यस्मादेवमेतद्यज्ञे क्रियते॥ ३ ॥ द्वे द्वे पदे न्यस्यत्यनुष्टुभꣳ होता शंसति[१२क]; द्विपादु वै यजमानः; अत्रो ह यजमानो नानाश एवानयोर्लोकयोः प्रतितिष्ठति ॥ ४ ॥ [७८] [इति प्रथमोऽनुवाकः]

दश ग्रहाः प्रातःसवने गृह्यन्ते, पञ्च माध्यन्दिने सवन, एकस्तृतीयसवने; ते[१३] वा एते[१३] षोडश संपद्यन्ते, षोडशकलो वै यजमानः; अत्रो ह ग्रहैरेव कलशो यज्ञो यजमानमभिसंपद्यते ॥ १ ॥ स[१४] उ ह वा एष एव यजमानो यदाग्रयणः; तदाहुः- कथमस्मिन् प्राणा धीयन्त इति; स यदुपाꣳश्वन्तर्यामयोः सꣳस्रावमवनयति प्राणापानावेवास्मिꣳस्तद् दधाति; अथ यदैन्द्रवायवस्य वाचमेवास्मिꣳस्तद् दधाति; अथ यन्मैत्रावरुणस्य [१५][दक्ष]क्रतू एवास्मिꣳस्तद्[१६] दधाति; अथ यदाश्विनस्य श्रोत्रमेवास्मिꣳस्तद् दधाति; अथ यच्छुक्रामन्थिनोश्चक्षुषी एवास्मिꣳस्तद् दधाति; एवं नु ह यजमाने प्राणा धीयन्त, एवमु ह यज़मानꣳ सात्मानꣳ[१७] साङ्गꣳ सतनुꣳ

१. MHP om; thus AO VI. 91 : 209.17-18. २. MHP om; thus AO VI. 91 : 209.19. ३. MHP °दधाति; thus AO VI. 91 : 209.20. ४. MHP पवमानः twice. ५. M °त्व; HP अत्रा. ६. MHP °रोहतेत्य°; thus AO VI. 92 : 210.8. ७. MHP मासो; thus AO VI. 92 : 210.9. ८. MHP मासेनर्तुर्ऋतु°; thus AO *ibid*. ९. MH सुवर्गो; thus AO. VI. 92 : 210.10. १०. MHP °वेमां. ११. MHP रोहते; thus AO 92 : 210.11. १२-१२. MH मासृतो; P मास्यृयो, thus AO VI. 92 : 210.13. १२क. MHP AO VI.92:210.15. शंस. १३-१३. M ... वाते, H ते तै, P तेऽन्वाते. १४. MHP om; thus AO. VI. 93 : 210.23. १५. MHP om; thus AO VI. 93 : 210.27. १६. M एवास्मिंरवद्°. १७. MHP सात्मं; thus AO VI. 93 : 210.30.

सप्राणꣳ [१]सककथमेवंविदध्वर्युर्यज्ञे यजमानं जनयति ॥ २ ॥ तद्वा इदमन्वाहुर्- यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्, यदृचा तद् दृढम्; पुरस्तादुपयामा यजुषा गृह्यन्त[२] उपरिष्टादुपयामा ऋचा, यज्ञस्य धृत्या इति; स उ ह वा एष एव यजमानो यदुपयामः; स यद् **'उपयामगृहीतोऽसि'** इत्यन्ततो यजुष उपपादयति यजमानगृहीतोऽसीति ह वा एतत्; स्वयमु ह वा एवंविदध्वर्युणा याज्यमानो यजमानो ग्रहान् गृह्णाति ॥ ३ ॥ नो ह वा एवंविदं जुह्वतं तं ग्रहा आप्नुवन्ति, य[३] वैवंविद् याजयति; स उ ह वा एष एव मृत्युर्यदृगन्तमेव ग्रहः; स यदृचश्चोपरिष्टाद्[४] ग्रहं गृह्णाति यजमानमेव तं मृत्युमतिनिर्यान्तमेवास्मा एतदुपरिष्टाद् वृष्ट्योपहन्ति[५]; स यस्या उ ह वा एष देवतायै ग्रहो गृह्यते यस्या उ ह हूयत एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति य एवं वेद॥ ४॥ [७९] [इति द्वितीयोऽनुवाकः]

ब्रह्मौदनो ह वाव पिताऽग्न्याधेयं पुत्रः पूर्णाहुतिर्नप्ता[६]; अग्न्याधेयꣳ ह वाव पिता पूर्णाहुतिः पुत्रोऽग्निहोत्रं[७] नप्ता; पूर्णाहुतिर्ह[८] वाव पिताऽग्निहोत्रं[९] पुत्र इष्टिर्नप्ता; अग्निहोत्रꣳ ह वाव पितेष्टिः[१०] पुत्रः पौर्णमासी नप्ता; इष्टिर्ह वाव पिता पौर्णमासी पुत्रोऽमावस्या नप्ता; पौर्णमासी ह वाव पिताऽमावास्या पुत्रश्चातुर्मास्यानि नप्ता; अमावास्या ह वाव पिता चातुर्मास्यानि पुत्रः पशुबन्धो नप्ता; चातुर्मास्यानि ह वाव पिता पशुबन्धः पुत्रः सौम्योऽध्वरो नप्ता; पशुबन्धो ह वाव पिता सौम्योऽध्वरः पुत्र उक्थ्यो नप्ता; सौम्यो ह वावाध्वरः पितोक्थ्यः पुत्रः षोडशी नप्ता; उक्थ्यो ह वाव पिता षोडशी पुत्रोऽतिरात्रो नप्ता; षोडशी ह वाव पिताऽतिरात्रः पुत्रोऽप्तोर्यामो[११] नप्ता ॥ १ ॥ तं वा एतं यज्ञमेवं प्रजातं मृत्युरुभयतोऽप्तुं दध्रे; [१२]तमग्निष्टोम एवमेवाभिसमागमयाञ्चकार ॥ २ ॥ स उ ह वा एष एवाग्निष्टोमो यदसावादित्यस्तस्य द्यावापृथिवी व्यात्तम्; स उ ह वा एष एव मृत्युर्यदहोरात्रे; तं वा एतं यज्ञमेवं प्रजातं मृत्युरुभयतोऽप्तुं दध्रे; तमग्निष्टोम एवमेवानुदधौ ॥ ३ ॥ सर्वे ह वा अन्ये यज्ञक्रतवो मृत्यु[१३]..... गोहैनेनैकोनपविद्धस्ते देवा अग्निष्टोम एव प्रति समयतन् ॥ ४ ॥ ते वसूनेव प्रातःसवने गायत्रियामायातयन्[१४] ॥ ५ ॥ [८०]

१. MHP सकथम्; thus AO **ibid.** २. MHP गृह्यन्तं. ३. MHP om. ४. MP ऋचञ्चो°. ५. MP वृष्योपहति, H वृथो. ६. MHP °हुतिः नप्ता. ७. MHP अग्निहोत्रं twice. ८. MHP हुर्तिन. ९. MHP होत्रः. १०. MP पिता तेष्टिः, H पिता तेऽग्निः. ११. M °प्तोयंमो, P पुत्रो...र्यमो. १२. MH वमग्नि°, P वं...अग्नि°. १३. MHP broken between मृत्यु and गोहैने°; text not clear. १४. MHP °यातया.

ते [१](वसूनेव प्रातःसवने गायत्रियामायात)यन् ; रुद्रान् माध्यन्दिने सवने त्रिष्टुभ्यायातयन् ; आदित्याꣳस्तृतीयसवने जगत्यामायातयन्॥ १॥ स उ ह वा एतमेव यद्रुद्रो [२][माध्यन्दिने सवने नि]ष्केवलमसदिति[३]; तस्मान्नु ह माध्यन्दिनꣳ सवनं निष्केवलमिन्द्रस्यैव; तस्माद् यो व्यद्यसेनाः प्रणेष्यति मध्यतस्तस्यावसानम्॥ २॥ ते देवा इन्द्रमब्रुवन्नप्येव वयमेतस्य माध्यन्दिनस्य सवनस्य प्राश्नीमेति; त एतामैन्द्रीं विराजं त्रयस्त्रिꣳश[द्][४]क्षरामनु त्रयस्त्रिꣳशद् देवा प्राश्नन्; एवं नु माध्यन्दिनꣳ सवनꣳ सर्वदेवत्यं भवति; अत्रो हैवास्यैता देवताः प्राश्नन्ति॥ ३॥ तदाहुः- कतमा सा गायत्री यस्यां वसवः प्रातःसवने यतन्त[५] इति[५]; गायत्री ह वै साक्षरमिति, त्रीण्यक्षराणि, [६][ते तिस्रोऽष्टकाया भवन्ति; तानि वा एतानि चतुर्विꣳशति संपद्य]न्ते; चतुर्विꣳत्यक्षरा गायत्री; एषा ह वै सा गायत्री यस्यां वसवः प्रातःसवने यतन्ते[७]॥ ४॥ तदाहुः- कतमा सा त्रिष्टुग् यस्यां रुद्रा माध्यन्दिने सवने यतन्त[८] इति[८]; त्रिष्टुग्घ वै साक्षरमिति, त्रीण्यक्षराणि, ते पञ्च चाष्टकाया भवन्ति चत्वारि चाक्षराणि; तानि वा एतानि चतुश्चत्वारिꣳशत् [९][संपद्यन्ते, चतुश्चत्वारिꣳ]शदक्षरा त्रिष्टुक्; एषा ह वै साक्षरमिति त्रिष्टुग् यस्यां रुद्रा माध्यन्दिने सवने यतन्ते[१०]॥ ५॥ तदाहुः- कतमा सा जगती यस्यामादित्यास्तृतीय[११]सवने यतन्त इति; जगती ह वै साक्षरमिति त्रीण्यक्षराणि, ते षडष्टकाया भवन्ति; तानि ह वा एतान्यष्टाचत्वारिꣳशत् संपद्यन्ते; अष्टाचत्वारिꣳशद[क्षरा जगती, ए]षा[१२] ह वै सा जगती यस्यामादित्यास्तृतीयसवने[१३] यतन्ते॥ ६॥ तदाहुः- कथं गायत्रः सौम्योऽध्वरो भवति, कथं गायत्रीमभिसंपद्यत इति; वसव इति त्रीण्यक्षराणि, रुद्रा इति द्वे, आदित्या इति त्रीणि; तानि वा एतान्यष्टौ संपद्यन्तेऽष्टाक्षरो[१४] गायत्रः सौम्योऽध्वरो भवत्येवमु ह गायत्रीमभि संपद्यते॥ ७॥ [८१] [इति तृतीयोऽनुवाकः]

इदं वा अन्वाहुः- प्रजापतिरकामयत प्रजायेयेति; स तपोऽतप्यत; तस्मात् तेपानात् स्तोकः[१५] प्राश्चोतत्; तं[१६] प्राञ्चमौहत्[१६]; सा प्राची दिगभवत्; तस्यां वीरमदधादा[१७]दित्यं; सोऽस्मिन् वरमैच्छत[१८]; तस्मा अददात्; सोऽब्रवीदहम-

१. MHP abr. as ते=यद्. १क. MHP त्रिष्टुग्भ्यामाया° २. MHP broken. ३. MH[P] ष्टेवलसस° [H लमस°] P निष्ठेवल°. ४. MHP broken. ५-५. MHP यतन्तेऽत्र. ६. MH[P] broken. ७. MHP यन्. ८. MHP यततेति. ९. MHP broken. १०. MP यतते, H यतसे. १[१.] MHP °मादित्यस्तृ°. १२. MHP broken. १३. MHP °दित्यस्तृ°. १४. MHP °क्षरा. १५. MH[P] स्तोकं प्रश्चो°; thus AO VI.94a : 211.9. १६-१६. MHP तत्प्राञ्चमह्वत्; thus AO V[I.] 94a.211.9. १७. MHP °दधादित्यं; thus AO VI.94a:211.10. १८. MH मरमै°, P नर[मै°;] thus AO **ibid.**

ग्निहोत्रं [१]नयान्यहमग्निहोत्रस्याधिपतिरसानीति; तस्मादस्तमित आदित्ये सायं जुह्वति पुरोदेतोः[२] प्रातः; एषा हि देवताऽग्निहोत्रं नयत्येषाऽस्याधिपतिः॥ १॥ सोऽस्मिन् प्रतिवरमैच्छत; तस्मा अददात्; सोऽब्रवीद् यो मे प्रजायामृध्यातै तव स सायुज्यꣳ सलोकतां जयादिति; स य एवंविद्वानग्निहोत्रं जुहोत्येतस्यै देवतायै सायुज्यꣳ सलोकतां जयति॥ २॥ स द्वितीयमतप्यत; तस्मात् तेपानात् स्तोकः[३] प्राश्चोतत्; तं दक्षिणौहत् ; सा दक्षिणा दिगभवत्; तस्यां वीरमदधादग्निम्; सोऽस्मिन् वरमैच्छत; तस्मा अददात्[४]; सोऽब्रवीदहमुभयेषां देवमनुष्याणामन्नादोऽसानि, मय्येतज्जुहवन् यदन्नमिति; तस्माद् यद् देवेभ्यो जुह्वति यन्मनुष्येभ्यस्तदुभयम[ग्नावेव हूयते; एष ह्युभयेषां देवमनुष्याणामन्नादो][५]ऽग्निरेव [६]भगवाꣳस्तस्माद् यो दक्षिणेनेयादन्नाद्यस्य कामस्य शश्वद्धान्नाद एव स्यात्॥ ३॥ सोऽस्मिन् प्रतिवरमैच्छत; तस्मा अददात्; सोऽब्रवीद् यो मे प्रजायामृध्यातै तव स सायुज्यꣳ सलोकतां जयादिति; [स य एवं विद्वानग्निहोत्रं जुहोत्येतस्यै देवतायै सायुज्यꣳ सलोकतां जयति][७]॥ ४॥ स तृतीयमतप्यत; तस्मात् तेपानात् स्तोकः[३] प्राश्चोतत्; तं[८] प्रत्यञ्चमौहत्[८]; सा प्रतीची दिगभवत् तस्यां वीरमदधाच्चन्द्रमसं; सोऽस्मिन् वरमैच्छत; तस्मा अददात्; सोऽब्रवीदहं यज्ञं नयान्यहं यज्ञस्याधिपतिरसानीति; तस्मात् पृच्छन्ति केनाद्य नक्षत्रेण केनेति, येन केन च यज्ञेन यजतेऽपि दर्विहोमेणैषा हि देवता यज्ञं नयत्येषाऽस्याधिपतिः॥ ५॥ सोऽस्मिन् प्रतिवरमैच्छत; तस्मा अददात्; सोऽब्रवीद् , यो मे प्रजायामृध्यातै तव स सायुज्यꣳ सलोकतां जयादिति; स य एवं विद्वान् येन केन च यज्ञेन यजतेऽपि दर्विहोमेणैतस्यै देवतायै सायुज्यꣳ सलोकतां जयति॥ ६॥ स चतुर्थमतप्यत॥ ७॥ [८२]

स चतुर्थमतप्यत; तस्मात् तेपानात् स्तोकः[३] प्राश्चोतत्; तमुदञ्चमौहत्[९]; सोदीची दिगभवत्; तस्यां वीरभदधात् सोमꣳ राजानम्; सोऽस्मिन् वरमैच्छत; तस्मा अददात्; सोऽब्रवीदहꣳ सर्वेषां भूतानां यशस्तमो[१०] यशस्वितमो[११]ऽसानि मयि[१२] यशो[१२] निहितमसदिति; तस्मात् सोम एव राजा सर्वेषां भूतानां यशस्तमो[१०]

१. MHP नयन्य°. २. MHP पुरोदेतीति; thus AO VI. 94a : 211.13. ३. MHP स्तोकं प्रश्चो. ४. MHP अदात्; thus AO. VI. 94b : 211. 20. ५. MHP om; thus AO VI. 94b : 211. 23. ६. AO VI. 94b : 211.24. भवति. ७. MHP om. ८-८. MHP तत्प्रत्यञ्चमह्वत्. ९. MHP °ञ्चमह्वत् ; thus AO VI. 94d : 212.11. १०. MHP यशर्ततमो. ११. MHP यशस्वीतमो. १२-१२. MHP मय्यशो; thus AO VI. 94 d : 212.13.

यशस्वितमस्तस्मिन्[१] हि यशो हितम् ; स यो ह वा अप्यन्य[२] एतस्यै दिशं[३] यायात् स एवान्यस्माद् यशस्तमो यशस्वितम, एषा हि यशसो दिक्[४]॥ १॥ सोऽस्मिन्[५] प्रतिवरमैच्छत्; तस्मा अददात्; सोऽब्रवीद् यो मे प्रजायामृध्यातै तव स सायुज्यꣳ सलोकतां जयादिति; स य एवंविद्वान् सोमेन यजत एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति॥ २॥ स पञ्चममतप्यत; तस्मात् तेपानात् स्तोकः[६] प्राश्चोतत्; तमूर्ध्वमौहत्[७]; सोर्ध्वा दिगभवत्; तस्यां वीरमदधाद् वायुम् ; सोऽस्मिन् वरमैच्छत; त[८][स्मा अददात्; सोऽ]ब्रवीच्चनस्येव [९]मां दधसे[९] इति; तं चनस्यधत्त; स वा एष वायुः प्राणः सर्वेषां भूतानां चनोहितः[१०]; स यो ह वा एवमेतं वायुं प्राणं सर्वेषां भूतानां चनोहितं[११] वेद श[१२][श्वद्ध सर्वमायुरेत्यमृतोऽमुष्मिन् लोके भवति, जरा]सा[१३] विस्रसास्माल्लोकात्[१३] प्रैति। तदेषाभ्यनूक्ता— **'अभि प्रियाणि पवते चनोहितो नामानि[१४] यह्वो अधि येषु वर्धते। आ सूर्यस्य[१५] बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः'** इति॥ ३॥ [८३] [इति चतुर्थोऽनुवाकः]

इदं वा अन्वाहुर्- आयुर्वा एतद् यज्ञस्य [१६](यद ध्रुव, उत्तमो ग्रहाणां गृह्यते तस्मादायुः) प्राणानामुत्तममिति॥ १॥ स उ ह वा एष एव ग्रहाणाꣳ स्विष्टकृद् यद् ध्रुवः; एष ग्रहाणाꣳ स्विष्टकृदित्याहुः॥ २॥ कतम एव सोमानाꣳ स्विष्टकृदिति; **'सोमस्याग्ने वीहि'** इति यदनुवषट्करोत्येष उ ह वै सोमानाꣳ स्विष्टकृत्॥ ३॥ स उ ह वा एष एव ध्रुवस्तस्मिन्नह मृत्युर्यजमानं पर्यास्ते[१७]; तदाहुर्[१८]- अध्वर्यो यदेतस्मिन् ग्रहे मृत्युर्यजमानं पर्यास्ते[१८] कथमेनमेतस्मान्मृत्योः[१९] परित्रास्यसीति; स एतस्मिन् काले दशहोतारं व्याचक्षीत; अमृतं वै दशहोतारः; स एतेनामृतेनैवंविदध्वर्युरेतस्मान्मृत्योर्यजमानं परित्रायते; तस्मादेतस्मिन् काले दशहोता व्याख्येयः॥ ४॥ तस्य वा एतस्याग्निष्टोमस्य सꣳस्तुतस्य नवतिशतꣳ स्तोत्रीयास्ते नवैकविꣳशाः[२०] संपद्यन्ते; एका च स्तोत्रीयाऽतिरिच्यते; यैका स्तोत्रीयाऽतिरिच्यते

१. HP तस्मिन्नह्नि, M °स्मिन् अह्नि; thus AO VI. 94d : 212. 15. २. AO ibid आयन्य. ३. M विशं. ४. MP दिके, H दि. ५. MHP सास्मिन्, ६. MHP स्तोकं. ७. MHP °ध्वमह्वत्, ८. MHP om; thus AO VI. 94e : 212.23. ९-९. MHP त्वां दधा; thus suggested AO VI. 94e : 212 fn 3. १०. MHP चनिहितः. ११. MHP चननिहितं. १२. MHP broken; thus AO VI. 94e : 212. 26-27. १३. MHP सोमविस्र °ल्लोकाः. १४. MHP नमनि. १५. MHP पूर्यस्य. १६. MHP abr. as यज्ञस्य=प्राणानाम्; cf. TS VI. 5.2.1.; thus AO VI. 95 : 213.15. १७. MHP पर्याप्ते. १८-१८. MHP repeated. १९. MHP कथमेतस्मा°; thus AO VI. 213.22. २०. MHP नववैक°.

पत्न्येव सा यजमानस्य॥ ५॥ षष्टिः प्रथमो रात्रिपर्याय एवं द्वितीय एवं तृतीयस्ते वा एते नवैकविꣳशा भूत्वा॥ ६॥ [८४]

ते वा [१](एते नवैकविꣳशा) भूत्वैतस्मिन् सुवर्गे लोके बहिष्पवमाने प्रतितिष्ठन्त्यग्निश्च पृथिवी च यच्च पृथिव्यां तानि त्रीणि, वायुश्चान्तरिक्षं च यच्चान्तरिक्षे तानि त्रीणि, आदित्यश्च द्यौश्च यच्च दिवि तानि त्रीणि; ते वा एते नवैकविꣳशा भूत्वैतꣳ सुवर्गं लोकमादित्यमेकविꣳशमपियन्ति॥ १॥ एनमेते[२]ऽपियन्तीत्याहुः; कथमेनꣳ षडुत्तरा स्तोमा अपियन्तीति; त्रिवृच्च त्रयस्त्रिꣳशच्च तानि द्वाचत्वारिꣳशत्, तौ द्वावेकविꣳशौ भूत्वैतꣳ सुवर्गं लोकमादित्यमेकविꣳश[मपीतः; पञ्चदशश्च][३] त्रिणवश्च तानि द्वाचत्वारिꣳशत्, तौ द्वावेकविꣳशौ भूत्वैतꣳ सुवर्गाद् द्विरप्येतीति॥ २॥ एकविꣳशान्युक्थानि स्वयꣳसंपन्नानि; तानि नु हैनदेवमपियन्ति; एकविꣳशः षोडशी स्वयꣳसंपन्नः, स उ हैनमेवाप्येति; पञ्चदशी रात्रिस्त्रिवृद्राथन्तरः सन्धिः॥ ३॥ स यः [४]षोडशीमेव-मेवापीत एकविꣳश इत्याहुः ; कथमेनमुक्थानि कथं षोडशी कथमेका[५] स्तोत्रीयाऽतिरिच्यते; पत्न्येव सा यजमानस्य॥ ४॥ षष्टिः प्रथमो रात्रिपर्याय, एवं द्वितीय, एवं तृतीयः; ते वा एते नवैकविꣳशा भूत्वैतꣳ सुवर्गं लोकमादित्यमेकविꣳशमपियन्ति; एकं[६] वैतहव्यं प्रथमं रात्रिसाम[७] भवति; तदेका स्तोत्रीयाऽतिरिच्यते॥ ५॥ विꣳशीमेकविꣳशानाꣳ संपदमप्येतीति [दश हस्त्या अङ्गुलयो दश पद्या आत्मैकविꣳशः; एवं नु ह यजमान एकविꣳशो भूत्वैतामेकविꣳशीमेकविꣳशानाꣳ संपदमप्येति][८]; एकविꣳशो हैव [९]भूत्वैनमेतेऽपियन्तीत्याहुः; [१०]एवं नु ह[१०] यजमान एकविꣳशो भूत्वैतामेकविꣳशी-मेकविꣳशानां संपदं वेद॥ ६॥ [८५] [इति पञ्चमोऽनुवाकः]

व्रीहिर्ह वाव विचक्षणः; स[११] यद् व्रीहीणां पुरोडाशीया भवन्ति[१२] यत् कृत्स्नं यत् पक्वं विचक्षणो हैवास्य तेन तत्राꣳशुरभिषुतो[१३] भवति॥ १॥ यवो ह वाव हरिः; स यद्[१४] यज्ञे यवानां धाना भवन्ति यत् सक्तवो यन्मन्थो हरिर्हैवास्य तेन

१. MHP abr. २. MP °न्त्येन्नमे°, H न्त्येऽन्नमे°. ३. MHP om. ४. षोडमे°. ५. MH रयका, P रथका. ६. MHP °शं. ७. MHP °समा. ८. MHP om; cf infra V.6.4. ९. MHP भूतेनमेते [H °मेऽते°]. १०-१०. MHP कथं. ११. MHP om. १२. AO VI. 96 : 214.15 om; thus MHP. १३. MHP °भिष्टुतो; thus AO VI.96:214.16. १४. MHP Text has been displaced here after यद्. The scribe has pointed out as "17 कोष्ठस्थले ग्रन्थाप्रमा (पा) तः सप्तमपङ्क्तौ अवलोकयितव्यः" The text which has wrongly come in between यद् and यवानां, viz, 'त्वतामेकविंशीमेकविंशानां' सम्पदमप्येतीति belongs to IV. 85.6.

तत्राꣳशुरभिषुतो[१] भवति ॥ २ ॥ गावो ह वाव व्याप्तिः; स यद् गवां ददाति गव्यः पशुर्व्याप्तिर्हैवास्य तेन तत्राꣳशुरभिषुतो[१] भवति ॥ ३ ॥ अजावयो[२] ह वाव समाप्तिः; स यदजावीनां[३] दशापवित्रे भवतोऽजावयः पशुः, समाप्तिर्हैवास्य तेन तत्राꣳशुरभिषुतो[१] भवति ॥ ४ ॥ क्षीरसर्पिर्ह वाव पशुः; स यत्क्षीरसर्पिर्ददाति शुक्रो हैवास्य तेन तत्राꣳशुरभिषुतो[१] भवति ॥ ५ ॥ अन्नꣳ ह वाव पृश्निः; स यदन्नं ददाति पृश्निर्हैवास्य तेन तत्राꣳशुरभिषुतो[१] भवति ॥ ६ ॥ माꣳसꣳ ह वाव बभ्रुः; स यन्माꣳसं ददाति बभ्रुर्हैवास्य तेन तत्राꣳशुरभिंषुतो[१] भवति[४] ॥ ७ ॥ सोमो ह वाव वृषा; स यत्सोमेन यजते वृषा हैवास्य तेन तत्राꣳशुरभिंषुतो[१] भवति ॥ ८ ॥ हिरण्यꣳ ह वाव यशः पुरुषो हस्ती; स यद्धिरण्यशल्का भवन्ति, पुरुषꣳ हस्तिनं ददाति, यशो हैवास्य तेन तत्राꣳशुरभिषुतो[१] भवति ॥ ९ ॥ ब्राह्मणो ह वावा[नाधृष्यः; स यद् ब्राह्मणं देवयजनं याचते ददा][५]त्यस्मा, अनाधृष्यो हैव तेन तत्राꣳशुरभिषुतो[१] भवति ॥ १० ॥ राजन्यो ह वाव भीमः; स [६][य]द्राजानं देवयजनं याचते ददात्यस्मै, भीमो हैवास्य तेन तत्राꣳशुरभिषुतो[१] भवति ॥ ११ ॥ यज्ञो ह वाव विश्वरूपः; स यद् येन केन[७] [चैव यज्ञेन यजतेऽपि दर्वीहोमेण, विश्वरूपो हैवास्य][८] तेन तत्राꣳशुरभिषुतो[१] भवति ॥ १२ ॥ देवा उ ह वा अमृताः; स यन्निर्मन्थ्येन चरत्यमृतो हैवास्य तेन तत्राꣳशुरभिषुतो[१] भवति ॥ १३ ॥ ते वा एते त्रयोदशाꣳशवः क्रतवो नाम ॥ १४ ॥ तदाहुः- कथमस्यैते[९] यज्ञे सर्व एवाꣳशवः समवरुध्यन्त इति; स यद् यज्ञे [१०][व्रीहीणां पुरोडाशी]या[११] भवन्ति यत् कृत्स्नं यत्पक्वं, विचक्षणो हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ १५ ॥ अथ स यद् यज्ञे यवानां धाना भवन्ति यत्सक्तवो यन्मन्थो, हरिर्हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ १६ ॥ अथ [१२][स यद् यज्ञे गवां ददाति गव्यः पशुर्व्याप्तिर्हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ १७ ॥ अथ स यद् यज्ञेऽ]जावीनां दशापवित्रे भवत अजावयः[१३] पशुः, समाप्तिर्हैवास्य तेन

१. MHP °भिष्टुतो; thus AO. **ibid.** २. MHP the text 'यवानां [MHP द्यावानां] धाना=भवति' under above (No.2), has wrongly been given after अजावय [MHP आजगः]. ३. °जापीना°. ४. MHP give the sign of broken text between भवति and सोमो. ५. MHP broken, thus AO VI. 96:214.31-215.1. ६. MHP om. ७. MHP तेन. ८. MHP broken; thus AO VI.96.215.5. ९. MHP कतमस्यैते; AO VI.96:215.8-9 कथमास्यैते. १०. MHP broken. cf. above 86.1. ११. M gives the sign of abridged text (=) between य and भवन्ति. १२. MHP om; cf above 86.3. १३. MHP आजगवः

तत्राꣳशुरवरुद्धो भवति ॥ १८ ॥ [१][अथ स यद् यज्ञे क्षीरसर्पिर्ददाति, शुक्रो हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ १९ ॥ अथ स यद् यज्ञेऽन्नं ददाति, पृश्निर्हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ २० ॥] अथ स[२] यद् यज्ञे माꣳसं ददाति, बभ्रुर्हैवास्य[३] तेन तत्राꣳशुरवरुद्धो भवति ॥ २१ ॥ [४][अथ स यद् यज्ञे सोमेन यजते, वृषा हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ २२ ॥ अथ यद् यज्ञे हिरण्यशल्का भवन्ति, पुरुषꣳ हस्तिनं ददाति, यशो हैवास्य तेन तत्राꣳशुरवरुद्धो भवति] ॥ २३ ॥ अथ यद् ब्राह्मणं [देवयजनं][५] याचते ददात्यस्मा, अनाधृष्यो हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ २४ ॥ अथ यद्राजानं देवयजनं याचते ददात्यस्मै, [भीमो][६] हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ २५ ॥ अथ यद् येन केन चैव यज्ञेन यजतेऽपि दर्विहोमेण, विश्वरूपो हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ २६ ॥ अथ यद् यज्ञे निर्मन्थ्येन चरत्यमृतो हैवास्य तेन तत्राꣳशुरवरुद्धो भवति ॥ २७ ॥ एवं नु हास्यैते यज्ञे सर्व एवाꣳशवः समवरुध्यन्ते ॥ २८ ॥ तद्वा एतच्चन्द्रमा एवादेशेनैव ब्रह्म भवति; एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ २९ ॥ सा ह वा एषा देवतैवं वरं वव्रे सर्वैर्भूतैः पञ्चदशीꣳ रात्रिमाप्यायेयेति[७]; तन्नु हैतदेके [८][पञ्च]दशीति वदन्तः प्रत्युत्पतन्ति; तैर्ह्येषा देवताऽऽप्यायते; अन्यूनो[९] हैवास्मा एषा देवताऽऽप्यायते य एवं वेद ॥ ३० ॥ [८६] [इति षष्ठोऽनुवाकः]

पूर्णाहुतिर्ह वा अनुष्टुब् दीक्षणीयस्य; सैषा[१०] द्वात्रिꣳशिन्यनुष्टुप्[११], सैषा स्त्री; अग्नीषोमीयस्य पशोः प्रयाजानूयाजा उपयज, एषा त्रयस्त्रिꣳशिन्यनुष्टुप्[१२], स एष पुमाꣳस्तदेतन्मिथुनम् ॥ १ ॥ यया [१३]वसतीवरीर्गृह्णाति सैषा द्वात्रिꣳशिन्यनुष्टुप्, सैषा स्त्री; सवनीयस्य पशोः प्रयाजानूयाजा [उपयज][१४] एषा त्रयस्त्रिꣳशिन्यनुष्टुप्, स एष पुमाꣳस्तदेतन्मिथुनम् ॥ २ ॥ अष्टौकृत्वः[१५] पवयत्येकादशकृत्वो द्वितीयं, द्वादश-कृत्वस्तृतीयं, यैवाग्रयणं प्रति वागग्र आगच्छत् सैतासां[१६] द्वात्रिꣳशिन्यनुष्टुप्, सैषा स्त्री; अनूबन्धस्य पशोः प्रयाजानूयाजा उपयज, एषा त्रयास्त्रिꣳशिन्यनुष्टुप्[१७], स एष

१. MHP om, cf above 86.5-6. २. MHP om. ३. MHP पृश्निर्हैं°; cf above 86.7. ४. MHP om, cf above 86.8-9. *Vyā* adds. तदग्निना शुचिनैवं नु ह सोमः श्रृतो भवति between भवन्ति and पुरुषं. ५. MHP om; cf above 86.10. ६. MHP om, cf above 86.11. ७. MHP °प्ययेति; thus Ao VI.96:215.13. ८. MHP om, ९. MHP °ऽन्येनो;, thus conjectured AO VI. 96:215 fn 1. १०. MHP स्यैषा. ११. MHP °त्रिंशन्य°. १२. MHP °त्रिंशन्य°. १३. MHP वसतिव°. १४. MHP om; thus AO VI.97a:215.31. १५. MHP कृत्वा. १६. MHP add द्वात्रिंशी सैषा between सैतासां and द्वात्रि°. Caland thinks it superfluous, so he does not include in the text. १७. MHP add सैषाऽस्ति वागग्रेगा अग्र एत्वित्येषा त्रयस्त्रिंशिन्यनुष्टुप् between त्रयस्त्रिꣳशिन्यनुष्टुप् and स एष which is merely repetition.

पुमाꣳस्तदेतन्मिथुनम्; ता वा एताः षडनुष्टुभो यज्ञे भवन्ति; ता इदꣳ सर्वं प्रजनयन्तीश्चरन्ति[१] यदिदं किञ्च ॥ ३ ॥ तदाहुः- कतमा उत्तराः षडनुष्टुभ इति; '**प्र वो देवायाग्नये**' इति प्रातःसवनेऽनुष्टुभं होता प्रतिपद्यते; सैषा द्वात्रिꣳशिन्यनुष्टुप्, सैषा स्त्री; '**वागग्रेगा अग्र एतु**' इत्येषा त्रयस्त्रिꣳशिन्यनुष्टुप्, स एष पुमाꣳस्तदेतन्मिथुनम् ॥ ४ ॥ '**आ त्वा[२] रथं यथोतये**' इति माध्यन्दिने सवनेऽनुष्टुभꣳ होता प्रतिपद्यते; सैषा द्वात्रिꣳशिन्यनुष्टुप् , सैषा स्त्री; '**वागग्रेगा अग्र[३] एतु**' इत्येषा त्रयस्त्रिꣳशिन्यनुष्टुप् , स एष पुमाꣳस्तदेतन्मिथुनम् ॥ ५ ॥ '**तत्सवितुर्वृणीमहे**' इति तृतीयसवनेऽनुष्टुभꣳ होता प्रतिपद्यते; सैषा द्वात्रिꣳशिन्यनुष्टुप्, सैषा स्त्री; '**वागग्रेगा अग्र एतु**' इत्येषा त्रयस्त्रिꣳशिन्यनुष्टुप् , स एष पुमाꣳस्तदेतन्मिथुनम् ॥ ६ ॥ एता उत्तराः षडनुष्टुभस्ता वा एता द्वादश संपद्यन्ते; द्वादश मासाः संवत्सरः, संवत्सर एव प्रतितिष्ठति ॥ ७ ॥ ता [४]उ ह[४] वा ए[ता][५] इन्द्रमेवाग्रे देवानां पुत्रं जनयाञ्चक्रुः ॥ ८ ॥ [८७]

ता उ [६](ह वा एता इन्द्रमेवाग्रे देवानां पुत्रं जनयाञ्च)क्रुः; तासां याः षड् द्वात्रिꣳशिन्यस्तासां द्वादशाक्षराण्यादत्ते; अथ याः षट् त्रयस्त्रिꣳशिन्यस्तासामष्टादशाक्षराण्यादत्ते; तानि[७] वा एतानि त्रिꣳशत् संपद्यन्ते, त्रिꣳशदक्षरा विराडन्नं विराड्, विराजमेव तदन्नाद्यमृत्विजो यज्ञमुखे यजमानायापिदधति ॥ १ ॥ स उ ह वा एष एव स त्रयोदशो मासो यदसावादित्यः; तस्मादसावादित्यः सर्वेषां भूतानां प्रजननस्य रूपम्; प्र हैव प्रजया पशुभिर्मिथुनैर्जायते य एवं वेद ॥ २ ॥ स यस्मादु ह वा एतस्य मासस्य नामामावास्या[८] पौर्णमासीति संप्रति यजन्ते तस्मादेतन्वेवास्थ्नो[९] रूपं माꣳसस्य, स्नाव्नो रूपं यत्प्रजननस्य; स यद् वपा एष आप्तस्त्रिꣳशी[१०] मासस्तस्मादस्थन्वन्तं माꣳसवन्तं जनयति ॥ ३ ॥ तदेषाऽभ्यनूक्ता— '**स्त्रियः सतीस्ता उ मे पुꣳस आहुः**' इति; स्त्रियो वा ऋचस्ता उ वै मासा इति पुमाꣳस आख्यायन्ते। '**पश्यदक्षण्वान्न[११] वि चेत[दन्धः। कविर्यः पुत्रः स इमा चिकेत यस्ता विजानात्][१२] स पितुष्पितासद्**' इति; स यो ह वा एवमेता विजानाति सोऽमुष्मिँल्लोके पितुः पिता भवति ॥ ४ ॥ [८८] [इति सप्तमोऽनुवाकः]

१. MHP °यन्ति चर°. २. MH त्वरेथं. ३. MHP om. ४. AO VI. 97:217.12 om. ५. MHP om. ६. MHP abr. ७. MHP twice. ८. MHP नामावास्याः. ९. MHP स्नावन्नते. १०. MHP त्रिंशीन्मा°. ११. MHP °तक्षण्वान्न. १२. MHP broken, cf RV.I.164.16.

सर्वꣳ ह वावेदं यातयामेजानस्य भवति यदिदं किञ्च; अथैता[१] उदवसानीया आहुतीर्जुहोति यामाज्यस्य यां दध्नो यां पयसः[२]; स यत्किञ्चैषु लोकेष्वक्षन् विप्राणि ये ग्राम्याः[३] पशवो य आरण्या या आप ओषधयो वनस्पतयस्तद्धास्य ताभिरयातयाम भवति ॥ १ ॥ अथ यामप्सु जुहोत्यापो हैवास्य तयाऽयातयाम्नीर्भवन्ति; [४]अथ यामोषधीषु जुहोत्योषधयो हैवास्य तयाऽयातयाम्नीर्भवन्ति[४]; अथ यां वनस्पतिषु जुहोति वनस्पतयो हैवास्य तयाऽयातयामानो भवन्ति; एवं नु हास्येदꣳ सर्वमेवायातयाम भवति यदिदं किञ्च ॥ २ ॥ अथातः पूर्णाहुतिञ्जुहोति[५]; साहस्री ह[६] वा एषा तन्त्री यत् पूर्णाहुतिः; तस्यै होतार एव तन्त्री, मयूखा इम एव पञ्चाग्नयः; तस्माद्वा एत एतस्यै पुरस्ताद्वितानाया हूयन्ते ॥ ३ ॥ '**सप्त ते**' इत्येतामृचꣳ सप्तहोतुर्मध्यतो दधाति; साप्तं वै सप्तहोता, साप्तमेवाहुतिः, साप्तमेवैनां तद् गमयति; स उ ह वा एष सप्तहोता य एवैते सप्त शीर्षण्याः प्राणाः; इन्द्रो वै सप्तहोतेन्द्रस्यैवैनां तन्मध्यतो दधाति; प्र हैव प्रजया पशुभिर्मिथुनैर्जायते[७], प्रत्यु हैति[७] सर्वाणि भूतानि, यस्यैनामेवं जुह्वति; तस्मान्नु हैषैवमेव[८] होतव्या[९] ॥ ४ ॥[८९] [इत्यष्टमोऽनुवाकः]

इदं वा अन्वाहुर्- एष वै गायत्रियै वत्सो यदाग्रयणः; तमेव तदभिनिवर्तꣳ सर्वाणि सवनानि वहतीति ॥ १ ॥ तदाहुः- कथं गायत्रमग्निहोत्रं भवति, कथं गायत्रीमभिसंपद्यत इति; '**उन्नयामि**' इति चत्वार्यक्षराणि, '**ओमुन्नय**' इति चत्वारि, '**भुवदिडा**' इति चत्वारि, '**जनदिडा**' इति चत्वारि, '**वृधदिडा**' इति चत्वारि, ['**करदिडा**' इति चत्वारि][१०]; [११]तानि वा[११] एतानि चतुर्विꣳशतिः संपद्यन्ते, चतुर्विꣳशत्यक्षरा गायत्री; एवं नु ह गायत्रमग्निहोत्रं भवत्येवमु ह गायत्रीमभि संपद्यते[१२] ॥ २ ॥ तदाहुः— कथं गायत्रौ दर्शपूर्णमासौ भवतः, कथं गायत्रीमभि संपद्येते[१३] इति; '**आश्रावय**' इति चतुरक्षरम्, **अस्तु[१४](श्रौषड् यज ये यजामहे) वषट्**कारस्तानि सप्तदश; '**भूर्भुवः सुवः**' इति [१५]**पञ्च, ओं वाग्**[१५] इति द्वे; तानि वा एतानि चतुर्विꣳशतिः संपद्यन्ते[१६], चतुर्विꣳशत्यक्षरा गायत्री; एवं नु ह गायत्रौ दर्शपूर्णमासौ भवत, एवमु ह गायत्रीमभिसंपद्येते[१७]; एवं चातुर्मास्यान्येवं

१. MHP अथौता. २. MHP पयः. ३. MHP ग्राह्याः. ४-४. MHP repeated. ५. MHP पूर्णाहुतिर्जु°. ६. MHP om. ७-७. MHP °तेत्युहौति. ८. MHP हैषवैमेत [H °षे°]. ९. MHP होतव्याः. १०. MHP om; thus AO VI. 98 : 218. 6-7. ११-११. MHP twice. १२. MHP संपद्यन्ते; thus AO VI. 98.218.9. १३. MHP °पद्यत. १४. MHP abr. as अस्तु=वषट्कार°. १५-१५. MHP पञ्चोन्वाग्. १६. MHP सम्पद्यत. १७. MHP द्यते.

पशुबन्धः ॥ ३ ॥ तदाहुः- कथं गायत्रः सौम्योऽध्वरो भवति, कथं गायत्रीमभिसंपद्यत इति; एतान्येव सप्तदश; **'शोंऽसा मोदैव'** इति पञ्च[१], **ओं वाग्**[१] इति द्वे; तानि वा एतानि चतुर्विंशतिः संपद्यन्ते, चतुर्विंशत्यक्षरा गायत्री; एवं नु ह गायत्रः सौम्योऽध्वरो भवत्येवमु ह गायत्रीमभिसंपद्यते; एवमुक्थ्य एवं षोडश्येवमतिरात्र एवमप्तोर्यामः ॥ ४ ॥ तद्वा एतज्जालाध्यासो नामान्वाख्यानम्; तेनैव मध्यस्थाः सर्व[२] एव यज्ञक्रतवोऽमृता भवन्ति ॥ ५ ॥ सैषा गायत्र्येवं संपन्नाभिनिवर्तं सर्वाणि सवनानि वहति; तस्माद् वत्समपाकृतं गौरभिनिवर्तते ॥ ६ ॥ **[९०]** [इति नवमोऽनुवाकः]

इदं वा अन्वाहुर्- यज्ञस्य शिरोऽच्छिद्यत[३](; ते देवा अश्विनावब्रुवन् भिषजौ वै स्थ इदं यज्ञस्य शिरः प्रतिधत्तामिति; तावब्रूतां वरं वृणावहै ग्रह एव नावत्रापि गृह्यतामिति; ताभ्यामेतमाश्विनमगृह्णन्; ततो वै तौ यज्ञस्य शिरः प्रत्यधत्ताम्; यदाश्विनो गृह्यते) यज्ञस्य निष्कृत्या इति ॥ १ ॥ स उ ह वा एष एवाग्निष्टोमो यत्पृथिवी, तस्यै महावीरः शिरोऽसावादित्यः; त[द्][४] दधिग्रहेणैव प्रातःसवने प्रत्यधत्तां, दधिघर्मेण माध्यन्दिने सवन आदित्यग्रहेण तृतीयसवने; स यदु हैवैनत्[५] प्रत्यधत्तामश्विनौ[६] हैवैनत् प्रत्यक्षतमं प्रत्यधत्ताम् ॥ २ ॥ तदाहुः- किमश्विनाविति; अहोरात्रे ह वा अश्विनौ; स यद्ध वा एतद् यज्ञस्य शिरो[७] नाच्छेत्स्यतामन्यतर[८] एव तदश्विनोरभविष्यदहरेवाभविष्यन्न रात्रिः; अथ यदेनच्छिन्नं न[९] प्रत्यधास्यता-मन्यतर[१०] एव [११]तदश्विनोरभविष्यद् रात्रिरभविष्यत् सर्वमेवेदमन्धतमसम-भविष्यन्नाहः[१२]; अथ यदेतच्छिन्नं[१३] प्रत्यधत्तां तदेतद् यज्ञस्य शिरो [निष्क्रियते][१४] प्रति च धीयते ॥ ३ ॥ **[९१]** [इति दशमोऽनुवाकः]

इदं वा अन्वाहुः- कनीयांसि वै देवेषु छन्दांस्यासञ्ज्यायांस्यसुरेषु; ते देवाः[१५](कनीयसा छन्दसा ज्यायश्छन्दोऽभिव्यशंसन्; ततो वै तेऽसुराणां लोकमवृञ्जत; यत् कनीयसा छन्दसा ज्यायश्छन्दोऽभिविशंसति) भ्रातृव्यस्यैव

१-१. MHP पञ्चो वाग्, AO VI.98:218.17 : पञ्चोऽवाग्. २. MHP सर्वे. ३. MHP abr. as शिरोऽच्छिद्यत=यज्ञस्य, cf TS VI.4.9.1. ४. MHP om. ५. MHP हैवैनं; thus conjectured AO VI.99.219 fn 1. ६. MHP °श्विनोर्हैवै°. ७. MHP शरो. ८. M °नाच्छेस्याता°, H नाच्छेदस्याता°, P नाच्छते स्याता°; thus AO VI.99:219.10. ९. AO VI. 99:219.11 om; thus M. १०. MHP °धास्याता°, thus AO VI.99:219.12. ११. MHP न्नोहर्; thus AO VI.99:219.13. १३. MHP च्छिन्नन्तदाश्वि°; thus AO ibid. १२. MHP न्नोहर्; thus AO VI.99:219.13. १३. MHP च्छिन्नन् तदाश्वि°; thus AO **ibid.** १२. MHP broken, cf above 91.1. : निष्कृत्यै. १५. MHP abr. as ते देवाः=भ्रातृव्यस्यैव, cf TS VI. 6.11.12.

तल्लोकं वृङ्क्त इति ॥ १ ॥ एकोत्तराणि देवछन्दसान्येकाधराण्यसुरछन्दसानि[१]; **वाग्** इत्येकाक्षरं प्रथमं देवछन्दसाम् , **'आयुः'** इति [द्व्यक्षरं द्वितीयं, **'विश्वायुः'** इति त्र्यक्षरं] तृतीयं, **'विश्वमायुः'** इति चतुरक्षरं चतुर्थम्, **'एवंह्येवाम्'** इति पञ्चाक्षरं पञ्चमम्, **'उपेहि विश्वतः'** इति षडक्षरं षष्ठं, **'विदा मघवन्विदा'** इति सप्ताक्षरं सप्तमम् ॥ २ ॥ पञ्चदशाक्षरं प्रथममसुरछन्दसां, चतुर्दशाक्षरं द्वितीयं, त्रयोदशाक्षरं तृतीयं, [३][द्वादशाक्षरं चतुर्थमेकादशाक्षरं पञ्चमं, दशाक्षरं षष्ठं, नवाक्षरं सप्त]मम् ॥ ३ ॥ तद्वा इदमन्वाहुर्— यद्यग्निष्टोमः सोमः परस्तात् स्यादुक्थ्यं कुर्वीत, [४](यद्युक्थ्यः स्यादतिरात्रं कुर्वीत, यज्ञक्रतुभिरेवास्य देवता) वृङ्क्त इति ॥ ४ ॥ तन्नादृत्यम्[५]; अग्निष्टोमादेव न च्यवेरन् , नो एवोपसदं व्यूहेयुर्दक्षिणास्त्विह भूयसीर्दद्याद् ॥ ५ ॥ अथ ह स्तोत्रस्य पुरस्तात् सर्वान् सर्वान् [. . . . .][६] पुरस्ताद्धोतुः[७] **'इडा देवहू'** इति यावदेतस्य यजुषोऽभ्याप्नोति; अभ्याह्वयत एनं, प्रत्यागृणाति ॥ ६ ॥ **'वागायुर्वागु वायुर्विश्वायुर्विश्वमायुः सर्वायुः सर्वमायुरेवं[८] ह्येवामुपेहि विश्वतो विदा मघवन् विदो धाम्नो धाम्नो विदो'**[. . . .[९]] ते देवा वागित्येकाक्षरेण [१०]पञ्चदशाक्षरमभिव्यशंसन् ॥ ७ ॥ **[९२]**

वागि[११](त्येकाक्षरेण पञ्चदशाक्षरमभिव्य)शंसन्; तत्[१२] षोडशकलं कृत्वा समवृञ्जत; **'आयुः'** इति द्व्यक्षरेण चतुर्दशाक्षरमभिव्यशंसन्, तत्[१३] षोडशकलमेव कृत्वा समवृञ्जत[१४]; **'विश्वायुः'** इति त्र्यक्षरेण त्रयोदशाक्षरमभिव्यशंसन्[१५], तत्[१५] षोडशकलमेव कृत्वा समवृञ्जत; **'विश्वमायुः'** इति चतुरक्षरे[ण][१६] द्वादशाक्षरमभिव्यशंसन्[१७], तत्[१७] षोडशकलमेव कृत्वा समवृञ्जत; **'एवं ह्येवाम्'** इति पञ्चाक्षरेणैकादशाक्षरमभिव्यशंसन्[१७], तत्[१७] षोडशकलमेव कृत्वा समवृञ्जत; **'उपेहि विश्वतः'** इति षडक्षरेण दशाक्षरमभिव्यशंसन्[१८], तत्[१८] षोडशकलमेव कृत्वा समवृञ्जत; **'विदा मघवन् विदा'** इति सप्ताक्षरेण नवाक्षरमभिव्यशंसन्[१७], तत्[१७] षोडशकलमेव कृत्वा समवृञ्जत; तद्वा इदं सर्वं षोडशकलमष्टाशफं चतुष्पत् ; तदेवमेव देवा

१. MHP °न्येकाधरण्यसु°. २. MHP broken; thus AO VI. 100a:219.29-30. MHP broken; thus AO VI. 100a :220.2-3. ४. MHP abr. as कुर्वीत=वृङ्क्त cf TS III. 11. ५. MHP तन्नोदृत्यम्. ६. MHP broken. ७. AO VI.100a:220.8 °द्धोतोर्. MHP °रेवं. ९. MHP broken; thus AO VI.100a:220.12. १०. MHP षोडशाक्षर°, thus ibid. ११. MHP abr. १२. MHP om; thus AO **ibid.** १३. MHP ततः. १४. MHP जता. १५-१५. M °सन्नप्तो, H °न्तथो, P °तरो. १६. MHP broken. -१७. MHP °शंसन्त. १८-१८. MHP °न्ताथ.

असुराणाꣳ समवृञ्जत; तथो एवैतदेवंविद् यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्ते[१]; तदेतत् सꣳसवे वैव कुर्वाद् भ्रातृव्यान् वा [२][तु]स्तूर्षमाणः॥ १ ॥ प्रजापतिश्छन्दसानि समवृञ्जत; एतैरेव षोडशभिरष्टाक्षरां गायत्रीमभिव्यशꣳसन् ; सा चतुर्विꣳशत्यक्षरा गायत्र्यभवत्; एतैरेव षोडशभिर्द्वादशाक्षरमभिव्यशꣳसन् ; साऽष्टाविꣳशत्यक्षरोष्णिगभवत्[३]; एतैरेव षोडशभिः षोडशाक्षरामनुष्टुभमभिव्यशꣳसन्; सा द्वात्रिꣳशदक्षराऽनुष्टुगभवत् ; एतैरेव षोडशभिर्विꣳशत्यक्षरां बृहतीमभिव्यशꣳसन् ; सा षट्त्रिꣳशदक्षरा बृहत्यभवत्; एतैरेव षोडशभिश्चतुर्विꣳशत्यक्षरामभिव्यशꣳसन् ; सा चत्वारिꣳशदक्षरा पङ्क्तिरभवत्[४]; एतैरेव षोडशभिरष्टाविꣳशदक्षरां त्रिष्टुभमभिव्यशꣳसन्; सा चतुश्चत्वारिꣳशदक्षरा[५] त्रिष्टुगभवत् ; एतैरेव षोडशभिर्द्वात्रिꣳशदक्षरां जगतीमभिव्यशꣳसन् ; साऽष्टाचत्वारिꣳशदक्षरा जगत्यभवत्; तानि त्रीणि त्रीणि छन्दाꣳस्यभवन्[६]; येकैश्छन्दः[६] सार्धꣳसार्धꣳ समुदूह्य ऋषिभ्यः प्रत्यूहꣳस्तान्यृषिच्छन्दसान्यभवन्॥ २॥ [९३] [इत्येकादशोऽनुवाकः]

अग्निर्ह वावाग्निष्टोम[७] इत्याहुर्वायुर्ह वावाग्निष्टोम इत्याहुरादित्यो ह वावाग्निष्टोम इत्याहुश्चन्द्रमा ह वावाग्निष्टोम इत्याहुः॥ १ ॥ अग्नेर्ह वा एतच्छरीरं यदसावादित्य आदित्यो हैवाग्नेरसुः ; वायोर्हवा एतच्छरीरं यदसौ चन्द्रमाश्चन्द्रमा हैव वायोरसुः॥ २॥ ते वा एते चत्वार एवाग्निष्टोमस्य स्तोमा अग्निर्वायुरादित्यश्चन्द्रमा इति; तस्मादाहुर्यश्चैवं वेद यश्च न चतुष्टोमोऽग्निष्टोम इति, चतुष्टोमो हैवाग्निष्टोमः॥ ३ ॥ स उ ह वा एष एवाग्निष्टोमो यत्पृथिवी, यजमानो ह वा ऋत्विजां प्रतिष्ठा; स यो ह वा एवंविदाऽध्वर्युणा याज्यमानो यजमानो नर्ध्नोति, यादृगेव[८] भवति तादृङ्ङ्ष्टवै ध्रियते, नो हैवाशा चन [९]पापीयोभव्यायै; क्व हीयꣳ स्थानाच्च्योष्यते[१०] यत् पृथिवी; नो हैव स्थानाच्च्योष्यते[११] य[१२] एवमेतामग्निष्टोमस्योपनिषदं वेद॥ ४॥ [९४] [इति द्वादशोऽनुवाकः]

॥ इति समाप्ता दशिका ॥

॥ इत्यग्निष्टोमान्वाख्यानं समाप्तम् ॥

॥ इति चतुर्थः प्रपाठकः ॥

१. MHP वृञ्जे; thus AO VI.100a :220.25. २. MHP broken, सतूषमाणान्; thus AO **ibid.** ३. MHP °क्षरोगभवद्. ४. MHP पङ्क्तिभिरभ° ५. MHP °क्षरां. ६-६. MHP °भवस्येकैश्छ°; thus AO VI. 100 b : 221.17. ७. MHP °स्तोम; thus AO VI.101:221.24. ८. MHP जादृङ्नेव. ९. MHP पावियो°; thus AO VI.101:222.2. १०. MHP चोष्यते; thus AO VI.101:222.4. ११. MHP च्यवते; thus AO VI.101:222.4. १२. MHP om; thus AO.**ibid.**

अथ पञ्चमः प्रपाठकः

[अथाग्निचयनान्वाख्यानम्]

इदं वा अन्वाहुर्—'**द्वौ समुद्रौ विततौ**' इति तावु ह वा एतावहोरात्रावेव; '**अजूर्यौ**' इति न ह्येतयोर्जरणमस्ति यदहोरात्रे; '**पर्यावर्तेते[१] जठरेव पादाः**' इति स यदु हैवैनदहश्च [२]रात्रिश्चान्योऽन्यमनु पर्यावरीवर्तेते तदु हैवैनयोरेतत् [३]पर्यावर्तनम्; '**तयोः[३] पश्यन्तो अतियन्त्यन्यम्**' इति स यदु हैवैनदहः पश्यन्तोऽतियन्ति[४] तदु हैवास्यैतत्; '**अपश्यन्तः[५] सेतुनाऽतियन्त्यन्यम्**' इति, [६]प्राणो वै वायुः सेतुः[६], स यदु हैवैनदपश्यन्तः[७] सुप्ताः प्राणेन सेतुना रात्रि[मतियन्ति][८], तदु ह वा अस्यैतत् ; स वा एष वायुः प्राणः सेतुः; स यो ह वा एवमेतं वायुं प्राणं सेतुं वेद[९], शश्वद्ध सर्वमायुरेत्यमृतोऽमुष्मिँल्लोके भवति, जरसा विस्रसाऽस्माल्लोकात् प्रैति॥ १ ॥ '**द्वे द्रधसी**'॥ [१]

'**द्वे द्रधसी सतती[१०] वस्त एकः**' इत्यादित्य उ हैवाहोरात्रे सतती वस्त एकः; '**केशी विश्वा भुवनानि विद्वान्**' इत्येष उ [११]ह वै[११] केशी विश्वा भुवनानि वेद य[१२] आदित्यः[१२]; '**तिरोधायैत्यसितं वसानः**' इति, स यदु हैवैषोऽस्तमितस्तिर[१३] एव[१३] रात्रिं कृत्वैति, सो [१४]ह वा अस्यैषा[१४] तिरोधसा; [१५]'**शुक्रमा दत्ते अनुहाय जार्यै**' इत्यसौ वा आदित्यः शुक्रस्तस्यो होषैव जारी, तस्या एतच्छुक्रमाददाना[१६] एत्यहरेव; तस्मादेतस्यै[१७] देवताया अग्निचित्यायां[१८] प्रथमꣳ हविर्निरुप्यते॥ १ ॥ [२] [इति प्रथमोऽनुवाकः]

१. MH °वर्तते. २. M रन्ति। यावन्यो°. ३-३. M पर्याव अतिया, HP पर्यावर्तम्; thus AO VI.102:223.2. ४. MHP पश्यन्तो वैवायुन्ति. ५. MHP पश्यत. ६-६. M प्राणर्थ [illegible]न स्सेतुः. ७. MHP हैवैन पश्य°. ८. M broken; thus AO VI.102:223.5. ९. MHP [illegible]. १०. M सततीति. ११-११. M हैव. १२-१२. MHP यदादित्यः. १३-१३. MHP [illegible]तं तिरैव; thus AO VI.102:223.12. १४-१४. MHP हैवास्यैषाः. १५. MHP तुक्रमा°. [illegible] AO VI. 102:223.14; thus M. १७. MHP तस्मा एतस्यै; thus AO **ibid.** १८. MHP [illegible]चित्यान्धां [H त्यां धां].

इदं वा अन्वाहुः- प्रजापतिः प्रजाः सृष्ट्वा वृत्तोऽशयत् [१](; तं देवा भूतानाꣳ रसं तेजः संभृत्य तेनैनमभिषज्यन् महानवर्तीति तन्महाव्रतस्य महाव्रतत्वम् ; महद् व्रतमिति तन्महाव्रतस्य महाव्रतत्वम्;) महतो व्रतमिति तन्महाव्रतस्य महाव्रतत्वम् ॥ १ ॥ ते देवा एतं यज्ञमुखे सवितारमुपासीरन्[२] '**सवितः प्रसुव त्वया प्रसूताः संभराम**[३]' इति; ताꣳस्तथेत्यब्रवीत्; तेषां '**युञ्जानः प्रथमं मनः**' इत्येव प्रथमं मनोऽयुनक्; '**तत्त्वाय सविता धियः**' इति धियः[४]; '**अग्निं**[४] **ज्योतिर्निचाय्य पृथिव्या अध्याभरत्**' इत्येवैनं पृथिव्या[५] आभरत्; '**युक्त्वाय मनसा देवान्** [६](**सुवर्यतो धिया दिवम्। बृहज्ज्योतिः करिष्यतः सविता**) **प्र सुवाति तान्**' इत्येवैनान् सविता प्रासुवत्[७] ॥ २ ॥ ते सवितृप्रसूता एवान्वैच्छन्, '**युक्तेन मनसा वयं** [८](**देवस्य सवितुः सवे। सुवर्गेयाय**) **शक्त्या इन्द्रं दानाय हूमहे**' इतीन्द्रो वै स आसीत् ॥ ३ ॥ तानि वा एतान्यष्टौ सावित्राणि हूयन्ते ॥ ३ ॥ [३]

तानि [९](वा एतान्यष्टौ सावित्राणि हूय)न्त एतस्यै देवतायै भागधेयाय यस्मादेवं यज्ञमुखे सवितारमुपासीरन्[२] ॥ १ ॥ ता उ ह वा एता ऋच एवाष्टौ भवन्ति यत्सावित्राण्याहुतिरेव नवमी; त्रिवृदेव स स्तोमस्त्रिवृद्दै बहिष्पवमानस्त्रिवृदु ह वै सुवर्गो लोकोऽत्रो ह सुवर्गमेव लोकं बहिष्पवमानमभि संपद्यते[१०] ॥ २ ॥ '**ऋचा स्तोमꣳ समर्धय**[११]' इति[११] यजुरन्त्यं कृत्वा जुहोति; तस्माद् यजुर्वेदो वेदानामन्नादतमो, [१२]यस्मादेवमेतद्यजुरन्त्यं करोति ॥ ३ ॥ सोऽब्रवीत्-'**संभरत मा**' इति; स यो दर्विहोमायालमासीद् योऽग्निहोत्राय [यो][१३] दर्शपूर्णमासाभ्यां यश्चातुर्मास्येभ्यो यः[१४] पशुबन्धाय यः सौम्यायाध्वराय[१५] तं तथा समभरन्; ततो वै [१६]तस्याङ्गापरूꣳष्यङ्गुलिपरूꣳषि प्रावर्धन्त[१७] यथेमानि पुरुषस्याङ्गुलिपरूꣳषि प्रवर्धन्त एवम्[१८] ॥ ४ ॥ सोऽब्रवीत् पुत्रका यजध्वमेव मेष्टमिष्टमेव मे कं भविष्यतीति,

१. MHP abr. cf TB.I. 2. 6.1; thus AO VI.103a:223.29-31 224.1-2. २. AO VI 103a:224.3:उपासीदन्, fn 2:उपासीरन्; thus MHP. ३. MHP समभरा°. ४-४. MHP धियो हि. ५. MHP पृथिव्याम्; thus conjectured as probable reading AO VI.103a:224. fn 4. ६. MHP abr. as देवान्=प्रसुवाति, cf TS IV.1.1.2 ७. MHP प्रसु° ८. MHP abr. as वयं=शक्त्या, cf TS IV.1.1.3. ९. MHP abr. as तानि=न्त. १०. Caland conjectures it to be संपद्यन्ते AO.VI.103b:224fn 6. ११-११. MHP समर्धयति. १२. AO VI.103b:224.2 यस्मादेतद्य°. १३. MHP broken; thus AO VI. 103b:224. 30. १४. MHP याः. १५. MHP सौम्योयाध्व°. १६. MHP तस्यां गावरूꣳ°; cf TS II.5.6.2. १७. MHP प्रावद्धन्त. १८. MHP एव; thus conjectured AO VI.103b:225fn 2.

तदिष्टकानामिष्टकात्वम्; इष्टमिष्टꣳ ह वावास्मै कं भवति य एवमेतदिष्टकानामिष्टकात्वं वेद ॥ ५ ॥ त उ ह वा एतावन्त एव यज्ञक्रतवो भवन्ति यावतीरेता इष्टका यावानग्निः संचित; एतावद्भिर्हास्य[१] यज्ञक्रतु[भि]रिष्टं[२] भवति यावतीरेता इष्टका यावानग्निः संचितो[३] य एवंविद्वानग्निं संचिनुते[४] यस्य वैवं[५] विद्वानग्निं चिनोति ॥ ६ ॥ तद्वा इदमन्वाहुः— प्रजापतिः प्रजाः सृष्ट्वा प्रेणाऽनुप्राविशत्[६], ताभ्यः [७](पुनः संभवितुं नाशक्नोत्; सोऽब्रवीदृध्नवदित् स यो मेतः पुनः संचिनवदिति; तं देवाः समचिन्वन्, ततो वै त आर्ध्नुवन् यत् समचिन्वन् तच्चित्यस्य) चित्यत्वमिति; स य एवंविद्वानग्निं संचिनुते यस्य वैवंविद्वानग्निं चिनोति यामेव देवा [८]ऋद्धिमार्ध्नुवन् तामेवर्ध्नोति ॥ ७ ॥ [४] [इति द्वितीयोऽनुवाकः]

इदं वा अन्वाहुश्चतुर्भिरभ्रिमादत्त इति; वैणवी[९] वा अभ्रिर्वैणवा[१०] वनस्पतयो, वनस्पतिभ्य एवैनं तत् संभरति ॥ १ ॥ अथ यदश्वश्च गर्दभश्च भवतो ग्राम्येभ्यश्चैवैनं[११] तत् पशुभ्य आरण्येभ्यश्च संभरति ॥ २ ॥ अथ यद् रशने भवत ओषधीभ्य एवैनं तत् संभरति ॥ ३ ॥ अथ यदुदकुंभो भवत्यद्भ्य[१२] एवैनं तत् संभरति ॥ ४ ॥ अथ यत्पुरुषः[१३] सꣳशिष्टो भवति पुरुषेभ्य एवैनं तत् संभरति ॥ ५ ॥ अथ यद् वल्मीकवपा भवति श्रोत्रादेवैनं तत् पृथिव्याः संभरति ॥ ६ ॥ अथ यत् करणीया[१४] मृद् भवत्यस्या एवैनं तत् संभरति ॥ ७ ॥ अथ यत् पुष्करपर्णे भवतो गन्धर्वाप्सरोभ्य एवैनं तत्[१५] संभरति ॥ ८ ॥ अथ यत् कृष्णाजिनस्य लोमान्यजलोमानि च भवन्ति[१६] ग्राम्येभ्यश्चै[वै]नं[१७] तत्[१५] पशुभ्य आरण्येभ्यश्च संभरति ॥ ९ ॥ अथ यच्छर्करा भवन्त्यग्निमेवैतत्[१८] प्रत्यक्षꣳ संभरतीष्टका हि शर्कराः ॥ १० ॥ अथ [१९]यदर्मकपालानि भवन्त्यर्मादेवैनं तत् पृथिव्याः संभरति ॥ ११ ॥ अथ यत् पर्णकषायो भवति वनस्पतिभ्य एवैनं तत् संभरति ॥ १२ ॥ तद्वा इदमन्वाहुर्- [गायत्रिया प्रथमया

१. MHP एतावाजिर्नास्य; thus AO VI. 103b : 225.7. २. MHP °क्रतुरिष्टँ; thus AO VI. 103b : 225.8. ३. MHP repeat एतावाजिर्नास्य=सञ्चितो after संचितो. ४. M °चिनोति; thusAO VI. 103b : 225. 9. ५. AO **ibid** चैवं. ६. MHP प्रादिभ्यत्, cf TS V.5.2.1. ७. MHP abr. as ताभ्य=चित्यत्वमिति, cf TS V.5.2.1. ८. MHP ऋर्धि°. ९. MHP वैष्णवी वैष्णवी. १०. MHP अक्षिर्वैष्णवा. ११. MHP ग्रामेभ्य एवैनं; thus AO VI. 104 : 226.10. १२. MHP भवत्याज्य; thus AO VI. 104 : 226.13. १३. AO VI. 104 : 226. 13 : पुरुपो. १४. M करुणी° १५. MHP om. १६. MHP संभरति; thus AO VI. 104 : 226. 18. १७. MHP °श्चैनं; thus AO **ibid.** १८. MHP °मेव तत्; thus AO VI. 104 : 226 . 20. १९. MHP यद्यर्म°.

परिलिखत्यथानुष्टुभाऽ|[१]थ त्रिष्टुभेति; तासां वा एतासां तिसृणामृचाꣳ शतमक्षराणि भवन्ति; शताक्षरो वै पुरुषः शतायुः शतेन्द्रिय आयुष्येव तदिन्द्रियेऽक्षरशोऽग्निचिदेतया संपदा प्रतितिष्ठति; तं वा एतमक्षरश एव समभरꣳस्ततो हैवापीदमेतर्हि यज्ञे यजमानमन्वाहुः॥ १३ ॥ [५] [इति तृतीयोऽनुवाकः]

[एका बृहती|[२] तिस्रो [२क]गायत्रियश्च तिस्रस्त्रिष्टुभस्ता वा एतास्तिस्रश्चाक्षराशीतयः संपद्यन्ते॥ १॥ अनुष्टुबेका तिस्रो वा अशीतयो महदुक्थमत्रो हैवास्मिन्महदुक्थमर्पयत्ते॥ २॥ अर्को वा एष यदग्निर्गौर्वैषा यदनुष्टुबत्रो हैवास्यैषोऽर्को वाचि [३][संपद्य]ते॥ ३॥ विꣳशतिश्चाक्षराणि; त उ ह वा एष एवाधिपुरुषं प्राणा भवन्ति यद् बृहत्य; विꣳशो वै पुरुषो दशहस्त्या अङ्गुलयो दश पद्याः अत्रो ह यजमानमेवाग्निचित्याभिः संपद्यते॥ ४॥ [६] [इति चतुर्थोऽनुवाकः]

अयꣳ ह वाव लोक उद्धिः[४] प्रथम उखाया अ|न्तरिक्षलोको द्वितीयो दिविलोकस्तृतीयः॥ १॥ स][५] हैवास्यैष नेमिः पर्यस्तो रास्ना सम्मिव पेपिच्यति; अतो[६] होखैवेदꣳ सर्वं भवति यदिदं किञ्चैतैरादेशैः॥ २॥ तामु[७] हैतां चतुस्तनामेव कुर्याच्चत्वारो वै गोस्तनाः; [८]शुन्यै वैव[८] वराह्यै वाष्टौ[९] वा नव वा स्तनाः; तयोर्वै[१०] कनीयो वीर्यं [भवति; स][११] हैतां चतुस्तनामेव कुर्यादेतस्यै देवतायै वीर्याय संपदे[१२]॥ ३॥ शिरो वा एतस्य यज्ञक्रतोरुखा [१३]ग्रीवास्त्रैधातवीयेष्टिरात्मा प्राजापत्यः पशुः॥ ४॥ तं नु हैतदेके पशुनैव पूर्वेण प्रतिपद्यन्त आत्मा वै प्रथमजोऽङ्गानामिति वदन्तोऽथैवंविद[१४] उखयैव तस्याꣳ ह्येवैतानि ज्योतीꣳषि बिभ्रियन्ते[१५] यत्प्राणाः॥ ५॥ श्रीर्वै शिरोऽङ्गानाम् ; ईश्वरो हैनꣳ श्रीराप्तोरस्मिꣳश्च लोकेऽमुष्मिꣳश्च यस्यैनमुखया पूर्वया प्रतिपद्यन्ते; तस्मान्नु हैनमुखयैव पूर्वया प्रतिपद्येरन्॥ ६॥ [७] [इति पञ्चमोऽनुवाकः]

पुरुषꣳ ह स्म वावैतं पुरा प्राजापत्यं पशुमालभन्त; एतेन कर्णाजाये आचितम् ; सुवर्गꣳ हि ह स्मैनं लोकमति दर्शयन्ति॥ १॥ तस्य ह[१६] देवेषु[१६]

१. MHP broken, cf TS V.1.3.17-18; thus AO VI.104:227.13-14. २. MHP broken. २क. MHP गायत्रश्चतस्र°. ३. MHP broken. ४. MHP उज्जिः; thus AO VI.106:227.26. ५. MHP broken; thus supplied AO VI. 106:227.26-27. ६. MHP अत्रो; thus AO VI.106: 227.28. ७. MHP तानु. ८-८. MHP शून्यैवावे, thus AO VI.106:228.2. ९. MHP वाचाष्टौ; thus AO **ibid.** १०. MHP तन्धोयोर्वै; thus AO VI. 106:228.3. ११. MHP broken: thus supplied AO **ibid.** १२. MHP संवदे. १३. MHP ग्रीवाग्रीवास्त्रे°. १४. MHP अथ हैवमविद; thus AO.VI. 107:228.24. १५. MHP VI.107:228.25. विह्रियन्त. १६-१६. MHP हवेपु : thus AO VI. 108 : 229.21.

प्रतिक्रामत्सु धार्तक्रतवो जातूकर्णीडां न चकमे प्राशितुम् ; तं ततोऽश्वं [१]चक्रुः; तस्यो[१] ह देवेष्वेव[२] प्रतितरां क्रामत्सु[३] रहःक्षितो जातूकर्णीडां[४] न चकमे प्राशितुम् ; तमु ततोऽजं, तूपरः प्राजापत्यः सर्वरूप इति वदन्तः॥ २॥ पञ्चो ह स्म वावैतान् पुरा पशूनालभन्ते पुरुषमेव प्रजापतयेऽग्नये,ऽश्वमग्नये क्षत्रवत, ऋषभमग्नये क्षत्रभृते[५], वृष्णिमग्नये ब्रह्मण्वते, बस्तमग्नये पुष्टिमत इति; [६]तान् सहैतेन[६] पशुना पर्यग्निकृत्वोत्सृजन्ति, प्राजापत्येनो एव सꣳस्थापयन्ति॥ ३॥ [७]एतान् ह वावैतद्[७] ब्राह्मणमभिवदति[८]-अग्निभ्यः पशूनालभन्ते, कामा वा अग्नयः कामानेवावरुन्द्ध इति॥ ४॥ तान्नु हैतान् व्रीहियवयोरेव कुर्याद्; व्रीहियवौ ह नेदिष्टं[९] पशूनामसुः॥ ५॥ कुरुराजाय हैकस्मा अग्निः पशुशीर्षविद्यां प्रोवाच; ताꣳ[१०] हैव कुरुपाञ्चालानाꣳ[११] श्रोत्रिया वेदैर्ज्ञीप्सन्तीत्था३मित्था३मिति[१२]; नेत्तु [१३]ह स्म[१३] स आह॥ ६॥ अथ ह शुद्धौजा माण्डव्यः॥ ७॥ [८]

[१४]अथ ह[१४] शुद्धोजा माण्डव्यो विचिकित्सन्[१५] मारिषाभगिं ब्रह्मचारिणमुवाचेहि[१६] सोम्येमꣳ राजानं गच्छ; अग्निर्हैवास्मै पशुशीर्षविद्यां प्रोवाच; ताꣳ[१०] हैव कुरुपाञ्चालानाꣳ[११] श्रोत्रिया वेदैर्ज्ञीप्सन्तीत्था३मित्था३मिति[१२]; नेत्तु[१७] हैव[१७] स आह; तं[१८] त्वं[१८] गत्वाऽनया पशुशीर्षविद्यया तथा वद; स [१९]यद्धाभिजानाद् वयं त्वां याजयामेत्येनं[२०] ब्रवसीति[२१]॥ १॥ तꣳ हैवैतद् गत्वोवाच राजन्नग्निर्हैव[२२] ते पशुशीर्षविद्यां प्राब्रवीदियꣳ सा[२३] कथा३मिति[२३]; तस्मै हाभिज्ञायाञ्जलिञ्चकार[२४]; नमस्तेऽस्तु भगव, एतां मह्यमग्निः पशुशीर्षविद्यां प्राब्रवीद् , यूयं मा याजयतेति[२५]; तमु ह स याजयाञ्चकार; स यो ह वा एवमेतामग्नेः पशुशीर्षविद्यां वेद स एव संप्रत्यग्निं वेद; अथ य एवं न वेद नो हैव स संप्रत्यग्निं वेद॥ २॥ स[२६] यस्य हानेवंविदग्निं[२७] चिनुयात् कामꣳ हैवैनं

१-१. MHP चक्रुन्त°. २. MHP वेदेष्वेव. ३. MHP क्रमात्सु. ४. MHP °कर्णीडा. ५. MHP क्षत्रवते; thus AO VI. 108 : 229.26. ६-६. MHP तामपर्यसतेन. ७-७. MHP एताह्नवैतत्; thus AO VI. 108 : 229. 29. ८. MHP °मधिव°; thus AO **ibid.** ९. MHP नेदिष्ठं; thus conjectured AO. VI. 108 : 229 fn 6. १०. MHP तं. ११. MHP °पाञ्चालाꣳ १२. MHP °त्थामित्थामिति; thus AO VI. 108 : 230 .1. १३-१३. MHP हैव; thus AO VI. 108 : 230.2. १४-१४. MHP अथाह. १५. MHP °कित्स; thus Ao **ibid.** १६. MHP °मपाचेदि. १७-१७. MHP नेतुर्हैव. १८-१८. MHP तन्वं. १९. MHP यद्वयाभि°; thus AO VI. 108 : 230.7. २०. MHP यामीत्ये°. २१. MHP ब्रुवसी°. २२. MHP हैंवै. २३-२३. MHP सा या कथामीति; thus AO VI. 108 : 230.9. २४. MHP °ञ्जलीञ्च°. २५. MHP याजयथेति; thus AO VI. 108 : 230.11. २६. MHP om; thus AO VI. 108 : 230. 13. २७. MHP °विदमग्निं.

चिनुयान्मृत्युना न्वा अयमध्वर्युर्यजमानस्य प्राणान् समया[वी]न्[१] मरिष्यतीति; तथा हैव स्यात्; तस्मादेवंविदमध्वर्युमिच्छेत्[२] ॥ ३ ॥ [९] [इति षष्ठोऽनुवाकः]

ब्रह्म ह वा अग्निप्रजापती[३] असृजत; स पुरुषरूपेणैव प्रजापतिमसृजत; स उ ह वा एष एव मृत्युर्यदग्निः; स प्रजापतिमत्स्यतो रूपेणाभिपलायत; स एतं प्रजापतिः[४] प्राजापत्यं पशुमात्मस्परणं पर्यपश्यत्; तमालभत; तस्य लोम्नैव लोमास्पृणुत त्वचा त्वचं माꣳसेन माꣳसमस्थ्नाऽस्थि मज्ज्ञा[५] मज्जानं शुक्लेन शुक्लम्; तस्मान्नु हैष आत्मन्वी सर्वाङ्ग आण्डीवलः स्याद् यत् प्राजापत्यः, पशुरात्मस्परण इव हि ॥ १ ॥ तस्य सामिधेनीनां मीमाꣳसा। पञ्चदशानुब्रूयादित्याहुः, पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर[६] आप्यते; संवत्सरमेवाप्नोतीति ॥ २ ॥ सप्तदशानुब्रूयादित्याहुर्द्वादश मासाः पञ्चर्तवः संवत्सरः, संवत्सरमेवाप्नोतीति ॥ ३ ॥ एकविꣳशतिमनुब्रूयादित्याहुर्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳशोऽत्रो हैवास्मा इदꣳ सर्वमन्वाह, [७]एकविꣳशतिञ्चास्मा अन्वाह[७] ॥ ४ ॥ चतुर्विꣳशतिमनुब्रूयादित्याहुः ॥ ५ ॥ [१०]

चतु[८](र्विꣳशतिरनुब्रूयादित्या)हुश्चतुर्विꣳशतिरर्धमासाः संवत्सरः, संवत्सरमेवाप्नोतीति ॥ १ ॥ सप्तदशैवानुब्रूयादेतत् स्थितम्[९] ॥ २ ॥ स प्रजापतिरात्मानं मृत्योर्निष्क्रीय प्रजा असृजत; ताः सृष्टा मृत्युरत्स्यतो रूपेणाभिपलायत; ता दशहोत्रा पर्यवैत्; ता दशहोतारमुपापद्यन्त[१०] प्रजा अद्यमाना[११] अमृतमेतद्, दशो वै पुरुषे प्राणाः; स दशहोताऽभवत् ॥ ३ ॥ स द्वितीया असृजत; ताः सृष्टा मृत्युरत्स्यतो रूपेणाभ्येव पलायत; ताश्चतुर्होत्रा पर्यवैत्; ताश्चतुर्होतारमुपापद्यन्त[१०] प्रजा अद्यमाना अमृतमेतच्चत्वार्यङ्गानि; स चतुर्होताऽभवत् ॥ ४ ॥ स तृतीया असृजत; ताः सृष्टा [१२](मृत्युरत्स्यतो रूपेणाभ्येव पला)यत; ताः पञ्चहोत्रा पर्यवैत्; ताः पञ्चहोतारमुपापद्यन्त[१०] प्रजा[१३](अद्यमाना अमृतमेत)च्चत्वार्यङ्गान्यात्मा पञ्चमः; स पञ्चहोताऽभवत् ॥ ५ ॥ स[१४] चतुर्थीरसृजत; ताः सृष्टा [१२](मृत्युरत्स्यतो रूपेणाभ्येव पला)यत; ताः षड्ढोत्रा पर्यवैत्; ताः षड्ढोतारमुपापद्यन्त[१०] प्रजा[१३](अद्यमाना अमृतमेतच्च)त्वार्यङ्गानि द्वेधा व्याकृत आत्मा; स षड्ढोताऽभवत् ॥ ६ ॥ स

१. MHP समयान्, **infra** V.11.8; thus AO VI.108:230.15. २. MHP °विदमेवाध्व°; thus AO VI.108:230.16. ३. MHP अग्निः प्र°. ४. MHP °पतिं. ५. MHP मज्जा. ६. MHP °त्सरम्. ७–७. AO VI.110:233.14 om. ८. MHP abr. ९. MHP स्फीतं. १०. MHP °वापद्यन्त. ११. MHP अभ्यमाना. १२. MHP abr. १३. MHP abr. १४. MHP om.

पञ्चमीरसृजत; ताः सृष्टा, (मृत्युरत्स्यतो रूपेणाभ्येव पला)यत; ताः सप्तहोत्रा पर्यवैत्; ताः[२] सप्तहोतारमुपापद्यन्त[३] प्रजा अद्यमाना अमृतमेतच्चत्वार्यङ्गानि त्रेधा व्याकृत आत्मा; स सप्तहोताऽभवत् ॥ ७ ॥ स यो ह वा एवं वेद स एव यजमानं मृत्योः परित्रातुमर्हति; अथ य एवं न वेद नो हैव स यजमानं मृत्योः परित्रातुमर्हति; स यस्य हानेवंविदग्निञ्चिनुयात्[४] कामꣳ हैवैनं चिनुयात्; मृत्युना न्वा अयमध्वर्युर्यजमानस्य प्राणान् समयावीन्मरिष्यतीति, तथा हैव[५] स्यात्; तस्मादेवंविदमेवाध्वर्युमिच्छेत ॥ ८ ॥ [११] [इति सप्तमोऽनुवाकः]

इदं वा अन्वाहुर्— आग्नावैष्णवमेकादशकपालं दीक्षणीयं निर्वपति वैश्वानरं द्वादशकपालमादित्यञ्चरुमिति; इमामेव तदग्नौ प्रतिष्ठापयत्यस्यामग्निः प्रतितिष्ठति; स उ ह वा एष एवाग्निर्वैश्वानरो यत् पृथिवी, तस्यामादित्योऽस्तमेति ॥ १ ॥ अथातः सप्तहोतारं जुहोति द्वादशर्तून्; जागतो वै सप्तहोताऽष्टाचत्वारिꣳशत् ; चतुरुत्तराणि छन्दाꣳस्यृतवो वै छन्दाꣳस्यृतवः[६] संवत्सर, ऋतुष्वेव संवत्सरं[७] प्रतिष्ठाप्य संवत्सर उपर्यग्निश्चिनुत ऋतुषु प्रतितिष्ठन्तेऽस्य ह न काचनार्तिर्भवति न रिष्टिः; स ह न व्यथत एवंविदाऽध्वर्युणाऽग्निश्चीयमानः; तस्मादेवंविदमेवाध्वर्युमिच्छेत ॥ २ ॥ तदाहुर्- नान्यामिन्द्रप्रजापतिभ्यां पूर्वामाहुतिं जुहुयात्; तदु वा आहुर्जुहुयादेव; आघारौ वा इन्द्रप्रजापती, इन्द्रो वै सप्तहोता, संवत्सरः[८] प्रजापतिरेताभ्याꣳ ह्येतद्धूयते यद्यज्ञे क्रियते; तस्मान्नु ह जुहुयादेव ॥ ३ ॥ अथातस्त्रयस्त्रिꣳशद् यज्ञतनूर्जुहोति; आवपनं वा एतद् यज्ञस्य परीणद् यद्यज्ञतनुवः[९]; स यस्यैतास्वहुतास्वन्यत् कर्म कुर्वन्ति यथा शिथिलायां परीणह्यपरीणद्धायामावपेत्[१०], तत् परोप्येत परा वा सिच्येत तादृक् तत्; अथ यस्यैतासु हुतास्वन्यत् कर्म कुर्वन्ति यथा दृढायां परीणहि सुपरीणद्धायामावपेत्, तन्न परोप्येत[११] न परा[१२] सिच्येत, तादृक् तत्[१३]; तस्मान्नु ह जुहुयादेव ॥ ४ ॥ स **'प्रजापतिर्मनसा'** इति पुरस्तान्मनसा संकल्प्य[१४] वृतो वाचयति; **'अन्धोऽच्छेतः'** इति यतो यज्ञं परा पश्यति; **'धाता दीक्षायाम्'** इति दीक्षायाम् ॥ ५ ॥ [१२] [इत्यष्टमोऽनुवाकः]

१. MHP abr. सृष्टा॰ यत . २. M तोः. ३. MHP °वापद्यन्त. ४. MHP °विदन्निश्चि° ५. MHP हैवा. ६. MP °सृतपः. ७. MHP °वत्सरे ८. MHP °वत्सर. ९. AO VI.112:233.33 यज्ञस्य तन्वः; MHP यज्ञतन्वः. १०. MHP °णद्धायामावास्यामावपेत्; thus AO VI.112:234.1. ११. MHP परोच्येत. १२. MHP add वा after परा. १३. MHP om. १४. MHP संकत्वो.

'**सविता भृत्याम्**' इति भृत्याम् ; '**पूषा सोमक्रयण्याम्**' इति [सोमक्रयण्याम्][1]; '**वरुण उपनद्धः**' इति यत्रैनं मित्वोपनह्यति; '**असुरः**[2] **क्रीयमाणः**[3]' इति क्रीयमाणे, '**मित्रः क्रीतः**' इति क्रीते; '**शिपिविष्ट आसादितः**' इत्यासादिते; '**नरंधिषः प्रोह्यमाणः**' इति प्रोह्यमाणे; '**अधिपतिरागतः**' इत्यागते; '**प्रजापतिः प्रणीयमानः**' इति प्रणीयमाने; '**अग्निराग्नीध्रेः**' इत्याग्नीध्रे; '**बृहस्पतिराग्नीध्रात्प्रणीयमानः**' इत्याग्नीध्रादतिप्रयत्सु; '**इन्द्रो हविर्धानेः**' इति हविर्धाने; '**अदितिरासादितः**' इत्यासादिते; '**विष्णुरुपावह्रियमाणः**' इत्युपावह्रियमाणे; '**अथर्वोपोत्तः**' इत्युपोत्ते; **यमोऽभिषुतः**[4] इत्यभिषुते[4]; '**अपूतपा आधूयमानः**' इति यत्रैनमदो दशापवित्राभ्यामाधूनोति; '**वायुः**[5] **पूयमानः**' इति पूयमाने; '**मित्रः क्षीरश्रीः**' इति मैत्रावरुणपात्रे; '**मन्थी [सक्तुश्रीः**' इति मथ्यमाने; '**वैश्व]**[6]**देव उन्नीतः**' इत्युन्नीते; '**रुद्र आहुतः**' इत्याहुते; '**वायुरावृत्तः**' इत्यावृत्ते; '**नृचक्षाः प्रतिख्यातः**' इति प्रतिख्याते; '**भक्ष आगतः**' इत्यागते; '**पितृणां नाराशꣳसः**' इति नाराशꣳसे; '**असुरात्तः**' इत्यवभृथे समाप्ते; '**सिन्धुरवभृथमवप्रयन्**' इत्यवभृथे; ['**समुद्रोऽवगतः**' इत्यवगते; '**सलिलः]**[7] **प्रप्लुतः**' इति प्रप्लुते; '**सुवरुदृचं गतः**' इत्यवभृथादुदायत्सु; स यो ह वा एवं वेद स एव यज्ञस्य[8] [सं]प्रति ब्रह्मत्वमर्हति; अथ य एवं न वेद नो हैव स यज्ञस्य [सं][8]प्रति ब्रह्मत्वमर्हति; तस्मादेवंविदमेव ब्रह्माणं कुर्वीत॥ १॥ अथात उ[. . . .][9] स यानि नु ह भूतान्यान्धात् संवत्सरतयैव हास्य यज्ञविहितिमनु तानि जायन्ते; तं वेणुगा वि मिमीते॥ २॥ अथ यानि नु ह भूतानि रेतसः संभवन्त्येतामु हैवास्य यज्ञविहितिमनु तानि जायन्ते॥ ३॥ तमासन्दीं रोहयति; क्षत्रं वा [आसन्दी, बृहद्रथ][10]न्तरे पूर्वौ पादौ, शाक्वरं च रैवतं चावरौ पादौ; '**सुपर्णोऽसि गरुत्मान्**' इत्यग्निः; '**त्रिवृत्ते शिरः**' इतीमे लोकाः; '**गायत्रं चक्षुः**' इत्यसावादित्यः; '**स्तोम आत्मा**' इति प्राणो वै वायुः स्तोम आत्मा; प्राणो हैवास्यैष वायुः स्तोम आत्मा; '**साम ते** [11]**तनूर्वामदेव्यम्**' इति [12][तनूर्वाम]देव्यम्; '**बृहद्रथन्तरे पक्षौ**' इति द्यावापृथिवी; '**यज्ञायज्ञियं पुच्छम्**' इत्यृतवः; '**छन्दाꣳस्यङ्गानि**' इत्यङ्गानि; '**धिष्णियाः शफाः**' इति मासाः; '**यजूꣳषि नाम**' इति नाम; तस्मादेभिः[13]

१. MHP om. २. MHP असुराः. ३. MHP क्रीय°. ४. MHP °भिष्टुत. ५. MHP वायुं. ६. MHP broken. ७. MHP om. ८. MHP om. ९. MHP broken. १०. MHP broken. ११. MHP पूषा वाम°. १२. MHP broken. १३. MHP तस्मादभिः.

सामभिश्चीयमानो यजुर्भिरेवाख्यायते; यस्मादस्य यजूꣳषि नाम॥ ४॥ '**सुपर्णोऽ[सि] गरुत्मान् दिवं गच्छ सुवः पत**' इत्याह सुवर्गमेवैनं लोकं गमयति॥ ५॥ [१३] [इति नवमोऽनुवाकः]

[1]द्वादशपुरुषाग्निश्चीयत इत्याहुर्द्वादश मासाः संवत्सरः; [1]त्रयोदशपुरुषाग्निश्चीयत इत्याहुस्त्रयोदश मासाः संवत्सर इति॥ १॥ स उ ह वा एष ए त्रयोदशपुरुषोऽत्रो हैवैषोऽग्नेर्विमानमनुव्येति[2]॥ २॥ तेषां वा एतेषां द्वादशा पुरुषाणां द्वानवतिशतं कलाः संपद्यन्ते, नवतिशतमु ह वा अग्निष्टोमस्य स्तोत्रीया नो वा एकेनाक्षरेण न द्वाभ्यां छन्दःसंपद्[3क] वा मीयते,ऽत्रो हाग्निष्टोममेवाग्नि चित्याप्येत्यन्य उ च क्रतवः॥ ३॥ [१४] [इति दशमोऽनुवाकः]

उदपात्रमुपधायेमामुपदधातीमामेव तदप्सु प्रतिष्ठापयति; तस्मादु ह व इयमप्सु प्रतिष्ठिता॥ १॥ अथातः संभारानेव निवपन्ति; '**अग्नेर्भस्मासि**' इति भस निवपति[4]; '**अग्नेः पुरीषमसि**' इति पुरीषम् ; '**संज्ञानमसि कामधरणम्**' इ सिकताः; '**मयि ते कामधरणं**[5] **भूयाद्**' इत्यूषान्; होतॄन् व्याचष्टे; स यो ह व अग्नौ चीयमाने संभारान्[6] नानुसमागच्छत्यत्रो[7] हैवास्य सोऽपरुध्यते; तस्माद् यः यज्ञ एव संभारा व्याख्येयाः संभाराणामवरुध्यै॥ २॥ अग्निरमुं लोकमभ्याध्यायद् आदित्यो हैवेमं लोकम्; ते देवा एतौ लोकव्यत्यूढावपश्यन् लोकचित्यायै एकविꣳशी गार्हपत्यचितिश्चीयतेऽस्मिꣳल्लोक, आदित्यरूपꣳ सुपर्णस्यो हैव रू दिव्यग्निश्चीयते; ते देवा एतौ लोकावेव व्यत्यूढावजयन्नेवं[9], व्यत्यूढावु हैवैनं जयत्येवंविद्। इति न्वन्वाख्यानम्॥ ३॥ अथातः संपदेव; अष्टौ वा एता इष्टक उपधीयन्ते॥ ४॥ [१५]

अथा[10](तः संपदेव; अष्टौ वा एता इष्टका उपधीय)न्ते गार्हपत्यचित्यै; तास चतस्रो मध्ये त्रिष्टुग्भिर्, द्वे पुरस्तात् समीची अनुष्टुग्भ्यां, द्वे पश्चात्समीचं यजुर्भ्याम्; अष्टावक्षराणि यजुषोर्द्वात्रिꣳशदक्षराण्यनुष्टुप्, तस्यामेतान्यष्टावक्षराणि दधाति[11]; तानि वा एतानि चत्वारिꣳशत् संपद्यन्ते; चत्वारिꣳशदक्षरा पङ्क्तिरत्रो ह पाङ्क्तोऽग्निर्भवति॥ १॥ ता वा नव गायत्रियः संपद्यन्ते सहान्यतरयाऽनुष्टुभ

१. MHP °पुरुषा अग्नि°; AO VI.113:234.23 : °ष अग्नि°. २. MHP °विमामनुव्यैति thus Ao VI.113:234.26. ३. AO VI.113:234.28: स्तोत्रि°. ३क. MHP छन्दो°. ४. MHP निवत्प्. ५. MP धारणं. ६. MHP संभारो. ७. MHP नानुसमन्वाग°; AO VI.114: 235.5. ८. MHP °ध्यायाद्, AO VI.115:235.19: °मभ्याध्या°. ९. MHP °न्नेक AO VI.115:235.22: °न्नेव. १०. MHP abr. as अथा =न्ते. ११. Caland suggests उपदधाति AO VI.115:235 fn 2.

यजुर्भ्यां च; यत्रो वै नव गायत्रियः षट् ता बृहत्यः; त उ ह वा एत इम एवाभिपुरुषं प्राणा भवन्ति यद् बृहत्यः; वागेवैषा यदनुष्टुप् ; शीर्ष्ण एतद्रूपं यद् गार्हपत्यचितिः; अत्रो हैवास्यैषोऽर्को वाचि प्रतिष्ठितो भवत्यनुष्टुग्गीरित्येतस्यामेकविꣳश्यां गार्हपत्यचित्यामस्मिँल्लोक[१] आदित्यरूपे भान्ति च ज्वलन्ति च॥ २॥ [१६] [इत्येकादशोऽनुवाकः]

अथातः सीरलाङ्गलꣳ सꣳसृजति[२]; गन्धर्वा एवैते यदनड्वाहोऽप्सरस एवैता यत् सीताः; ते वा एते गन्धर्वा अप्सरस एवान्नं जनयन्त्यन्नाद् वा अशितान्मनो जायते, मनसोऽधि रेतः सिच्यते, रेतसः[३] सर्वाणि भूतानि जायन्ते; तद् वा एतत् सर्वेषां भूतानां प्रजननस्य रूपम्; प्र हैव प्रजया पशुभिर्मिथुनैर्जायते य एवं वेद॥१॥ उदपात्रमुपनिधायामूमुपदधात्यमूमेव[४] तदप्सु प्रतिष्ठापयति; तस्मादु ह वा असावप्सु प्रतिष्ठिता; चारेपा[५] ह्येतामभ्राणि लेलायन्ति॥ २॥ तस्यामुपरि घर्मेष्टकामुपदधाति; असौ वा आदित्यो घर्म आदित्यमेव तद् दिव्यध्यूहति, दिवि[६] प्रतिष्ठापयति; तस्मादु ह वा असावादित्यो दिव्यध्यूढो दिवि प्रतिष्ठितः॥ ३॥ तां दध्ना संपूर्योपदध्यात् ; ऊर्ग्वै [७]दध्यूर्ग् वै पशव ऊर्जैवास्मा[७] ऊर्जं पशूनवरुन्धे; तस्मान्नु हैनां[८] दध्नैव संपूर्योपदध्यात्॥ ४॥ स्वयमातृण्णाकाले दशहोतारमुपदधाति; स उ ह वा एष एव यजमानो यद् दशहोता, सुवर्गो लोकः स्वयमातृण्णा; यत्[९] स्वयमातृण्णाकाले दशहोतारमुप दधाति यजमानमेव तत् सुवर्गे[१०] लोके स्वयमातृण्णायामादधाति॥ ५॥ दर्भस्तम्बमुपधाय व्याघार्यावोक्ष्य सर्वौषधं वपन्ति, यजमानमेव तन्मृत्युमतिनीयान्नमेवास्मा[११] एतदुपरिष्टादुपोहति[१२]॥ ६॥ [१७] [इति द्वादशोऽनुवाकः]

आपो ह वा दशहोता यच्च छन्दो या विभक्तिरेतस्यै चित्यै; तस्मिन्नन्तरेषा प्रथमा चितिश्चीयते; छन्दस्येतस्मिन् वर्मण्यप्सु[१३] प्रतिष्ठिता; सा[१४] ह न व्यथते; स एष कोश एतस्यै चित्यै; निधिꣳ हैव[१५] निधत्ते यजमान एतस्यां देवतायामन्तः; एतस्याꣳ हास्यापि देवतायां भवति य एवं वेद॥ १॥ अग्निर्ह वाव चतुर्हो[ता][१६]

१. MHP °चित्या अ°; thus AO VI.115:236.2. २. AO VI. 116 : 237.2 °सृजन्ति. ३. MHP रेतः; thus AO VI. 116:237.5. ४. MHP °धायामुमुपदधात्यमुमेव; thus AO VI.117:137.17. ५. MHP चारेण; thus AO VI.117:237.18. ६. MHP add प्रतीची after दिवि which Caland takes as superfluous AO VI.117:237 fn 3. ७-७. MHP दध्यूर्क्कः पशव ऊर्जावास्मा; thus AO VI.117:237.23. ८. MHP हैनं; thus conjectured AO VI.117:237 fn 4. ९. MHP य; thus AO VI.117:237.26. १०. MHP सुवर्गो. ११. MHP एवात्मा; thus AO VI.117:237.29. १२. MHP °रिष्टापोह°; thus AO **ibid**. १३. MHP वमुज्वप्सु. १४. MHP या. १५. MHP नैव. १६. MHP om.

यच्च छन्दो या विभक्तिरेतस्यै चित्यै; तस्मिन्नन्तरेषा द्वितीया[१] चितिश्चीयते छन्दस्येतस्मिन् वर्मण्यग्नौ प्रतिष्ठिता; सा ह न व्यथते; स एष कोश एतस्यै चित्यै; निधिꣳ[२] हैव तन्निधत्ते यजमान एतस्यां देवतायामन्तः; एतस्याꣳ हास्यापि देवतायां भवति य एवं वेद॥ २॥ वायुर्ह वाव पञ्चहोता यच्च छन्दो या विभक्तिरेतस्यै चित्यै[३]; तस्मिन्नन्तरेषा तृतीया चितिश्चीयते छन्दस्येतस्मिन् वर्मणि वायौ प्रतिष्ठिता; सा ह न व्यथते; स एष [४](कोश एतस्यै चित्यै; निधिꣳ हैव तन्निधत्ते यजमान एतस्यां देवतायामन्तः; एतस्याꣳ हास्यापि देवतायां भवति य ए)वं वेद॥ ३॥ चन्द्रमा ह वाव षड्ढोता यच्च छन्दो [५](या विभक्तिरेतस्यै चित्यै; तस्मिन्न)न्तरेषा चतुर्थी चितिश्चीयते छन्दस्येतस्मिन् वर्मणि चन्द्रमसि प्रतिष्ठिता; सा ह न व्यथते; [६](स एष कोश एतस्यै चित्यै; निधिꣳ हैव तन्निधत्ते यजमान एतस्यां देवतायामन्तः; एतस्याꣳ हास्यापि देवतायां भवति य) एवं वेद॥ ४॥ आदित्यो ह वाव सप्तहोता यच्च छन्दो ये विभक्ती एतयोश्चित्योः; तस्मिन्नन्तरेते [७][पञ्चमी]षष्ठ्यौ चिती चीयेते छन्दस्येतस्मिन् वर्मण्यादित्ये प्रतिष्ठिते; ते ह न व्यथेते[८]; स एष कोश एतयोश्चित्योः; निधिꣳ हैव तन्निधत्ते यजमान एतस्यां [९](देवतायामन्तः; एतस्याꣳ हास्यापि देवतायां भवति य) एवं वेद॥ ५॥ स यथा ह वा इदमन्तः सम[.....[१०]च]ब्वाꣳ सुवर्णं[११] निहितꣳ स्यात् कोशे वैवं ह वा एवंविदाऽध्वर्युणाऽग्निश्चीयमानो[१२]ऽन्तरेतासु देवतासु[१३] निहितो भवति; तस्य ह न काचनार्तिर्भवति न रिष्टिः[१४]; तस्मादेवंविदमेवाध्वर्युमिच्छेत॥ ६॥ [१८] [इति त्रयोदशोऽनुवाकः]

तदाहुः- कथꣳ [१५]संयानीषूपहितासु पाङ्क्तोऽग्निर्भवति[१५], कथं पङ्क्तिमभिसंपद्यत इति; अष्टावष्टौ संयानीरुपधीयन्ते पञ्चसु चितिषु[१६]; ता वा एताश्चत्वारिꣳशत् संपद्यन्ते, चत्वारिꣳशदक्षरा पङ्क्तिः; एवं नु ह संयानीषूपहितासु पाङ्क्तोऽग्निर्भवत्येवमु ह पङ्क्तिमभिसंपद्यते॥ १॥ [१९] [इति चतुर्दशोऽनुवाकः]

तदाहुः- कथं शीर्षण्यासूपहितासु त्रिवृत् त्रैष्टुभोऽग्निर्भवति, कथं त्रिष्टुभमभिसंपद्यत इति; नवनव[१७] शीर्षण्या उपधीयन्ते पञ्चसु चितिषु; ता वा एताः पञ्चचत्वारिꣳशत् संपद्यन्ते; तासां या पञ्चचत्वारिꣳशी यजमान एव सः; चतुश्चत्वारिꣳशत् संपद्यन्ते, चतुश्चत्वारिꣳशदक्षरा त्रिष्टुक् ; एवं नु ह

१. MHP °मिति. २. MHP निधी. ३. MHP om. ४. MHP abr. ५. MHP abr. ६. MHP abr. ७. MHP om. ८. MHP व्यथते. ९. MHP abr. १०. MHP broken. ११. MHP सुपर्णं. १२. MHP °श्चित्ययमानो. १३. P om. १४. P रिष्ट°. १५-१५. MHP संयानी आपहिता सुपर्णोऽग्नि°. १६. MHP वितिष्ठ. १७. M नव thrice

शीर्षण्यासूपहितासु त्रिवृत् त्रैष्टुभोऽग्निर्भवत्येवमु ह त्रिष्टुभमभिसंपद्यते ॥ १ ॥ [२०]
[इति पञ्चदशोऽनुवाकः]

तदाहुः- कथं योनिषूपहितासु[१] गायत्रोऽग्निर्भवति, कथं गायत्रीमभिसंपद्यत इति; द्वादशद्वादश योनीरुपधीयन्ते षट्सु चितिषु; ता वा एता द्वासप्ततिः संपद्यन्ते, तास्तिस्रो गायत्रियः; एवं नु ह योनिषूपहितासु गायत्रोऽग्निर्भवत्येवमु ह गायत्रीमभिसंपद्यते ॥ १ ॥ तदाहुः- कथं बार्हतोऽग्निर्भवतीति; यत्रो वै तिस्रो गायत्रियस्ते द्वे बृहत्यौ[२]; एवं[२] नु ह बार्हतोऽग्निर्भवति; अयꣳ हैव स लोकान्यतरा बृहत्यसावु हैव स लोकान्यतरा बृहती, द्विपादु यजमानोऽत्रो ह यजमानो ना[ना]श[३] एवानयोर्लोकयोः प्रतितिष्ठति ॥ २ ॥ [२१] [इति षोडशोऽनुवाकः]

तदाहुः- कथं त्रिभिर्वेदैश्चीयमानो गायत्रोऽग्निर्भवति, कथं गायत्रीमभिसंपद्यत इति; **'ऋचः'** इति द्वे अक्षरे, **'यजूꣳषि'** इति त्रीणि, **'सामानि'** इति त्रीणि; तानि वा एतान्यष्टौ संपद्यन्तेऽष्टाक्षरा गायत्री; एवं नु ह त्रिभिर्वेदैश्चीयमानो गायत्रोऽग्निर्भवत्येवमु ह गायत्रीमभिसंपद्यते ॥ १ ॥ [२२] [इति सप्तदशोऽनुवाकः]

इयꣳ ह वाव प्रथमा स्वयमातृण्णा; तस्याꣳ हिरण्येष्टकोपधीयते[४]; अग्निर्हैवास्यै स ज्योतिः ॥ १ ॥ अन्तरिक्षं द्वितीया स्वयमातृण्णा; तस्याꣳ हिरण्येष्टकोपधीयते; वायुर्हैवास्यै स ज्योतिः ॥ २ ॥ द्यौस्तृतीया [स्वयमातृण्णा][५]; तस्याꣳ हिरण्येष्टकोपधीयते; आदित्यो हैवास्यै[६] स ज्योतिः ॥ ३ ॥ तद्वा इदमन्वाहुः- स्वयमातृण्णा उपधाय हिरण्येष्टका [७](उपदधाति; इमे वै लोकाः स्वयमातृण्णा ज्योतिर्हिरण्यम्; यत् स्वयमातृण्णा उपधाय हिरण्येष्टका उपदधातीमानेवैताभिर्लोकान्)ज्योतितिष्मतः कुरुत इति ॥ ४ ॥ तासां वा एतासां[८] तिसृणाꣳ स्वयमातृण्णानां द्वे प्रथमे उपोह्येते; स यानि नु ह [भूतान्यनुपोप्तप्राणानि जीवन्ति यद् मृद् यच्छर्करा यदापो यदोषधयो यद्][९] वनस्पतय एते न्वेव ह तेषां भूतानां प्रथमे स्वयमातृण्णे प्राणान् कल्पयतः अथ यानि नु ह भूतान्युपोप्तप्राणानि जीवन्ति यत् पुरुषाः यदश्वा यद् गावो यदजावय, एषा ह्येवैतेषां भूतानामुत्तमा स्वयमातृण्णा प्राणान् कल्प[यत्येषा ह्येवैतेषां भूता][१०]नामुत्तमा स्वयमातृण्णा प्राणान् कल्पयति[११] ॥ ५ ॥ [२३] [इत्यष्टादशोऽनुवाकः]

१. MHP योऽग्निषूप°. २-२. MHP बृहत्योवेवं. ३. MHP नाश. ४. MHP °ष्टकोऽवधीयते. ५. MHP broken. ६. MHP हावास्यै. ७. MHP abr. cf TS V.7.6.7. ८. MHP एतां. ९. MHP broken; cf **infra** V.24.2. १०. MHP broken. ११. MHP कत्वयति.

इदं वा अन्वाहुर्- इयं वा अग्निः पञ्चेष्टकः; तस्मा[१](द्यदस्यां खनन्त्यभीष्टकां तृन्द)न्त्यभि शर्करामिति ॥ १ ॥ तदाहुः- कतमास्ताः पञ्चेष्टका इति; मृदेव प्रथमा शर्करा द्वितीयाऽऽपस्तृतीयौषधयश्चतुर्थी वनस्पतयः पञ्चमी ॥ २ ॥ [२][तदाहुः- कतमास्ताः पञ्चेष्ट]का इति; पुरुष एव प्रथमाऽश्वो[३] द्वितीया गौस्तृतीयाऽविश्चतुर्थ्यजः पञ्चमी; स यन्वेव[४] हास्यां पुरुषः प्रमीयते, तन्वेव[५] हास्यां पुरुष उपधीयते; अथ [६]यदस्यामश्वः प्रमीयते, तदु हैवास्यामश्व उपधीयते; अथ यदस्यां गौः प्रमीयते, तदु हैवास्यां [७][गौरुपधीयते; अथ यदस्यामविः प्रमी-]यते, तदु हैवास्यामविरुपधीयते; अथ यदस्यामजः प्रमीयते, तदु हैवास्यामज उपधीयते ॥ ३ ॥ तं वा एतं दशेष्टकं प्रजापतिरग्निं चिनुते चितिभिः सꣳस्थापयन्; यदो ह वा एतं दशेष्टकं प्रजापतिरग्निं चिनुते चितिभिः सꣳस्थापयिता, सर्वा एव तदा प्रजा अमृता भवितारो न मृत्युकतीः ॥ ४ ॥ तदाहुः- कतीष्टका अग्निः संचितः संपद्यत इति; द्वे ह वावेष्टके अग्निः संचितः संपद्यत एकेतराश्चतस्र एकैवेतराश्चतस्रः ॥ ५ ॥ तदाहुः- कत्येवेष्टका अग्निः संचितः संपद्यत इति; एका ह वावेष्टकाग्निः संचितः संपद्यत इध्म एव; इध्मे ह्येवैता आहुतयः प्रतितिष्ठन्ति; स उ ह वा एष आदित्य एव भवति यदिध्मः; सो ह वा एषा सत्याशीर्नामेष्टका यदादित्यः; तामौषसꣳ सर्वाणि भूतानि कामयन्त उदियादिति; सैषा सत्याशीर्भवति; न ह्येतस्यानुदयनमस्त्यपि ह्येषोपरिषूदयतैव; स यो ह वा एवमेतां सत्याशिषमिष्टकां वेद सत्या हैवास्याशीर्भवति देवेषु पितृषु च ॥ ६ ॥ [२४] [इत्येकोनविंशोऽनुवाकः]

इदं वा अन्वाहुर्- **'अयं पुरो भुवः'** इत्यसावु हैवैष आदित्यः; **'तस्य प्राणो भौवायनः'** इति प्राणो हैवैषः; **'वसन्तः प्राणायनः'** इत्यृतुर्हैवैषः; **'गायत्री वासन्ती'** इति प्राच्यु हैषा दिक्; **'गायत्रियै गायत्रम्'** इत्यन्नमु[८] हैवैतत्; **'गायत्रादुपाꣳशुः'** इत्ययꣳ हैवैष लोकः; **'उपाꣳशोस्त्रिवृत्'** इत्यग्निर्हैवैषः; **'त्रिवृतो रथन्तरम्'** इति सामो[८क] हैवैतत्; **'रथन्तराद् वसिष्ठ ऋषिः'** इत्यसावु हैवैष आदित्यः; **'प्रजापतिगृहीतया त्वया[९] प्राणं गृह्णामि प्रजाभ्यः'** इत्यन्नं वै प्राणो यज्ञः प्रजापतिः; तस्मादुतैतदशनायतः[१०] प्राणोऽवतरामिव[११] क्रामति; यज्ञगृहीतया त्वया प्राणं गृह्णामि[१२] प्रजाभ्य इति वावैतदाह ॥ १ ॥ **'अयं दक्षिणा**

१. MHP abr; cf TS V.6.4.11. २. MHP broken ३. MHP °माश्चो. ४. MHP यन्वेव. ५. MHP तन्वेव. ६. MHP यास्या°. ७. MHP broken. ८. H °मितित्यन्नमु. ८क. MHP सोमो. ९. MHP या. १०. M °यतं. ११. MHP °प्राणोपतरा°. १२. MHP गृह्णाति.

विश्वकर्मा' इत्यसावु हैवैष आदित्यः; '**तस्य मनो वैश्वकर्मणम्**' इति मनो हैवैतत्; '**ग्रीष्मो मानसः**' इत्यृतुर्हैवैषः[1]; '**त्रिष्टुग्ग्रैष्मी**' इति दक्षिणो हैवैषा[2] दिक्; '**त्रिष्टुभ ऐडम्**' इत्यन्तरिक्षमु हैवैतत्; '**ऐडादन्तर्यामः**[3]' इति वायुर्हैवैषः; '**अन्तर्यामात्पञ्चदशः**' इतीन्द्रो हैवैषः; '**पञ्चदशाद् बृहत्**' इति सामो हैवैतत्; '**बृहतो भरद्वाज ऋषिः**' इत्यसावु हैवैष आदित्यः; '**प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः**'[4] इत्यन्नं वै मनो यज्ञः प्रजापतिः; तस्मादुतैतदशनायतो मनोऽवतरामिव क्रामति; यज्ञगृहीतया[5] त्वया मनो गृह्णामि प्रजाभ्य इति वावैतदाह ॥ २ ॥ '**अयं पश्चाद्विश्वव्यचाः**' इत्यसावु हैवैष आदित्यः; '**तस्य चक्षुर्वैश्वव्यचसम्**' इति चक्षुर्हैवैतत्; '**वर्षाणि चाक्षुषाणि**' इत्यृतुर्हैवैषः; '**जगती वार्षी**' इति प्रतीच्यु हैवैषा दिक्[6]; '**जगत्या ऋक्षमम्**' इत्यृक्सामे उ हैवैते; '**ऋक्षमाच्छुक्रः**' इत्यसावु हैवैष आदित्यः; '**शुक्रात् सप्तदशः**' इति प्रजापतिर्हैवैषः; '**सप्तदशाद्वैरूपम्**' इति सामो हैवैतत्; '**वैरूपाद्विश्वामित्र ऋषिः**' इत्यसावु हैवैष आदित्यः; '**प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः**' इत्यन्नं वै चक्षुर्यज्ञः प्रजापतिः; तस्मादुतैतदशनायतश्चक्षुरवतरामिव[7] क्रामति; यज्ञगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्य इति वावैतदाह ॥ ३ ॥ '**इदमुत्तरात्सुवः**' इत्यसावु हैवैष आदित्यः ॥ ४ ॥ [२५]

'**इदमुत्तरात्सुवः**' इत्यसावु हैवैष आदित्यः; '**तस्य श्रोत्रꣳ सौवम्**' इति श्रोत्रमु[8] हैवैतत्; '**शरच्छ्रौत्री**'[9] इत्यृतुर्हैवैषः; '**अनुष्टुप्च्छारदी**' इत्युदीच्यु हैवैषा दिक्; '**अनुष्टुभः स्वारम्**' इति सामो हैवैतत्; '**स्वारान्मन्थी**' इति चन्द्रमा उ हैवैषः; '**मन्थिन एकविꣳशः**' इत्यसावु हैवैष आदित्यः; ['**एकविꣳशाद्वैराजम्**' इति सामो हैवैतत्; '**वैराजाज्जमदग्निर्ऋषिः**' इत्यसावु हैवैष आदित्यः][10]; '**प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः**' इत्यन्नं वै श्रोत्रं यज्ञः प्रजापतिः; तस्मादुतैतदशनायतः श्रोत्रमवतरामिव क्रामति; यज्ञगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्य इति वावैतदाह ॥ १ ॥ [11]'**इयमुपरि मतिः**' इत्यसावु हैवैष आदित्यः; '**तस्यै वाङ्माती**' इति वागु हैवैषा; '**हेमन्तो वाच्यायनः**' इत्यृतुर्हैवैषः; '**पङ्क्तिर्हैमन्ती**' इत्यूर्ध्वो हैवैषा[12] दिक्; '**पङ्क्त्यै**[13] **निधनवत्**' इति निधनमु हैवैतद्यत्किञ्च

१. MHP °तू हैवेष. २. MHP एवैषा. ३. MHP °तदेडोदन्त°. ४. MHP प्राजापत्य ५. MHP °गृहीता. ६. MHP दि. ७. MHP °रपतरा°. ८. MHP ज्ञोमु. ९. MHP °च्चछ्रोत्रो. १०. MHP om. ११. MHP अयमु°. १२. MHP एवैषा. १३. MP पयज्ये, H यमज्ये.

निधीयते; '**निधनवत आग्रयणः**' इति नाकस्यो हैवैतत्पृष्ठम्; '**आग्रयणात् त्रिणवत्रयस्त्रिꣳशौ**' इति ब्रध्नस्यो हैवैतद्विष्टपम्; '**त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवते**[1]' इति सामनी उ हैवैते; '**शाक्वररैवताभ्यां विश्वकर्मर्षिः**'[2] इत्यसावु हैवैष आदित्यः; '**प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः**' इत्यन्नं वै वाग् यज्ञः प्रजापतिः; तस्मादुतैतदशनायतो वागवतरामिव क्रामति; यज्ञगृहीतया त्वया वाचं गृह्णामि प्रजाभ्य इति वावैतदाह ॥ २ ॥ तद्वा एतं पञ्चाशतं [3]प्राणभृतामन्वाख्यानम्; एतद्वै पञ्चाशदपानभृतामन्वाख्यानम्; ता वा एता दश च विराजः संपद्यन्त एका च गायत्री; दशाक्षरा विराडन्नं विराड् विराजमेव तदन्नाद्यमृत्विजो यज्ञमुखे यजमानायापि दधति; एका गायत्र्युदेति; प्लवमेवैतां गायत्रꣳ सुवर्गं [4]लोकमभ्येत्यमुमादित्यम् ; एतस्यै[4क] देवतायै सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ३ ॥ [२६] [इति विंशोऽनुवाकः]

इदं वा अन्वाहुः- '**एकयाऽस्तुवत**' इति तदेका बृहती भवति; '**तिसृभिरस्तुवत त्रयस्त्रिꣳशताऽस्तुवत' इति**' तदेका बृहती भवति; **पञ्चभिरस्तुवतैकत्रिꣳशताऽस्तुवत**' इति तदेका बृहती भवति; **सप्तभिरस्तुवत नवविꣳशत्याऽस्तुवत**' इति तदेका बृहती भवति; **नवभिरस्तुवत सप्तविꣳशत्याऽस्तुवत** इति तदेका बृहती भवति; **एकादशभिरस्तुवत पञ्चविꣳशत्याऽस्तुवत**' इति तदेका बृहती भवति; **त्रयोदशभिरस्तुवत त्रयोविꣳशत्याऽस्तुवत**' इति तदेका बृहती भवति; **पञ्चदशभिरस्तुवतैकविꣳशत्याऽस्तुवत**' इति तदेका बृहती भवति; **सप्तदशभिरस्तुवत नवदशभिरस्तुवत**' इति तदेका बृहती भवति; ता वा एता अष्टौ बृहत्यः संपद्यन्त एका च स्तोत्रीयाऽतिरिच्यते; यैका स्तोत्रीयाऽतिरिच्यते यजमान एव सः ; सप्तदशो वै वाजपेयः[5] ॥ १ ॥ [२७] [इत्येकविंशोऽनुवाकः]

यज[6](मान एव सः; सप्तदशो वै वाजपेय; वाजपेय)स्य सप्तदशानि स्तोत्राणि; सप्तदशानाꣳ स्तोत्राणामेकꣳ स्तोत्रमुदूहति; अथेतराः षोडश स्तोत्रीया द्वे द्वे स्तोत्रे चतुस्त्रिꣳशत उवेवोदूहति[7] द्वे द्वे चतुस्त्रिꣳशे; ता वा एता अष्टौ वैव बृहत्यः संपद्यन्त, एका च स्तोत्रीयाऽतिरिच्यते; यैका स्तोत्रीयाऽतिरिच्यते यजमान एव सः[8]; तासां वा एतासामष्टानां बृहतीनां द्वात्रिꣳशत्

१. MHP °रैवत. २. MHP °कर्मणि. ३. MHP °भृतमन्वा°. ४. MHP °भ्येत्येत्यमुमा°. ४क. MHP ऋतस्यै. ५. MHP °पेयस्य. ६. MHP abr. ७. MHP उवेवाहति. ८. MHP om.

त्रिवृत्स्तोमाः[1] संपद्यन्ते; द्वात्रिंशदक्षरानुष्टुगनुष्टुभा[2] उ वै होतारोऽत्रो हर्तूनेवाग्निचित्याऽभि[3]संपद्यते॥ १॥ [२८] [इति द्वाविंशोऽनुवाकः]

इदं वा अन्वाहुर्- एकयाऽस्तुवत तिसृभिरस्तुवतेति; एवमेवैता सृष्टा [3क]या उद्यन्त्यस्त्रयस्त्रिंशत्[3क], ता वा एता अष्टौ बृहत्यः संपद्यन्त एका च स्तोत्रीयाऽतिरिच्यते; यैका स्तोत्रीयाऽतिरिच्यते यजमान एव सः; सप्तदशो वै [वाजपेयः][4]; वाजपेयस्य सप्तदशानि स्तोत्राणि॥ १॥ य एवंविद्वानग्निं चिनुते यस्यैवंविद्वानग्निं चिनोत्युभावेव लोकावभिजयति यश्चाग्निचितो यश्च वाजपेययाजिनः; अथ य एवंविद्वान् वाजपेयेन यजेत उभावेव लोकावभिजयति यश्च वाजपेययाजिनो यश्चाग्निचितः॥ २॥ [२९] [इति त्रयोविंशोऽनुवाकः]

इदं वा अन्वाहुर्- **'अयं पुरो हरिकेशः [सूर्यरश्मिः]**[5] इत्यादित्यो हैवैष राजा; **'तस्य रथगृत्सश्च रथौजाश्च[6] सेनानिग्रामण्यौ'**[7] इति वासन्तिका उ हैवैतौ मासौ; **'पुञ्जिक[8](स्थला च कृतस्थला चा)प्सरसौ'** इत्युर्वैव पुञ्जिकस्थलाऽन्नं कृतस्थला; **'यातुधाना हेतिः'** इति श्रोत्रिया उ ह वै यातुधाना हेतिः; एते ह्येतं यातुं रक्षन्ति यद् ब्रह्म; **'रक्षांसि प्रहेतिः'** इति ब्रह्मचारिण उ हैवानुब्रुवाणा रक्षांसि प्रहेतिः; तस्माद् ब्रह्मचारिणं पल्ययमानमाहू रक्षांसि ब्रह्मणो गोकुलं चरन्तीति; **'तेभ्यो नम[9](स्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे) दधामि'** इति यं चैव द्वेष्टि यश्चैनं द्वेष्टि तमेषां जम्भे दधाति॥ १॥ **'अयं दक्षिणा विश्वकर्मा'** इति यमो हैवैष राजा; **'तस्य रथस्वन[10](श्च रथोचित्रश्च सेनानिग्रा)मण्यौ'** इति ग्रैष्मा उ हैवैतौ मासौ; **'मेनका[11] (च सहजन्या चाप्सर)सौ'** इति सभैव मेनका समितिः सहजन्या; **'दङ्क्ष्णवः[12] [पशवो][13] हेतिः'** इति [ब्राह्मणाः][14]; **'पौरुषेयो वधः[15] प्रहेतिः'**, इति राजानः; **'तेभ्यो नमः'** इति समानम्॥ २॥ **'अयं पश्चाद्विश्वव्यचाः'** इति सोमो हैवैष राजा; **'तस्य रथप्रोत[16](श्चासमरथश्च सेनानिग्रा)मण्यौ'** इति वार्षिका उ हैवैतौ मासौ;

१. MHP °वृत् थ्सोमाः २. MHP °ष्टुगानुष्टु°. ३. MHP °वाग्निंचित्या°. ३क-३क. MHP य उद्यन्त्यात्र°. ४. MHP om. ५. MHP. om. ६. MHP रथोजा°. ७. MHP ग्रामिण्यौ. ८. MHP abr. cf TS IV.4.3.1; MHP माञ्जिक° for पुञ्जिक°. ९. MHP abr. cf TS IV.4.3.5. १०. MHP abr. cf TS IV.4.3.2. ११. MHP abr.cf ibid. १२. MHP दक्ष्णेव. १३. MHP broken. १४. MHP broken. १८. MHP वधं. १६. MHP abr. cf TS IV.4.3.3

'प्रम्लो[1](चन्ती चानुम्लोचन्ती चाप्सर)सौ' इत्यहरेव प्रम्लोचन्ती रात्रिरनुम्लोचन्ती[2]; **'सर्पा[3] हेतिः'** इति ब्राह्मणाः; **"व्याघ्राः प्रहेतिः"** इति राजानः; **तेभ्यो नमः** इति समानम्॥ ३॥ **"अयमुत्तरात्[4] संयद्वसुः"** इति वरुणो हैवैष राजा; **"तस्य सेन[5](जिच्च सुषेणश्च सेनानि)ग्रामण्यौ"** इति शारदा उ हैवैतौ मासौ; **"विश्वाची [6](च घृताची चाप्सर)सौ"** इति सभैव विश्वाची [7][समितिर्घृताची; **"आपो हेतिः'** इति ब्राह्मणाः; **'वातः प्रहेतिः'** इति राजानः; **'तेभ्यो नमः'**] इति समानम्॥ ४॥ **"अयमुपर्यर्वाग्वसुः"** इति बृह][8]स्पति[हैं][9]वैष राजा; **"तस्य तार्क्ष्य[10][श्चारिष्टनेमिश्च सेनानिग्रा]मण्यौ"** इति हैमन्तिका उ हैवैतौ मासौ; **"उर्वशी [11][च पूर्वचित्तिश्चाप्सर]सौ"** इति वागेवोर्वशी[12] मनः पूर्वचित्तिः; **"विद्युद्धेतिः[13]** इति ब्राह्मणाः; **"अवस्फूर्जन्[14] प्रहेतिः"** इति [15][राजानः; **"तेभ्यो नम[स्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि"** इति यं चैव द्वेष्टि यश्चैनं द्वेष्टि तमेषां] जम्भे दधाति॥ ५॥ [16]ता वा[16] एताः पञ्चविंशतिः पञ्चचोडा उपधीयन्ते; एकां पुरस्तादुपदधाति चोडा इतराश्चतस्र, [एकां दक्षिण-तश्चोडा इतराश्चतस्र, एकां पश्चाच्चोडा इतराश्चतस्र][17], एकामुत्तरतश्चोडा, इतराश्चतस्रस्तद्या एकां मध्ये चोडा [इतराश्चतस्र][17क] इति [18][पञ्च]विंशत्यै पञ्चचोडानामन्वाख्यानम्; अप्सरसो हैवास्यैताभूता अमुष्मिँल्लोके जाया भवन्ति; तामु हैवास्य कामचारो भवति य एवं वेद॥ ६॥ [३०] [इति चतुर्विंशोऽनुवाकः]

इदं वा अन्वाहुः— **'प्रोथदश्वो न यवसे अविष्यन्'** इत्यसौ हैवैष आदित्यः; **'यदा महः संवर(णाद् व्य)[19]स्थात्'** इत्यहर्ह वै महः संवरणं रात्रिस्तस्मिन्नेषा देवता विक्रमते यदस्मिन्नुदेति; **'आदस्य वातो अनुवाति शोचिः'** इति प्राणो वै वायुः शान्तिः शोचिर्नानुवायात्तेन सर्वाणि भूतानि प्रदहेत्; स यद्ध वा अस्यैषा देवता ब्रह्मैतद्वायुः शान्तिः शोचिरनुवाति तेन सर्वाणि भूतानि प्रदहति; **'अध स्म ते व्रजनं**

१. MHP abr. cf TS IV. 4.3.3. २. MHP °चन्तीरेव; Mss show the sign of broken text thereafter. ३. MHP सर्वा. ४. MHP इदमुत्त°. ५. MHP abr, cf TS IV.4.3.4. ६. MHP abr, cf. TS IV. 4.3.4. ७. MHP broken. ८. MHP broken, cf TS IV.4.3.5. ९. MHP broken thereafter and before वैष add न. १०. MHP abr. cf TS IV.4.3.5. ११. MHP abr, cf. TS IV. 4.3.5. १२. MHP वागेवोशी. १३. MHP वित्युद्धेति°. १४. MHP अवस्सूर्जन्. १५. MHP broken, cf TS IV.4.3.5. १६-१६. MHP twice. १७. MHP om. १७क. MHP om. १८. MHP om. १९. MHP broken between संवर [MHP संवत्सर] and स्थाद्.

कृष्णमस्ति' इति स यदु हैवैतस्मिन्नस्तमिते रात्रिः कृष्णेवेयमा[गच्छ][१]ति तदु ह वा अस्यैतद् व्रजनं कृष्णम्॥ १॥ तद्वा इदमन्वाहुर् नान्या[२][मुत्तरा]मिष्टका[मुप][३]दध्यादिति; ते उ ह वा अस्यैते स्वयमातृण्णा चैव विकर्णी चोत्तमे इष्टकानामुपधीयेते; तस्मान्नान्योत्तरेष्टकोपधेया॥ २॥ [३१] [इति पञ्चविंशोऽनुवाकः]

वाचो ह वा राशिर्यदग्निः संचितः; स या उ हैवैताः प्रजापतिः प्रथमा व्याहृतीर्व्याजहार '**भूर्भुवः सुवः**' इति पञ्चैतान्यक्षराणि पञ्चैताश्चितयः; आत्मनैव षष्ठी चितिरभवद्, वागेव कुर्यात्; [३क]अग्निर्ह वा एतद्रूपं यद्वाचः[३ख], कद एवैतद्रूपं यत्[४] स्त्रिया, अथ हैतन्मनसो रूपं, यत्पुꣳस आदित्यस्य रूपम्[५]; तस्मिन्वा एतस्मिन्नग्नौ संचित आदित्योऽस्तमेति; यमस्मिन्नेतꣳ संचितेऽग्नाविध्मं प्रहरन्ति; स तत ऊर्ध्वो धूम उदेति, सोऽन्तरिक्षं गच्छति; तदु हैवान्तरिक्षे संभवति; स तत ऊर्ध्वो धूम उदेति, स[६] दिवं गच्छति; तद्वा एतत् सर्वेषां भूतानां प्रजननस्य रूपम्; प्र हैव प्रजया पशुभिर्मिथुनैर्जायते य एवं वेद॥ १॥ [३२] [इति षड्विंशोऽनुवाकः]

कदो ह वा एतद्रूपं यत् स्त्रिया, अथ हैतन्मनसो रूपं, यत्पुꣳस आ(दित्यस्य)[६क] रूपम्; तेन वा एतौ मिथुनौ संभवतः; तस्यामेतद् द्वेधा [विभक्तं शुक्लं][७] रेतोऽनुसरति; प्र [८]हैवान्यतरच्छुक्लं रेतो भवति, स्तना उ हैवान्यतरच्छुक्लं रेतो गच्छति; तदु हैव क्षीरं भवति; तदु हैव जातो धातुं धयते; तस्माद्या विजायते तस्या एव क्षीरं भवति; सा ह्येतच्छुक्लꣳ रेतः प्रतिगृह्णाति; अथ या न विजायते नो हैव तस्याः क्षीरं भवति, न हि सा[९] तच्छुक्लꣳ[९] रेतः प्रति[गृह्णाति][१०]॥ १॥ तन्नु हैतदेके शूलाकृतस्य निपाक्यं[११] खादन्ति[१२]; एषा वा अस्यैतद्[१३] देवता रूपमादत्त इति वदन्तः॥ २॥ शुक्रशृतꣳ[१४] स्यात्, तत् पुमान् खादेत्[१५]; कामं तु ह स्त्री निपाक्यं[१६] खादेदात्मनैवात्मानꣳ समनक्ति॥ ३॥ [३३] [इति सप्तविंशोऽनुवाकः]

---

१. MHP broken. २. MHP broken. ३. MHP broken. ३क. MHP, AO VI.118:239.14 आ ह. ३ख. MHP यद्वापः, thus AO VI.118.239.15. ४. MHP य. ५. MHP आदित्यस्य. ६. MHP om. ६क. MHP om. ७. MHP broken; thus AO VI. 118 : 238.24. ८. MHP वैवं; thus AO **ibid.** ९. MHP साहिताच्छु°. १०. MHP om; thus AO VI. 118 : 239.2. ११. MHP निवापाक्यं. १२. MHP वादन्ति [P वद°]; १३. MHP अन्यैत°. १४. MHP शुक्रंशृतं; thus AO VI. 118 : 239.4. १५. MHP वादेत्; thus AO VI. 118 : 239.5. १६. MHP निवाक्यं; thus AO **ibid.**

सप्त च शतानि विꣳशतिश्चेष्टकाः प्रथमा चितिरुपधीयते; अनुसंख्याता गार्हपत्याः; एवं द्वितीयैवं तृतीयैवं चतुर्थ्येवं पञ्चम्येवं षष्ठी; उत्तमायां चित्यां धिष्णियाननु संचष्टे; तानि वा एतानि त्रीणि च सहस्राणि संपद्यन्ते षट् च शतानि; एतावन्तो वै पञ्चानाꣳ संवत्सराणामहोरात्रा यावतीरेता[१] इष्टका यावानग्निः संचित; एतावद्धिहास्य यज्ञक्रतुभिरिष्टं भवति यावतीरेता इष्टका यावानग्निः संचितो य एवंविद्वानग्निं चिनुते यस्य वैवंविद्वानग्निं चिनोति॥ १॥ [३४] [इत्यष्टाविंशोऽनुवाकः]

॥ इत्यग्निचयनान्वाख्यानं समाप्तम्॥

॥ इति पञ्चमः प्रपाठकः॥

॥ इति वाधूल-अन्वाख्यानं समाप्तम्॥

---

१. AO VI. 119 : 239 om एता.